SA´HITYAPARICHAYA

OR

ANiINTRODUCTION TO SANSKRIT LITERATURE.

PART I.

WITH NOTES, AND AN ENGLISH TRANSLATION.

BY

NÍLAMANI MUKHOPÁDHYÁYA NYÁYÁLANKÁRA M.A.,B.L.,
Asst. Professor of Sanskrit, Presideney College.



साहित्यपरिचयः ।

प्रथमो भागः ।

श्रीनीलमणिमुखोपाध्यायेन
सङ्कलितः ।

CALCUTTA.
Printed and Published by B. L. Chakravarti.
THE NEW SCHOOL-BOOK PRESS.
No. 8 Dixon's Lane.
1880.

(All rights reserved.)

Digitized by Google

Digitized by Google

PREFACE.

An Indian savant of European reputation has remarked, that the besetting defect of Sanskrit prose-compositions is, that they relate either to love-intrigues, or to the chatterings of birds and beasts. The remark is certainly true so far as printed books are concerned. The Hitopodesa, or the Panchatantra, when stripped of indecent passages, might furnish a few stories, decent enough to be taught in our schools. But as they describe only the doings of crows and jackals, and lack the interest and variety, that belong to human affairs, they would scarcely convey that moral instruction, which stories of human life do. It is not therefore strange, that the students in our schools, who commence Sanskrit at a more advanced age than they do English, should take but little interest in the study of Sanskrit, and betake themselves to books of a questionable character, to seek relief from the monotony of their text-books.

In these days of practical earnestness, and critical research, tales composed on the model of old Æsop will only interest such as are not yet weaned from the influences of the nursery. It is not therefore unnatural that those who take interest in the education of their countrymen, should feel and keenly feel the want of such Readers in Sanskrit, as would be easy without being too low for the riper understanding of the learner, and would, at the same time, be interesting without being devoid of moral instruction.

Being alive to the desirability of such a compilation as would answer the above purposes, I went over a few of what are called the Champúkàvayas, the Bhàrata-champú, the Rámáyana-champú &c. &c. They are written partly in prose,

Digitized by Google

and partly in verse, and relate to Pauranic themes. I expected that enough might be gleaned from that unexplored field to serve my purpose. But I was utterly disappointed. The works in question are disfigured with those faults of diction, and conception, that characterize the post-mehomedan period of Sanskrit literature. I should have therefore abandoned my task in dispair, but for the loan of three manuscripts, for which I was indebted to the courtesy of Babu Umesa Chandra Gupta, the Librarian of the Sanskrit College.

One of the manuscripts is the Purushaparíkshà which, in its Bengali translation, was well-known to the alumni of the Hindu College in old days. The translation was made by one Vidyàpati at the request of Ràja Siva Singha; and was used as a text-book in Bengali for the senior scholarship examination for many years. The Sanskrit of the Purushaparíkshá is remarkably easy, and the stories therein contained are, with a few exceptions, interesting, and instructive. The second manuscript is the Kathàkosha, a collection of stories, written by Jaina authors in a propagandist spirit. It contains seventeen stories, of which two refer to tenderness to animal life—a theme of which Jaina authors are never tired. As the chief object of the book was to bring the Jaina-tenets within the reach of the understanding of the common people, both its manner, and matter are extremely simple. The style is easy to a fault, and, I regret to say, it is not a rare occurrence to find in it perspicuity secured at the expense of grammar.

The third manuscript, from which I have made my selections is the Vetálapanchavinsati. It is full of mistakes, and would fitly compare with an edition of the work recently brought out in Calcutta. But as the blind may sometimes lead the blind, so I have found the manuscript-copy and the printed edition serving as mutual checks, and correcting each other. The manuscripts of the Purushaparíkshá, and Kathákosha, are not so bad, though they are very old, and worm-

Digitized by Google

eaten. But as my object was to make a suitable compilation for the beginner, and not to prepare editions of the above works, I have taken considerable liberties with the text in correcting its false grammar, altering irregular constructions, and cutting down the length of high-sounding periods.

Notes are supplied on a liberal scale to assist in the work of tuition, and an English translation is given at the end of the volume, partly with a view to elucidate the text, but chiefly in order to help the Higher class schools in the Muffessil, where facilities for teaching the art of translation into English are seldom available.

The 15th November 1880.
Presidency College.
CALCUTTA,


The compiler.

Digitized by Google

Digitized by Google

साहित्यपरिचयः ।

प्रथमोभागः ।



पण्डितमूर्खकथा ।

अथ पुनरानीयमानो वेतालः कथामपरां कथयति, देव ! दक्षिणस्यां दिशि ब्रह्मपुराभिधेयं (१) नाम नगरं पुरासीत् । तत्र विष्णुस्वामी नाम ब्राह्मण उवास । सोऽतीव धनहीनः । तस्य चत्वारः पुत्रा बभूवुः । कियता कालेन विष्णुस्वामिनि मृते ते चत्वारः प्राणरक्षार्थं मातुलालयमगमन् । मातुलोऽपि तान् दरिद्रानवलोक्य न सम्भाषयामास । ततस्ते मर्त्तुमुद्यमं चक्रुः । ततः कोऽपि सुजनः तान् मरणान्निवर्त्त्याब्रवीत्, ब्राह्मणकुमारा यूयं विद्याभ्यासं कुरुत, तदा सर्व्वसुखं भविष्यति । तच्छ्रुत्वा ते मरणविधिं (२) परित्यज्य विद्यासिद्धार्थं

(1) Brahmapura—the city of Bráhmans ; the word Brahman, when masculine, means both the god Brahman and Bráhmans. It can not be indentified in the present state of oriental researches.

२ मरणविधिं—विधीयते यः स विधिः विधानं उद्योगः व्यवसाय इति यावत् ।

Digitized by Google

गतवन्तः। अथैकदा कृतविद्यास्ते सर्वे मिलित्वा अन्योऽन्यं जिज्ञासामारेभिरे। प्रथमेनोक्तं अहं मृताश्थिसञ्चयनविद्यां (१) जानामि। अपरेणोक्तं अहं शोणित-सञ्चारविद्यां जानामि। तृतीयेनोक्तं नख-केशदन्तसञ्चयविद्यां जानामि। चतुर्थेनोक्तं जीव-यितुं जानामि। विद्यापरीक्षार्थिकीर्षवस्ते व्याघ्रा-स्थीनि समासाद्य व्याघ्रं जीवयामासुः। ततः प्राप्त-जीवनेन व्याघ्रेन चत्वारो भक्षिताः। वद राजन्! तेषां मध्ये को वधभागी भवति। राजा वदति शृणु रे वेताल! जीवनदाता वधभागी भवति। नृप-ताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

—०—

योगिकथा।

अथ पुनरानीयमानो वेतालः कथामपरां कथ-यति। देव! कलिङ्गविषये (२) यन्नखलं नामधेयं

---

१ मृताश्थिसञ्चयनविद्यां—यया विद्यया मृतस्य अस्थीनि यत्र तत्र स्थितानि अपि एकत्र संगच्छन्ते तां विद्यां।

२ कलिङ्गनामा विषयः देशः तस्मिन्।

The ancient capital of Kalinga was Kalinga, which was situated from 233 to 250 miles to the south-west of Ganjám. Rájamáhendrí was the capital of the junior or eastern branch of the Chálukya princes,

Digitized by Google

नगरमासीत्। तत्र यज्ञसोमनामा ब्राह्मणस्तिष्ठति। तस्य ब्राह्मणी सोमदत्ता। तस्यामनेन ब्रह्मस्वामी नाम पुत्र उत्पादितः। स च सर्व्वशास्त्रतत्त्वज्ञो भूत्वा दैववशात् पञ्चत्वमगात्। ततस्तत्पितरौ बहुविधं विलपन्तौ बन्धुजनसहितौ तमादाय श्मशाने सत्कारार्थमाजग्मतुः। इत्येव काले श्मशानवासी योगी तं द्विजकुमारं सर्व्वशास्त्रवेत्तारं मनोहरकलेवरमालोक्य करुणस्वरेणोच्चैः क्रन्दितवान्, परमकौतुकेन नर्त्तितवांश्च। सहसोत्थाय योगेन जीर्णशरीरं परित्यज्य मृतस्य द्विजकुमारस्य शरीरं प्रविवेश। कुमारे सुप्तोत्थिते (१) तत्पितरौ परां प्रीतिमासादितवन्तौ। सर्व्वे बन्धुवर्गाश्च हर्षिता बभूवुः। ब्रह्मस्वामी प्राप्तजीवनः सर्व्वभोगं परित्यज्य योगं (२) ध्यायन् तस्थौ। श्मशानवासी योगी कथं चक्रन्द कथं वा ननर्त्त तत्कारणं वदतु देव!। राजा वदति शृणु

---

whose authority extended to the frontiers of Orissa. The Mahendra-range of mountains, one of the Kuláchalas, which devides Ganjám from the valley of the Mahánadí, is the principal feature in this large tract of country.

१ सुप्तोत्थिते—आदौ सुप्तः पश्चात् उत्थित तस्मिन् निद्राया उत्थिते इव प्रतीयमाने नतु वस्तुतः सुप्तोत्थिते इत्यर्थः।

२ योगं—जीवात्मपरमात्मनोरैक्यं चिन्तयन्।

Digitized by Google

रे वेताल ! चिरकालमध्युषितं शरीरं त्यक्तव्यमिति चक्रन्द। जीर्णशरीरं विहाय सर्व्वगुणाधारद्विज-शरीरं प्राप्तव्यमिति ननर्त्त।

दयावीरकथा।

अथ राज्ञा पुनरानीयमानो वेतालः कथामपरां कथयति। देव! अस्ति नर्म्मदातीरे धर्म्मपुरनामधेयं (१) नगरम्। तत्र जीमूतवाहनो नाम राजा बभूव। स एकदा अमात्यसहितः सुखासीन आस्ते। इत्येव काले एका स्त्री करुणस्वरेण रोदिति। क्रन्दनं श्रुत्वा राजा प्रतीहारमादिदेश प्रतीहार! का रोदिति गत्वा निरूपय। ततो गत्वा वदति मातः! का त्वं कथं वा रोदिषि? सा ब्रूते नागमाताहं (२) ममाष्टपुत्रा (३) गरुड़ेन खादिताः, एष एकः पुत्रो

---

१ Dharmapur—might be the same with Dharmaranya, which was founded by Amurta-rajas, son of Kuśa.

२ नागमातृशब्दः मनसादेवीरूपे अर्थे रूढः। अत्रतु यौगिकार्थत्वात् अन्यस्यां कस्यांचित् नागजनन्यां वर्त्तते।

३ प्रधाननागाः अष्टौ शङ्खपालमीकृतमः। अत्र तु ते नव इति वर्णितमिति तेषां प्रधाननागत्वं न प्रतिभाति। तथाहि "अनन्तो वासुकिः पद्मी महापद्मश्च तक्षकः। कुलीरः कर्कटः शङ्खी त्वष्टौ नागाः प्रकीर्त्तिताः।"

Digitized by Google

विद्यते, एतं द्वेषभावेन खादितुं स्पृहयति, तेनाहं क्रन्दामि। ततः प्रतीहारो गत्वा राजानं ज्ञापयामास, देव! शङ्खनाम्नो नागस्य मातासौ भविष्यत्पुत्रशोकमधिगम्य रोदिति। तस्या अष्टौ पुत्रा गरुड़ेन खादिताः। एक एव पुत्रो विद्यते तमपि वैरिभावेन खादितुं स्पृहयति। तत् श्रुत्वा राजा वदति, प्रतिहार! गत्वा तां ज्ञापय अहं तस्याः पुत्ररक्षां करिष्यामि। किन्तु गरुड़स्यागमनकालं समधिगम्य मां नेष्यति। तत् श्रुत्वा प्रतीहारो गत्वा नागमातरमब्रवीत्, नागमातः? तव पुत्रं राजा रक्षिष्यति, किन्तु गरुड़ागमनकाले राजानं ज्ञापयिष्यसीत्युक्त्वा चलितः। अथ तया गरुड़ागमनकाले नीतः राजा परमधार्म्मिको जीमूतवाहनः तस्मै गरुड़ाय स्वदेहमुपढौकितवान्। ततो गरुड़ो नृपतेः पार्श्वमेकमखादत्। अनन्तं पार्श्वपरिवर्त्तनमाचर्य्य (१) अपरपार्श्वमुपनीय राजा वदति, महाशय! खगेश्वर! एतत्पार्श्वमपि सुखेन खादित्वा निजस्थानं सर्पतु भवान्। तत् श्रुत्वा विस्मितो गरुड़ः अचिन्तयत्, कोऽयं महाशयः

---

१ आचर्य्य—कृत्वा।

Digitized by Google

पापिष्ठेन मया खादितः। अन्ये तावन्मद्दर्शनेन प्राणांस्त्यजन्ति। अयञ्च खाद्यमानोऽपि प्रसन्न एतद्वचनं वदति। विशेषतः यज्ञोपवीतधारी दृश्यते, तस्मात् ब्रह्मबधं (१) कृतवानस्मि। इति विचिन्त्य गरुड़स्तमब्रवीत् भो महासत्त्व! किं ब्राह्मणो भवान्? राजा वदति, नाहं विप्रः। सन्देहं विमुच्य भवान्मां खादतु। गरुड़ो वदति किं क्षत्रियोऽसि? तत् श्रुत्वा राजा तूष्णींस्थितः। गरुड़: पुनस्तमब्रवीत्, भो महासत्त्व! भवतोवर्णः(२) समधिगतः किन्तु निजनाम पापिष्ठं मां ज्ञापय। निर्व्वन्धातिशयेन राजा ब्रूते पक्षिराज! जीमूतवाहननृपतिरहम्। गरुड़ो वदति अहं तावन्नागान् खादामि, तत् भवान् कथं आत्मानं खादयति। इति पृष्टो ब्रूते, खगेश्वर! शङ्खचूड़स्य मातुरष्टौ पुत्रा भवता खादिताः। एक एव पुत्रोऽवशिष्टस्तमपि खादितुं स्पृहयति भवान् इति सा रोदिति। तदहं प्रतिज्ञातस्तस्य (३) रक्षार्थमात्मशरीरमुपनीत-

---

१ ब्रह्मवधं—ब्रह्मणः ब्राह्मणस्य वधः तं पुंलिङ्गः ब्रह्मशब्दः चतुरानने ब्राह्मणे च वर्त्तते। २ वर्णः ब्राह्मणक्षत्रियादन्यतमत्वम्।

३ प्रतिज्ञातः प्रतिज्ञया प्रतिज्ञाहेतोः। तृतीया स्थाने तस्। यतोऽहं प्रतिज्ञातवान् अत इत्यर्थः। यद्वा प्रतिज्ञातः प्रतिज्ञारूढः, प्रति + ज्ञा + (कर्त्तरि) क्तः।

Digitized by Google

वान्। तत् श्रुत्वा दुःखितो भूत्वा पातालं (१) प्रविश्य अमृतमानीय गरुड़ो जीमूतवाहनस्य शरीरं सम्पूर्णं (२) कर्त्तुमुद्यतोऽभवत्। तदा राजा वदति भो पक्षिराज! यद्येवं स्यात् तदाष्टौ नागपुत्रान् जीवयाग्रतः। पश्चात् यत् युक्तं तत् आचरिष्यति भवान्। एतेन वचनेन गरुड़ः प्रीतो भूत्वा तान् सर्व्वान् जीवयित्वा पश्चात् नृपतिं जीवयतिस्म (३)। ततः सा नागमाता नवपुत्रसहिता सुप्रीता निर्भया तत्रैव स्थिता। जीमूतवाहनोऽपि स्वालयमाजगाम। वेतालो वदति, जीमूतवाहनगरुड़योर्म्मध्ये को महायशा इति वदतु देवः। राजा वदति, शृणु रे वेताल! जीमूतवाहनः, पक्षिराजो मां यज्ञोपवीतधारिणमालोक्य न खादिष्यति। विप्रे-

---

१ पाताले, अमृतस्य सम्भवः न पुराणसम्मतः। अमृतं प्राक् जलधिगर्भे गुप्तमासीत्, ततो देवासुरैः समुद्रं मथित्वा लब्धं दैवैः पीतम्। तत्पीतावशिष्टञ्च चन्द्रलोके न्यस्तमासीत्। ततो गरुड़ः स्वजनन्या दासीभावं मोचयितुं संग्रामे देवान् निर्जित्य अमृतं जग्राह इति पुराणवार्त्ता अनुसन्धेया।

२ सम्पूर्णं खादिताङ्गप्रत्यङ्गानां नवीकरणात् पूर्ववत् समग्रावयवान्वितं इत्यर्थः।

३ जीवयतिस्म जीवन्मृतस्य तस्य क्षतप्रतीकारात् तं नवजीवन कुलमिव अकरोत्।

Digitized by Google

षतः तेन सह मम विरोधो नास्ति तस्मात् नाग-पुत्रस्य रक्षणमाचर्य्य महापुण्यं प्राप्नोमीति विचिन्त्य गरुड़ाय स्वशरीरमुपनीतवान्। किन्तु गरुड़ो महायशाः। नृपताविति वादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

विषमसमस्या।

अथ राजा वेतालं शाखां शाखां भ्रामं भ्रामं कदर्थ्य एकस्यां वृक्षशाखायां विधृत्य स्थितः। राजा प्रबन्धेनानेतुमक्षमो (१) भूत्वा खड्गेन शाखामुच्छिद्य शाखासमेतं वेतालं स्कन्धे कृत्वा मौनपरायणो भूत्वा श्मशानशीलसमीपं गन्तुमुपचक्रमे। तथापि वेतालः पुनर्गुरुवाक्यं (२) प्रश्नमकार्षीत्, देव! दक्षिणस्यां दिशि धर्म्मसेनो नाम राजासीत्। तस्य महादेवी चन्द्रावती (३) तस्यामनेन विलासवती नाम कन्या समुत्पादिता। एकदा सिंहलेश्वरो राजा तं धर्म्म-

---

१ प्रबन्धेन—सम्यक् बन्धनेन। शाखायाः दृढ़खण्डं तं वियोज्य बद्धा आनेतुमक्षमः शाखां छित्वा तत्सहितं वेतालं स्कन्धे उवाह।

२ गुरुवाक्यं दुर्वोधार्थकेषु वाक्येषु निबद्धम्।

३। चन्द्रावती चन्द्रः अस्ति अस्याः चन्द्रावती, निपातनात् दीर्घः।

Digitized by Google

सेनं जेतुमागतः। तदानीमन्योऽन्ययुद्धं बभूव। अथ बलवता सिंहलेश्वरेण पराजितो धर्मसेनः स्वराज्यं विहाय हयमारुह्य वनं प्रविवेश। तदृतान्तमधिगम्य तस्य महादेवी चन्द्रावती दुहितरमादाय भयात् वनं प्राप्तवती। अथ तत्रैव वने प्रचण्डसिंहो नाम क्षत्रियः मृगान्वेषणाय सम्प्राप्त आजगाम। स सकर्हमे पथि स्त्रीहयपदचिह्नं निरीक्ष्य पुत्रमब्रवीत्। भो पुत्र! दिव्यस्त्रीहयस्य (१) पदचिह्नमुपलक्ष्यते। तत् यदि स्त्रीहयं लभ्येत तदा दीर्घचरणा मम भार्य्या, ह्रस्वचरणा तव भार्य्या। तत् श्रुत्वा पुत्रेणाङ्गीकृतम्। ततः तेन पदचिह्नेन गत्वा चन्द्रावतीविलासवत्यौ सरोवरे प्राप्ते दैववशात्। दीर्घचरणा प्रचण्डसिंहेन स्वीकृता (२)। ह्रस्वचरणा तत्पुत्रेण स्वीकृता। कालवशात् तयोस्ताभ्यां पुत्रावुत्पादितौ। तयोः कुमारयोः सम्बन्धः को भवति। क्रोधं विमुच्य सन्देहच्छेदमारचयतु

---

१ दिव्यं दिविभवं दिव्यं स्वर्गीयं परमोत्कर्षयुक्तं इति यावत्।

२ स्वीकृता भार्य्यात्वेन परिगृहीता। प्रचण्डसिंहः क्षत्रियः तेन अन्यपरिणीतायाश्चन्द्रावत्या भार्य्यात्वेन परिग्रहः आर्य्यासामाचारविरुद्धः न सम्भवति। आख्यायिकायामपि देशकालपात्रविरुद्धा वर्णना न युज्यते। यदा पत्युरनुईशात् पत्यन्तरग्रहणं शास्त्रीयमिति मत्वा तथा कृतम्।

Digitized by Google

देवः। तत् श्रुत्वा राजा विपरीतसम्बन्धपरिच्छेदे (१) अशक्त एवासीत्। अज्ञात्वा उत्तरं न दातुं दोषो नास्ति इति विचिन्त्य दृढ़मौनेन शान्तिशील-समीपं गच्छन् विद्यते।

गीतविद्याकथा।

बभूव गोरक्षपुरे (२) राजधान्यामुदयसिंहो नाम राजा। स तु सर्व्वगुणानामनुरागी विशेषज्ञो (३) वदान्यश्च तेन गुणिनस्तमाश्रयन्ति। एकदा तु कला-निधिनामा गायनस्तीरभुक्ति(४)राष्ट्रात्तत्राजगाम।

---

१ विपरीतयोः सम्बन्धयोः पितृव्यमातुलत्वयोः भ्रातृपुत्रभगिनी-पुत्रत्वयोश्च परिच्छेदे निरूपणे अशक्तः असमर्थः बभूव।

२ Gorakshapura—a town in the North-west provinces, noted for a temple dedicated to god, Hara, called Gorakshanátha. It stands on the bank of Raptí (Revatí), a tributary of the Ganges.

३ विशेषज्ञः विशेषं गुणदोषयोः हिताहितयोः सदसतोश्च वैलक्षण्यं जानाति यः सः।

४ Tírabhukti—is the modern Tírahut or Tirhoot. The modern town of Janakpur in the Motihári district is acknowledged to be the same place as the ancient Janakapura, the capital of Mithilá.

Digitized by Google

राजदेवार्चनकाले (१) गीतानि गायन् स सर्व्वैः सभासद्भिः स्तुतो राज्ञा च काञ्चनैः पूजितः। ततस्तस्य स्तवं श्रुत्वा पूजाञ्च दृष्ट्वा तद्देश्यीयगायनाः सामर्षा बभूवुः, तेन समं बद्धस्पर्द्धास्तस्य निन्दां चक्रुः, राज्ञे च निवेदयामासुः देव! गायनोऽसौ विदेश्यो नाम-मात्रेण कलानिधिरस्ति (२) गीतकलां कामपि न जानाति। तत् कथमेनं पुरस्करोति देवः। तथाहि—

अविज्ञत्वं यथा राज्ञी गुणिनामपरिग्रहात्।
परिग्रहाच्च (३) मूर्खाणां तथा स्त्रीकेषु जायते॥

राजोवाच, अये गायना! एतस्य गीतेन मम हृदयमस्तस्रपितमिव भवति तेनाहमेनं पुरस्करोमि यूयमनुभवविरुद्धं (४) किं वदथ। गायना ऊचुः यदयं गुणी न भवति तर्हि मध्येसभ (५) मस्माकञ्च गीत-

---

१ राजदेवार्चनकाले राज्ञः ये देवाः तत्प्रतिष्ठितदेवप्रतिमाः तेषां अर्चनं तस्य कालः तस्मिन्।

२ नाममात्रेण कलानिधिः केवलेन नाम्ना एव कलानिधिः कलानां गीतादीनां निधिः आधारः। कार्य्यतस्तु न तथा इति भावः।

३ परिग्रहात् स्त्रीकारात् गुणवत्तया आदरात् पुरस्कारदानादित्यर्थः।

४ अनुभवविरुद्धं प्रत्यक्षविरुद्धं। opposed to common-sense, experience.

५ मध्ये-सभं सभाया मध्यं। अव्ययीभावः।

Digitized by Google

कलां (१) विचारयतु देवः। राजोवाच कलानिधे ! देहि त्वमेतेषां वचस्युत्तरम्। कलानिधिरुवाच, देव ! नायं ममोत्तरस्यावसरो न गानसमयश्च। यतः—

श्रोता यदासीद्धरसिंहदेवो गीतीऽहमासं(२) नृपते तदैव।
मधावतीति मधुरस्वरेण न पञ्चमं गायति कोकिलोऽपि॥

गायना ऊचुः, देव ! महानस्य मदस्तद्विचारयतु भवान्। राजोवाच, अहो तीरभुक्तीयाः स्वभावात् गुणगर्व्विण एवं भवन्ति। कलानिधिरुवाच, देव ! नाहं गर्व्वी किन्तु यथार्थं निवेदयामि। मया गातव्यं भवदीयगायनैश्च गातव्यं तदुभयगीतविशेषः केन विचारणीयः। यतः——

हरौ वा हरसिंहे वा गीतविद्याविदौ स्थितौ।
हरसिंहे गते स्वर्गं गीतवित् केवलं हरः॥

यदि स परमेश्वरः साक्षादागत्य विचारयति तदाहं परस्पर्द्धया (३) गायामि। गायना ऊचुः,

---

१ गीतकलां—गीतविद्यां।

२ गीतीऽहमासं अहं गीत आसं अभवम्। असेः लङि उत्तमपुरुषैकवचनम्। गीतं गानं भावे क्तः। गीतमस्यास्तीति गीतः। अर्शआदित्वात् अप्रत्ययः।

३ परस्पर्द्धया परैः सह अर्द्धा उत्कर्षापकर्षप्रदर्शनं तया।

Digitized by Google

परमेश्वरो भगवान् दुर्लभ एव, अन्यमध्यस्थानयं (१) न स्वीकुरुते, ततो मध्यस्थापरिग्रहः कलानिधेः पराजयलक्षणं दृश्यते। कलानिधिरुवाच, एवं चेत्तर्हि युष्माभिरेव स्वीक्रियतां मध्यस्थः, तस्यैवाग्रे गास्यामि। गायना ऊचुः, एतद्देशीयो मध्यस्थो भवतास्मत्पक्षपाती ज्ञातव्यः। ततो गीतविदो हरिणा भवन्ति, ते पशवः कस्यापि पक्षपातिनो न भवन्ति, तेषामग्रे गास्यामः। कलानिधिरुवाच, हरिणाः पशवोऽपि गीतरसलम्पटाः,(२)येन केनापि गीतेनाकृता भविष्यन्ति। यदि पशव एव मध्यस्थाः स्वीकर्त्तव्यास्तदा गावो भवन्तु मध्यस्थाः। एवमुभयानुमत्या गावो मध्यस्थाः कृताः। राजा कुतूहली बभूव। व्यवस्थेयं (३) यन्नावस्तृणार्त्ताः पानीयमुद्दिश्य गच्छन्तो यस्य गीतेन पानीयपानं परित्यज्य जलाशयनिकटात् गीतरसलोभेन निवर्त्तन्ते, स एव

---

१ मध्यस्थः—मध्ये उभयपक्षयोः वादिप्रतिवादिनोः अन्तरा तिष्ठति यः सः। An umpire.

२ गीतरसलम्पटाः—गीतमेव रसः आस्वाद्यः तस्मिन् लम्पटा लोलुपाः अतिलोभात् सदसद्विवेकविधुरा इत्यर्थः।

३ व्यवस्था—नियमः।

Digitized by Google

गायनः पूज्यो भवति। पश्चात्तथा क्रियमाणे विचारे कलानिधिना जितं राजपूजा च लब्धा।

जन्मवर्व्वरकथा।

सुबुद्धिः पुरुषश्रेष्ठः कुबुद्धिः पुरुषाधमः।
अबुद्धिः पशु(१) सामान्यीलीयतमी नाधमश्च सः॥

तथाहि——

क्षुधा निद्रा भयं क्रोधः प्रमादः सङ्गिता (२) इच्छा।
पशुसाधारणा धर्म्माः सम्भवन्त्यधियामपि॥
अबुद्धिर्द्विविधः प्रीक्तो जन्मसंसर्ग(३)भेदतः।
तावेव सर्व्वकर्म्माज्ञौ लोके वर्व्वरतां गतौ॥
वर्व्वरस्य कथां श्रुत्वा इसन्तः संकुतूहलाः (४)।
हेयत्वेनावगच्छन्ति शिशवोऽप्यस्य चेष्टितम्॥

आसीत् कौशाम्बी (५) नाम नगरी, तस्यां देवधरो नाम गणकः प्रतिवसति। तस्य शान्तिधरो

---

१ सामान्यः—समान एव सामान्यः। स्वार्थे ष्णः।

२ सङ्गिता—सङ्गलिप्सा, सहचरत्वं। इच्छा-देषः।

३ जन्मसंसर्गभेदतः—जन्मसंसर्गयोर्भेदः भिन्नता तस्मात्। जन्मना संसर्गेण च।

४ संकुतूहलाः—सम्यक्कौतुकयुक्ताः। सम्यक् कुतूहलं येषां इति विग्रहः।

५ Kauśámbí—The city is said to have been founded by Kuśamba, the tenth in descent from Puraravas. But its fame begins only with the reign of Chakra,

Digitized by Google

नाम पुत्रो बभूव। स च जन्मवन्ध्यः, गुरुणा पाठ्यमानोऽपि पदार्थं (१) नाधिगच्छति।

तथाहि——

पिता ददाति सर्व्वस्वं पुत्रेभ्यः परितीषवान्।
न तु भाग्यञ्च बुद्धिञ्च दातुं तेनापि शक्यते॥

तथापि लोकद्वयप्रत्याशाङ्कुरः (२) सकलमनोरथ (३) स्थानमेक एव तस्य पुत्रः। तेनासौ कर्म्मान्तरपराङ्मुखः प्रतिक्षणं तस्य छायावाही (४) तं पाठयति। महता समयेन महता पितुः श्रमेण स शुकवदभ्यस्तशास्त्रो बभूव। तमधिगतशास्त्रं

---

the eighth in descent from Arjuna, who made Kauśambí his capital after Hastinápura had been swept away by the Gánges. It is indentified with the old village of Kosam, on the Jamuná, about 30 miles above Allahabad.

१ पदार्थं—विषयस्वरूपं वस्तुतत्त्वं नाधिगच्छति न जानाति।

२ लोकद्वयप्रत्याशाङ्कुरः—लोकद्वयस्य प्रत्याशा ऐहिकपारत्रिकशुभकामना तस्या अङ्कुरः बीजं। लोकद्वये यत् शुभं भविष्यति तस्य प्रथमचिह्नस्वरूपमित्यर्थः। "पुत्रेण लोकान् जयति" इति श्रुत्यात्।

३ सकलमनोरथस्थानं—सकलमनोरथानां उभयलोकविषयकानां कामनानां स्थानं आधारः केन्द्रस्वरूपं इत्यर्थः। The centre of all his hopes.

४ छायावाही—छायां प्रतिबिम्बं वहति धारयति। छायां अनुवर्त्तते न कदापि तां विहाय गच्छति। नियतसङ्गीत्यर्थः।

Digitized by Google

कृत्वा स गणकश्चिन्तयामास, यदेनं पुत्रं राज्ञः परिचितं करोमि। ततः स गणकः राज्ञः तं पुत्रं उपनिनाय। तं पुरोवर्त्तिनं दृष्ट्वा राजोवाच, अये देवधरगणक! किमधीतमनेन तव पुत्रेण? गणक उवाच, देव! गणनशास्त्रं (१) मानसप्रश्नञ्च जानाति। ततोऽद्य देवेन पृष्टो यदि प्रश्नं ज्ञास्यति तदयमध्ययनफलभाजनं भविता। तदनन्तरञ्च सकौतुको राजा सुवर्णाङ्गुरीयकमेकं मुष्टौ कृत्वा पप्रच्छ, अरे गणककुमार! जानीहि तावत् किं वस्तु मम मुष्टौ विद्यते। ततो गणकपुत्रः कठिनीमादाय शास्त्रानुसारेण गणयामास। गणनया च विदित्वाब्रवीत्, देव! न जीवो न वा स्थूलं किन्तु धातुरूपं वस्तु देवस्य मुष्टौ तिष्ठति। राजोवाच, संवादिनी वाक् (२)। गणकः पुनरुवाच, मण्डलाकृति वस्तु विद्यते। राजोवाच, संवदति (३) वचः।

---

१ गणनशास्त्रं—ग्रहनक्षत्रराशीनां स्थानानुसारेण करकुष्ठीदर्शनेन भाविशुभाशुभनिर्णयी गणनं तस्य शास्त्रं ज्योतिषं। मानसप्रश्नं—यत् किञ्चित् वस्तु मनसि विचिन्त्य कस्यचिदपि न कथयित्वा गणकः तन्निर्णयार्थं पृच्छते, स एव मानसप्रश्नस्य विषयः।

२ संवादिनी—अविरुद्धा, वस्तुस्वरूपस्य अनुरूपा। consistent.

३ संवदति युज्यते वस्तुस्वरूपेण सह मिलति सङ्गतार्थं भवतीत्यर्थः। agrees with the thing; is consistent.

Digitized by Google

गणकः पुनरब्रवीत्। गुरुद्रव्यं मध्ये शून्यञ्च भवति। राजोवाच, साधु गणककुमार! साधु भद्रं जानासि कथय कथय। ततो राजप्रशंसया जातरभसः (१) पुलकितकायः (२) वाङ्मूलस्फुरितं कृत्वा, कथयामीति उक्त्वा गणनामपहाय नियोगेन (३) कथयामास। देव! पाषाणघटितकमस्फलं (४) विद्यते देवस्य मुष्टिगर्भे। राजा विहस्योवाच, अये गणक! तव पुत्रः शास्त्रकृताभ्यासोऽस्ति, किन्तु बुद्धिर्नास्ति। यावद्दूरं शास्त्रानुसारिण्या गणनयाभिहितमनेन, तावद्दूरं संवादएव जातः यच्च स्वकीयोहेन(५) उक्तं तत्रैव विसंवादो(६) दृष्टः। किमधिकं अरे गणकपुत्र! त्वं जानास्येव यन्मानुषमुष्टिगर्भे

---

१ जातरभसः—जातहर्षः, जातवेगो वा elated, excited.

२ पुलकितकायः—पुलकवृक्षः क्षीमाञ्चितः कायो यस्य सः। वाङ्मूलस्फुरितं कृत्वा वाङ्मीः मूलधीः स्फुरितं स्फुरणं स्पन्दनं कम्पनं कृत्वा। भावे क्तः।

३ नियोगेन—अनुमानेन, तर्केण, स्वबुद्ध्या वस्तुधर्मपर्य्यालोचनया इत्यर्थः।

४ पाषाणघटितकमस्फलं—पाषाणनिर्म्मितं मस्फलाकारं पेषणयन्त्रं, जांता इति भाषा।

५ ऊहः तर्कः अनुमानम्।

६ विसंवादः—विरोधः सामञ्जस्याभावः।

Digitized by Google

घरट्टकमण्डलं न सम्भवतीति तत् कथमव्याप्ति (१)-मूलकएवायन्तर्व्यस्त च चेतसि पदं(२)लेभे? तस्मादवश्यं बुद्धिहीनोऽसि, इत्यभिधाय राजा तमवज्ञातवान्।

तथाहि——

गुरून् समर्च्चन्नपि जीवनावधि भ्रमन्धरित्रीमपि यावदम्बुधिम्।
अधीत्य शास्त्राण्यपि चिन्तयन्मुहुर्धिया विहीनो नहि याति भीरताम्॥

—०—

हासविद्याकथा।

बभूव काञ्चीनाम (३) राजधानी। सुप्रतापो नाम राजा तत्र। एकदा कस्यचित् धनिकस्य धनं चोरयन्तश्चत्वारश्चोराः सन्धि-द्वारि(४) प्रशास्तृपुरुषैः(५)

---

१ अव्याप्तिमूलः—लक्षो लक्षणगमनाभावः अव्याप्तिः, सा एव मूलं निदानं यस्य। अप्रासङ्गिक इत्यर्थः। irrelevant, inconsistent.

२ पदं—स्थानं, आस्पदं।

३ Kánchipura—is the true sanskrit name of Conjeveram, on the Palar river. It was the capital of Drávida, and one of the seven sacred cities

(अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः॥)

४ सन्धिद्वारे—चौरकृतस्य विलस्य प्रवेशमार्गे।

५ प्रशास्तृपुरुषैः—दण्डनायकैः शास्त्रिरक्षकैः by the police constables.

Digitized by Google

ग्रामाः शृङ्खलैर्बद्धा राज्ञे निवेदिताः। राजा च घातकपुरुषानादिदेश, रे रे घातकपुरुषाः! चतुर एव चौरानेतान्नगराद्बहिः नीत्वा शूलमारोप्य मारयत।

तथाहि——

सम्बर्द्धनञ्च (१) साधूनां दुष्टानाञ्च निवर्हणं।
राजधर्म्मं बुधाः प्राहुः दण्डनीतिविचक्षणाः॥

ततो राजाज्ञया घातकपुरुषैस्तयश्चौराः शूलमारोप्य हताः। चतुर्थेन चिन्तितं यत्—

प्रत्यासन्नेऽपि मरणे रक्षीपायो विधीयते।
उपाये (२) सफले रक्षा निष्फले नाधिकं मृते:॥

अपिच——

व्याधिना पीड्यमानोऽपि मार्य्यमाणोऽपि भूभुजा।
प्रत्यायाति यमद्वारात् प्रतीकारपरो नरः॥

चौर उवाच, रे रे घातकपुरुषास्त्रयश्चौरा युष्माभिर्हता एव राजाज्ञया। मां राजसम्बोधं (३) कृत्वा

---

१ सम्बर्द्धनं—सभाजनं पुरस्कारः। निवर्हणं हननं दण्डनं। दण्डनीतिः—राजनीतिः, Science of Government.

२ उपाये—उद्भाविते उपाये सफले सति रक्षा सङ्कटात् त्राणं भवति। निष्फले तु मृते: मरणात् अधिकं अधिकमष्टकरं किञ्चित् न भवति। यतः मरणादधिकं भयङ्करं न विद्यते खलु।

३ राजसम्बोधं कृत्वा—राजानं सम्बोध्य; राजानं किञ्चित् निवेद्य पश्चात् मां मारयत।

Digitized by Google

मारयत यतोऽहमेकां विद्यां महतीं जानामि, मयि मृते सा विद्या अस्तं यास्यति। राजा तु तां विद्यां गृहीत्वा मां मारयतु, विद्यैव मर्त्यलोके तिष्ठतु। घातका ऊचुः, रे चौर पाप (१) पुरुषाधम! वधस्थानमानीतोऽसि किमधुना जीवितुमिच्छसि, कथं वा भूपालेन तवाधमस्य विद्या ग्रहीतव्या?। चौर उवाच, रे घातकाः! किं ब्रूथ राजकार्य्यबाधं (२) कर्त्तुमिच्छथ। यदि राज्ञा विज्ञातव्या, तदा ग्रहीतव्या महतीयं विद्या। किञ्च विद्यावार्त्ताकथकेभ्यो युष्मभ्यं प्रभुणा प्रसादः कर्त्तव्यः। ततस्तस्य चौरस्य वचनैः स्वामिकार्य्यानुरोधेन सा वार्त्ता राज्ञे निवेदिता। राजा च सकौतुकं चौरमाहूयापृच्छत्, रे चौर! कां विद्यां जानासि? चौर उवाच, देव! सुवर्णकृषिं जानामि। राजोवाच, का परिपाटिः? (३) चौर उवाच,

---

४ रे चौर—रे चौर रे पाप, रे पुरुषाधम! रे इति पदं प्रत्येकं परामृश्यते। पापं अस्य अस्ति पापः तत्सम्बुद्धौ पाप। अर्श-आदित्वात् अस्यर्थे अ-प्रत्ययः।

४ राजकार्य्यबाधं—मयि मृतेऽपि भूलोके मदीयविद्या यदि तिष्ठति, तदा राज्ञ एव कार्य्यं साधितं भविष्यति। किन्तु यूयं तस्य प्रतिबन्धं कर्त्तुमिच्छथ।

५ परिपाटिः क्रमः कार्य्यानुष्ठानप्रणाली। process, method.

Digitized by Google

देव ! सर्षपपरिमाणानि सुवर्णवीजानि क्षत्वा भूमावुप्यन्ते, मासमात्रेण सर्षपसदृश्यएव कन्दल्यो(१) भवन्ति पुष्पन्ति च। तानि पुष्पाणि सुवर्णान्येव। रत्तिका (२) मात्रेण वीजेन पलसंख्यकानि भवन्ति, तद्देवः प्रत्यक्षं पश्यतु। राजोवाच, चौर ! सत्यमेतत् ? चौर उवाच, देवस्य पुरतः कस्यासत्यभाषणे शक्तिः ? यदि मम वचनं व्यभिचरति (३) तदा मासान्ते ममापि अन्तो भविष्यति। तदापि देवः शास्ति-प्रसादकरणे प्रभुरेव स्थास्यति। राजोवाच, भद्र ! वप सुवर्णम्। ततश्चौरः सुवर्णं दाहयित्वा सर्षपमात्राणि वीजानि क्षत्वा राजान्तःपुरक्रीड़ासरस्तटे परमनिगूढ़स्थाने भूपरिष्कारं क्षत्वा वभाषे। देव ! क्षेत्रवीजे सम्प्रति वप्ता (४) कश्चिद्दीयतां, राजोवाच, त्वमेव किन्न वपसि ? चौर उवाच, देव ! यदि सुवर्णवपने ममैवाधिकारोऽस्ति तदाऽनया विद्यया किमहं दुःखी भवामि। किन्तु चौरस्य सुवर्ण-वपनाधिकारो नास्ति, येन कदापि किमपि न

---

१ कन्दल्यः नवाङ्कुराः।

२ रत्तिका—रति इति भाषा। पलं—तोलकचतुष्टयं।

३ व्यभिचरति—विसंवदति मिथ्या भवति। proves false.

४ वप्ता—वपनकर्त्ता।

Digitized by Google

चोरितमस्ति स वपतु, देव एव किं न वपति। राजोवाच, मया चारणेभ्यो (१) दातुं तातचरणानां धनं चोरितम्। चौर उवाच, तर्हि मन्त्रिणो वपन्तु। मन्त्रिण ऊचुः, वयं राजोपजीविनः कथमस्तेयिनो (२) भवाम। चौर उवाच, तर्हि धर्म्माधिकारी (३) वपतु। धर्म्माध्यक्ष उवाच, मयापि बाल्यदशायां मातुर्मोदकाश्चोरिताः। चौर उवाच, यूयं सर्व्वेऽपि चौराः कथमहमेको वराको (४) मारणीयोऽस्मि। ततश्चौरवचनं श्रुत्वा सभासदः सर्व्वेऽपि जहसुः। राजापि हास्यरसापनीतक्रोधो विहस्याह, रे चौर! न मारणीयोऽसि। हे मन्त्रिणः! कुबुद्धिरपि बुद्धिमानयं चौरः हास्यरसप्रवीणः। ततो ममैव सन्निधाने तिष्ठतु, प्रस्तावैः (५) मां हासयिष्यति खेलयिष्यति (६) चेति स चौरो राज्ञा स्वसन्निधाने धृतः।

---

१ चारणेभ्यो: नटेभ्यः। २ अस्तेयिनः—अचौराः।

३ धर्म्माधिकारी—धर्म्मं अर्थिप्रत्यर्थिकृततर्कग्रन्थजातं परं विचारेण सत्यसंस्थापनरूपे न्यायनिरूपणे अधिकारी, प्राड्विवाक्। Judge.

४ वराकः—कृपणः दीनः। an object of pity.

५ प्रस्तावैः—कथाप्रसङ्गैः हास्यरसमयालापैरित्यर्थः।

६ खेलयिष्यति—मोदयिष्यति—entertain.

Digitized by Google

तथाहि——

न चौरादधनः कश्चित् सोऽपि दानेन विद्यया।
स्वल्पायं वसुचिन्त्य राजवल्लभतां गतः॥

कृपणकथा।

आसीन्मथुरायां गूढधनो नाम वैश्यः। स च कला-वाणिज्यादिभिः(१)बहुलीकृतवित्तः परमकृपणो बभूव। एकदा दुर्भिक्षे प्रत्यासन्ने सञ्जातभयो (२), ऽनुचिन्तितवान्, यदस्मिन् दुर्भिक्षे मम वित्तानि पुत्रकलत्रादिभिः खादितव्यानि, मया धनशोकेन मर्त्तव्यं, तत्र भद्रम्। यतः।

एकाकी पुरुषः श्रीमान् (३) धनं तस्य परं सुहृत्।
अन्ये चासुहृदः सर्वे धनमूलं कुटुम्बकम् (४)॥

तत् न अनागतापेक्षां (५) करोमि। परालब्धे

---

१ कला:—नृत्यादिका: चतुःषष्टिविधा उपविद्या:।

२ प्रत्यासन्ने सन्निहिते, सञ्जातभय:—सञ्जातं भयं धनक्षयाशङ्का यस्य तथोक्त:।

३ श्रीमान् लक्ष्मीवान्। पुरुषा हि निजभाग्यगुणेनैव लक्ष्मीवन्तो भवन्ति, परभाग्येन परानुकूल्येन च कस्यचिदपि धनं न जायते इत्यर्थ:।

४ कुटुम्बकं—कुटुम्बस्य भाव:। भावे कन्।

५ अनागतापेक्षां—अनागतस्य अनिष्टस्य प्रतीक्षां। अनिष्टं यदा

Digitized by Google

स्थाने वित्तानि धारयामीति परामृश्य तथा कृतवान्।

तथाहि——

हीनैरपत्यसम्बन्धैः(१)काकुभिः पापकर्म्मभिः।
कृपणो धनमादाय नीपयीगचमी भवेत् ॥

ततो दुर्भिक्षे चापतिते परीवारान् सर्वान् अन्नेन विना म्रियमाणान् पश्यन्नपि कस्मैचित् किमपि न ददौ। किञ्च परिवारैः कण्ठगतप्राणैर्याच्यमानः पद्यमिदं पपाठ।

कृपणस्य धनं प्राणास्तच्च प्रार्थयता मम।
प्राणाः किन्नैव गच्छन्ते धनशोकविवर्जिताः (२) ॥

अतस्तस्य पुत्रकलत्रादयः सर्व्वेऽपि विनान्नेनैव मृताः। स्वयञ्च प्राणमात्रावशेषः परामृष्टवान्।

यन्न पुत्रकलत्रेभ्यो दत्तं वित्तं मयार्ज्जितम्।
तन्निजप्राणरक्षार्थं कथं भोक्ष्ये निराकुलः ॥

ततः स्वप्राणरक्षायामपि वित्तं न विनियुङ्क्ते। उपवासेन दिनानि गमयन्तं तमतिदुर्ब्बलं दृष्ट्वा तन्न-

---

आपतिष्यति तदैव तस्य प्रतिविधानं करिष्यामि अधुना तावत् निश्चिन्तः तिष्ठामीति औदासीन्यं न अवलम्बे।

१ हीनैः अपत्यसम्बन्धैः तुच्छैः कृत्रिमपुत्रत्वादिसम्बन्धैः, अहं ते धर्म्मपुत्रः त्वं मे धर्म्मपिता इत्यादि कल्पितसम्बन्धैरिति भावः। काकुभिः चाटुवचनैः। उपयीगचमः भोगचमः।

२ धनशोकविवर्जिताः धनशोकशून्याः धनचयात् पूर्व्वं प्राणनाशे तु धनचयजनितः शोकः न स्यादेव। कृपणस्य धनं प्राणेभ्यः वरमित्यर्थः।

Digitized by Google

नगरवासिनः कार्षापिकाः पुरुषाः केऽपि प्रोचुः, हे कृपण ! किं करिष्यसि तेन धनेन, यस्मिन् विद्यमानेऽपि निजप्राणान् यास्यतोऽनुमन्यसे। अथवा उचितमेवैतत्। यतः—

अर्थं ने लभते चेदं चतौ शोकस्य विन्दति।
नाप्नोति कृपणो वित्ते दानीपयोगजं(१) सुखम्॥

गूढधन उवाच, भद्रे नगरवासिनः पुरुषाः ! मया प्राणव्ययेऽपि धनव्ययो न स्वीक्रियते। ते ऊचुः, तर्हि राज्ञा चौरेण वा गृहीतव्यं त्वयि विपन्ने तव धनम्। गूढधन उवाच, तदन्यस्यैव बुद्धिहीनस्य धनमस्ते गृह्णन्ति। मया स्वकीयं धनं गले बद्ध्वा मर्त्तव्यमित्यभिधाय धनपोट्टलकं गृहीत्वा गङ्गातीरे मर्त्तुं जगाम। तत्र च नाविकं धीवरमुपसर्प्याह, भो भ्रातर्नाविक ! अमी दुस्त्यजा मया, प्राणांस्त्यक्तुकामेनापि मया त्यक्तुं न शक्यन्ते। ततस्त्वं परिवारशोकाकुलं मां गङ्गायां मज्जयित्वा मारय। तदुपाधिना(२) तुभ्यमेकं सुवर्णखण्डं(३) दास्यामि। नाविक

---

१ दानीपयोगजं—दानं परोपभोगार्थं त्यागः, उपयोगः स्वसुखसाधनाय व्ययस्य ताभ्यां सुखं तेन। यद्वा दानेन य उपयोगः परानुकूल्यरूपः तेन यत् सुखम्।

२ तदुपाधिना—स मारणरूप उपाधिः कारणं तेन, तस्मात् मारणात् हेतोरित्यर्थः।

३ सुवर्णखण्डं—सुवर्णमुद्राम्।

Digitized by Google

उवाच, तर्हि मे सुवर्णखण्डं दर्शय। ततः सुवर्णानि सभयं दर्शयित्वा दिप्सया (१)ददर्श, दृष्ट्वा पुनरब्रवीत्, भ्रातर्नाविक! सर्व्वाणि सुवर्णानि दाहविशुद्धानि(२) परस्मै दातुमयोग्यानि, ततः पुण्यार्थमेव (३) मारय माम्। नाविकस्तु तानि सुवर्णानि दृष्ट्वा, पुण्यार्थमेव त्वां हनिष्यामीत्यवादीत्। ततस्तं जले मज्जयित्वा गतप्राणं कृत्वा सुवर्णानि गृहीत्वा स नाविकः कृतार्थो बभूव।

—•—

अलसकथा।

उद्योगहेतुरुत्साहः प्राणिधर्म्मो निगद्यते।
क्रियासु सर्व्वरूपासु(४) विना तेनालसो भवेत्॥

आसीन्मिथिलायां वीरेश्वरो नाम राजमन्त्री।

---

१ दिप्सया ददर्श—दानेच्छया सुवर्णानि ददर्श। दानात् पूर्व्वं सुवर्णमुद्राणां मध्ये कतमा देयेति ता उत्सुकदृष्ट्या ददर्श।

२ दाहविशुद्धानि अग्नौ दग्धत्वात् निर्म्मलानि।

३ पुण्यार्थं यदि वेतनं विना मां मारयित्वा उपकरोषि, तदा ते निःस्वार्थपरोपकरणात् पुण्यं भविष्यति।

४ क्रियासु सर्व्वरूपासु—सकलप्रकारासु स्नानाहारादिदैनिकेभ्यः अनायाससाध्येभ्यः कार्य्येभ्यः आरभ्य कृषिवाणिज्यराजसेवादिषु प्रयाससाध्येषु कार्य्येषु।

Digitized by Google

स च स्वभावाज्ञानशीलः(१) कारुणिकः सर्व्वेभ्यो दुर्गतेभ्योऽनाथेभ्यः प्रत्यहमिच्छाभोगं(२) दापयति, तन्मध्येऽलसेभ्योऽप्यन्नवस्त्रे दापयति। यतः—

निर्गतीनाञ्च सर्वेषामलसः प्रथमोमतः।
किञ्चिन्न क्षमते(३) कर्त्तुं जाठरेऽपि वह्निना॥

ततोऽलसपुरुषाणान्तत्रेष्टलाभं श्रुत्वा धूर्त्ता अपि कृत्रिममालस्यं दर्शयित्वा भोज्यं गच्छन्ति। एवञ्च अलसशालायां बहुद्रव्यव्ययं दृष्ट्वा तन्नियोगिपुरुषैः (४) परामृष्टं, यदत्यमबुद्धया करुणया केवलमलसेभ्यः स्वामी वस्तूनि दापयति। कपटेन अनलसा अपि गच्छन्तीत्यस्माकं प्रमादः। तदस्माद्दोषेण स्वामिधनं वृथाविनष्टं भवदस्तीति वयं प्रत्यवायिनः। यदि भवति,(५) तदाऽलसपुरुषाणां परीक्षां कुर्म्मः। इति परामृश्य निद्राणेष्वलसपुरुषेष्वलस-

---

१ स्वभावाज्ञानशीलः—स्वभावानां विचित्राणां मानवप्रकृतीनां अज्ञानं विवेकराहित्यं तत् शीलं यस्य सः। शिष्ट-दुष्ट-परिज्ञान-हीनः।

२ इच्छाभोगं—इच्छया इच्छानुसारेण भोगः तम्।

३ किञ्चिन्न क्षमते—किञ्चिदपि कार्य्यं कर्त्तुं न शक्नोति।

४ तन्नियोगिपुरुषैः तस्यां नियोगिनः कार्य्यदर्शिनः पुरुषाः कर्म्मचारिण इत्यर्थः।

५ यदि भवति—यदि एवं भवति। यदि काचित् बाधा न जायते इत्यर्थः।

Digitized by Google

शालायां ते नियोगिपुरुषा वह्निं दापयित्वा निरू-
पयामासुः। ततो गृहलग्नं प्रदहद्वह्निं दृष्ट्वा
धूर्त्ताः सर्व्वे पलायिताः। पश्चादीषदलसा अपि
पलायिताः। चत्वारः पुरुषास्तत्रैव सुप्ताः परस्पर-
मालपन्ति। एकेन वस्त्रावृतमुखेनोक्तं, अहो कथ-
मयं कोलाहलः? द्वितीयेनोक्तं, तर्क्यते यदस्मिन्
गृहेऽग्निर्लग्नोऽस्ति। तृतीयेनोक्तं, कोऽपि तथा
धार्म्मिको नास्ति, य इदानीं जलार्द्रैर्व्वासोभिरस्मान्
आवृणोति। चतुर्थेनोक्तं, अये वाचालाः! कति
वचनानि वक्तुं शक्नुथ, तूष्णीं न तिष्ठथ। तत-
स्तृतीयमपि तेषामेवं परस्परालापं श्रुत्वा वह्निञ्च
प्रदहमेषामुपरि पतिष्यन्तं दृष्ट्वा नियोगिपुरुषैर्भयेन
चत्वारोऽप्यलसाः केशेष्वाकृष्य गृहाद्बहिः क्षिप्ताः।
पश्चात्तानालोक्य तैः पठितम्।

पतिरेव गतिः स्त्रीणां बालानां जननी गतिः।
नालसानां गतिः क्वापि स्त्रीके कारुणिकं विना॥

वञ्चककथा।

आसीत् गोदावरीतीरे विशाला (१) नाम

---

१ विशाला—is another name of Ujjayiní, but here a different city is meant.

Digitized by Google

नगरी। तस्याञ्च समुद्रसेनाभिधानो राजा बभूव। तस्य पुत्रं चन्द्रसेननामानं शुद्धहृदयं (१) दृष्ट्वा तन्नगरवासिना वञ्चकेन केनापि वणिजा चिन्तितम्।

यतः—

आर्द्रभूलस्य खगा भक्ष्या नागा एव गरुत्मतः।
असाधोः साधवीभक्ष्याः श्येनश्येवेतरे खगाः॥

साधुप्रकृतिः कुमारः निश्चितं मम सुखग्राह्यधनो (२) भविष्यति, तदेनं उपसर्पामीति परामृश्य स वणिक् तं राजकुमारं सिषेवे। विश्वाफलप्राया (३) दुर्ज्जनस्य प्रकृतिः परिणामविरसाप्यापातसुरसा भवति। तया प्रकृत्या तं कुमारं सेवमानः सेवया वशमानीतवान्। ततः स वञ्चकश्चिन्तयामास, यदेनं केनाप्युपायेन देशान्तरं नीत्वा अस्य द्वारा राजकोषसारभूतानि रत्नानि हरामि। ततश्च विश्रम्भप्रस्तावे (४) कुतूहलप्रस्तावे च देशान्तरकथां श्रवण-

---

१ शुद्धं आर्जवयुक्तं हृदयं चित्तं यस्य तथोक्तं, सर्व्वत्र विश्रम्भपूर्णम्।

२ सुखेन ग्राह्यं धनं यस्य सुखग्राह्यधनः।

३ विश्वाफलप्राया—प्रायेण तिन्तिड़ीफलतुल्या। परिणामविरसा चरमे क्लेशकरी। आपातसुरसा तत्कालरम्या। तिन्तिड़ी—भोजनकाले स्वादुरपि परिणामे पीड़ाकरी। तथाच भिषजामाभाणकं "तिन्तिड़ी यमदूतिका"।

४ विश्रम्भप्रस्तावे—विश्रम्भः विश्वासः परस्परहृदयोद्घाटनं तेन यः

Digitized by Google

रमणीयां मुहुः कथयति। तत्कथाश्रवणरसिकं(१) विदित्वा स वणिगुवाच, कुमार! यौवराज्येऽपि वर्त्तमानस्य भवतो नित्यसुलभाभिरुपभुक्तैरेव भोग्यवस्तुभिः कुतः सुखं? सुखन्तु देशान्तरे सम्भवति, यत्र प्रत्यहमदृष्टदर्शनमभुक्तभोजनमननुभूतानुभवश्च जायते। चन्द्रसेन उवाच, सखे! महती ममोत्कण्ठा विद्यते, कथं देशान्तराणि द्रक्ष्यन्ताम्। वणिगुवाच, भारलघुना गुरुमूल्येन धनेन निर्वहति देशान्तरदर्शनम्। यदि मनः स्थिरं भवति, धनं भवतो राजकुमारस्य विद्यत एव, मनः परं स्थिरीक्रियतां कुमारेण। कुमारोऽवदत्, सखे! मनःस्थैर्यं कृतम्। वञ्चको ब्रूते, यदि कथेयमन्यकर्णपथगामिनी(२) न भवति, परतर्कविषयश्च न भवति, तदा निर्व्वहति कार्य्यम्। कुमारोऽब्रवीत् न तर्कणीयं केनापि। तत-

---

प्रस्तावः कथाप्रसङ्गः तस्मिन् विश्रम्भालापे इत्यर्थः। कुतूहलप्रस्तावे—कौतूहलात् प्रारम्भे परस्परालापे।

१ श्रवणरसिकं—श्रवणे रसिकं अनुरागिणम्। रसः रागः।

२ अन्यकर्णपथगामिनी—अन्येषां कर्णपथं श्रवणगोचरं न गच्छतीति। अन्यैः न श्रूयते इत्यर्थः। परतर्कविषयः परेषां तर्कविषयः अनुमानेन उन्नेतव्यः। परैर्न उद्भाव्यते इत्यर्थः।

Digitized by Google

स्तथा देशान्तरसाभिलाषं (१) कुमारं तथाविधधन-समेतमाखेटकव्याजेन (२) नीत्वा चलितः स वणिक्। कियतो दूरात् सैन्यं परावर्त्य वराश्वारूढौ कुमारौ द्वावेतौ काञ्चिद्दिशमुद्दिश्य जग्मतुः। ततो दूरगमन-परिश्रान्तौ क्षुत्पिपासापराभूतौ क्वचिदरण्ये जला-शयसन्निधाने महावृक्षमेकं ददृशतुः। तस्य छायायां द्वावपि तुरगादवतेरतुः। कुमारस्तु कृतजलपानः परमसुखी छायामासाद्य तृणशय्यायां निद्राणो बभूव। अथ तेन वञ्चकेन चिन्तितं, यत् मम कृत्यस्यायमेवाव-सरः। ततः पादसंवाहनं (३) कुर्वाणेन दुरात्मना तं गाढ़निद्रं विदित्वासौ लताभिर्ब्बबन्धे। तदनन्तरं तस्य हृदयमारुह्य शस्त्रमादाय चक्षुषी स्फाटितवान्। यावदसौ कुमारः, सखे! परित्राहीति वदति, तावदेष वञ्चकः कृतकर्म्मा धनं तुरगद्वयञ्चादाय पलायितः। कुमारश्च तत्रारण्ये कृतार्त्तनादो रुरोद। रुदं-श्चक्षुर्व्वेदनया निर्दयनिक्षिप्तहस्तपादः (४) स्फुटितबन्धो

---

१ देशान्तरसाभिलाषः अन्यदेशः देशान्तरं, अभिलाषेण सह साभि-लाषः, देशान्तरे साभिलाषः विदेशभ्रमणानुरागीत्यर्थः।

२ आखेटकः मृगया स एव व्याजः छलं तेन।

३ संवाहनं मृदुमर्द्दनं तच्च वेदनानिरासार्थं गाढ़निद्रानुकूलञ्च।

४ निर्दयं सबलं यथा तथा निक्षिप्तं चालितं हस्तपादं येन तथोक्तः,

Digitized by Google

बभूव। परिश्रान्तो निःसत्वो(१)निष्क्रियश्च भूमौ निपपात। तत्र ह्रदे कश्चिद्दृढशुको वसति। तस्य द्वौ पुत्रौ महाशुकौ सञ्चरणासमर्थस्य प्रत्यहमाहारमानीय प्रयच्छतः। तदाच तौ ह्रदशुकं पितरं भोजयित्वा कथयामासतुः, पितः! अद्यावाभ्यां नर्म्मदातीरे महदपूर्व्वं कष्टस्थानञ्च दृष्टम्। ह्रदशुक उवाच, किं तदपूर्व्वं किंवा कष्टस्थानञ्च दृष्टम्? महाशुकौ कथयतः, यत् तत्र यूथिकापुरे नगरे नीलरथनाम्नो भूपालस्यैक एव पुत्रश्चित्ररथनामधेयः, स चान्धो वैद्यजनसेव्यमानोऽप्यन्धतां न मुञ्चति। तेन(२) रात्रौ निर्दीपं गृहमिव तत्राद्य महत् कष्टस्थानं दृष्टमावाभ्याम्। ह्रदशुक उवाच, पुत्रौ! नष्टचक्षुषश्चक्षुर्व्वलाय भेषजं विद्यते, किन्तु तत् भिषजो न जानन्ति। तावूचतुः, तात! किन्तद्भेषजम्? ह्रदशुकः कथयति, एतस्यैवतरोः कुसुमेन शुष्केणार्द्रेण वा यदि अञ्जनं क्रियते, तदा नष्टचक्षुश्चक्षुष्मान् भवति। तदाकर्ण्य कुमारश्चिन्तयामास। अहो! विधिरनुकूलो दृश्यते, यत्

हस्तौ च पादौ च एतेषां समाहारः हस्तपादम्। स्फुटितः छिन्नः बन्धो येन तथोक्तः।

१ निःसत्वः बलहीनः। निष्क्रियः निश्चेष्टः।

२ तेन—तेन हेतुना।

Digitized by Google

विहगानां परस्परं चक्षुर्भेषजप्रस्तावना जाता ; भेषजमपि सुलभमिदानीम् । तदस्य वृक्षस्य पुष्पेण चक्षूरञ्जनमाचरामि तावत् । पश्चात् कुमारेण तथा कृतम् । प्रथमाञ्जनेन चक्षुषि वेदना शान्ता । द्वितीयाञ्जनेन तारा जाता । तृतीयाञ्जनेन प्रकृष्टा दृष्टिर्ब्भूव । ततः परमहृष्टः कुमारश्चिन्तयामास, यत् इदानीमसत्सेवोजनिता विपत्तिस्तीर्णा । अथ किं विधेयमस्ति ? अनया दुर्हृदया यदि पुनर्गृहं गम्यते, तदन्येषामुपहासस्थानमात्मनो दैन्यं भवति। कार्पण्यन्तु (१) मरणादपि निन्दितं, तदितो गृहं न यास्यामि । परं उपलब्धानुभावमिदमेव (२) भेषजं नीत्वा यूथिकापुरं गच्छामि, तं चित्ररथं राजकुमारं सलोचनं करवाणि । तेनैव तस्य पिता नीलरथो मम कामनां पूरयिष्यतीति परामृश्य भेषजमादाय स कुमारः पन्थानं पृच्छन् कियतापि कालेन यूथिकापुरं जगाम । नीलरथस्य दर्शनं विधाय तत् पुत्रं चित्ररथं चक्षुष्मन्तं चकार । अथ राजा परितुष्टस्तं सर्व्वं पप्रच्छ । तस्य कथया गुणेन शीलेन

---

१ कार्पण्यं—दैन्यं ।

२ उपलब्धानुभावं—उपलब्धः ज्ञातः अनुभावः प्रभावी वीर्य्यं यस्य ।

Digitized by Google

च (१) तदीयकुलं ज्ञात्वा चित्ररथकनीयसीं चित्र-
सेनानाम्नीं निजदुहितरं विवाहविधिना चतुर्थ-
भागराज्यसमेतां तस्मै ददौ। ततः प्रभृतिचन्द्रसेन-
चन्द्राननया प्रियया सह निष्कण्टकं राज्यसुखमनु-
भवति। एकदा च कस्मिन्नप्युत्सवसमये चन्द्रसेनः
राज्ञो नीलरथस्य श्वशुरस्यागारं गच्छन्कस्मात्
पथिकं वञ्चकनामानं वणिजमागच्छन्तं ददर्श। दृष्ट्वा
तुरगादवततार तमालिङ्गितुं। वञ्चकस्तु तं परि-
चित्य कथमत्रापि स एव कुमार इति पलायाञ्च-
भूव। पलायमानन्तु पदातिभिरानीय कुमारस्तं
वणिजमालिङ्ग्य पप्रच्छ, मित्र! कुशलं? वणिजा
किमपि न बभाषे, कुमारस्तु मित्रलाभहृष्टो राज-
कुलगमनं (२) परिहृत्य तेन वणिजा सह निजगृह-
मागत्य रहस्युपविष्टः उवाच, मित्र! कथय वार्त्तां,
तथालब्धधनोऽपि कथमित्थं दुरवस्थोऽसि। वञ्चक
उवाच, कुमारवणिग्हं स्वभावलुब्धस्तेन भवदीय-
धनेन वाणिज्यार्थं वहित्रमारुह्य समुद्रपारं गतोऽस्मि।

---

१ शीलेन—सत्स्वभावेन। शीलं स्वभावे सद्वृत्ते इत्यमरः।

२ राजकुलगमनं—राज्ञः कुलं गृहं तत्र गमनम्।

Digitized by Google

तत्र शतगुणं (१) वाणिज्यमभूत् तस्मादागच्छतो मम तटान्तनिकटे (२) समुद्रे वहित्रं निममज्ज, धनानि विनष्टानि। प्राणावशेषोऽहमागतोऽस्मि, प्राघार्णम सापराधस्य गृह्यतां कुमारः। चन्द्रसेन उवाच, मित्र! न भेतव्यं, त्वं मम मित्रमसि यावज्जीवपरिपालनीयाहि सतां मैत्री वित्तं विनष्टं, तत्र चिन्तां न करिष्यसि। तदधिकमपरं वित्तं ते दास्यामि। वणिगुवाच, कुमार! नेदं प्रत्येति स्वापराधकलुषितं मे हृदयम्। यतो मम न कोऽपि त्वयि मिथानुरागः कथं पुनः प्रसीदति भवान्। चन्द्रसेन उवाच, ममायत्तं ममैव कर्म्म भवति, तव त्वहं कः(३)? तत् श्रुत्वा कलत्रः सानुतापः कम्पमानः पाषाणमयकुट्टिमे पपात च ममार च स वणिक्। कुमारस्तन्मरणदुःखेन भृशतरं रुरोद। तं रुदन्तं स्वामिनं दृष्ट्वा चित्रसेनाब्रवीत्, नाथ! कोऽयं कस्मादागतः,

---

१ शतगुणं—शतगुणलाभयुक्तं, वाणिज्येन मूलधनं शतगुणं वर्द्धितमभूत्।

२ तटान्तनिकटे—तटस्य समुद्रतीरस्य अन्तः प्रान्तः पुलिनं तस्य निकटे समीपे।

३ तव त्वहं कः—अहं पुनः तव कार्य्याकार्य्येषु न नियन्ता नापि फलभोक्ता इत्यर्थः।

Digitized by Google

कस्मान्मृतः, कुतो भवानित्थं करुणापराधीनो रोदिति ? चन्द्रसेन उवाच, प्रिये ! पुरानेन महती अनुकम्पा कृता, यतो धनापहारकेणापि स्वायत्ति-पतितोऽपि (१) समूलघातं न हतोऽस्मि। चित्र-सेनावदत्, सोऽप्यप्रमादो नतु ज्ञानपूर्व्वको व्यापारः। चन्द्रसेन उवाच, तथापि महानेवायं, यतो लज्जया पूर्व्ववृत्तं स्मृत्वेदानीमपि मुमोह। तथाहि——

सलज्जः पुरुषः श्राव्यः कापथेऽपि (२) व्रजन् क्वचित्।
खज्जाहि जायते पुंसो नाकुलीनस्य (३) मानसे॥

ततः स राजकुमारस्तस्य वणिजस्तत्सजातीय-द्वारा संस्कारमौर्द्ध दैहिकञ्च(४)कारितवान्, वञ्चकस्त-थापि निजव्यापारफलमैहिकमयशः पारलौकिकञ्च नरकमासादितवान्।

---

१ स्वायत्तिपतितः—स्वस्य निजस्य आयत्यां चलतायां पतितः। तदधीन-जीवन-मरणः।

२ कापथेऽपि व्रजन् क्वचित्—कथंचित् कुत्सितमार्गे विचरन् अपि कुशब्दस्य कादेशः।

३ अकुलीनस्य—कुले सत्कुले भवः कुलीनः, तस्य सदंशजातस्य गुणवत इत्यर्थः। तद्विपरीतस्य अकुलीनस्य।

४ और्द्धदैहिकं—देहात् ऊर्द्धं नाशात् परं कर्त्तव्यं, श्राद्धतर्पणा-दिकं। संस्कारं-सत्कारं दाहनादिकं।

Digitized by Google

चौरकथा ।

आसीदुज्जयिन्यां पुरि विक्रमादित्यो नाम राजा। सचैकदा चौरव्यापारदर्शनकुतूहली रङ्कवेशं(१) परिगृह्य निजनगर एव देवतायतनसन्निधाने तस्थौ। तत्र च तमस्विन्यां (२) रात्रौ निशीथभागे चत्वारश्चौराः समागत्य मन्त्रयामासुः, यदिदं गृहादानीतमन्नमत्र भुङ्क्त्वा प्रहृष्टबलाः पुरं प्रविशामः। विक्रमादित्य उवाच, तदुच्छिष्टं मह्यं दास्यथ? चौराः सवितर्कमाहुः (३), अहो कस्त्वम्? राजोवाच, रङ्कोऽहं क्षुधाकुलितो गन्तुमसमर्थः पतितस्तिष्ठामि। चौरा ऊचुः, हुं नगरपथपरिशोधनसमये दिवाप्यस्माभिर्दृष्ट एवायमत्र। रे रङ्क! कथमिदानीमप्यत्रैव तिष्ठसि? राजोवाच, देवयात्राप्रवृत्तं(४) लोकमुद्दिश्य भिक्षार्थमहमागतोऽस्मि, कुत्रा-

---

१ रङ्कवेशं—दरिद्रवेशं। २ तमस्विन्यां—कृष्णपक्षीयत्वात् अन्धकारवत्यां; निशीथभागे अर्द्धरात्रे।

३ सवितर्कं—सविचारं ससन्देहं। Suspeciously.

४ देवयात्राप्रवृत्तं—देवस्य कस्यचित् यात्रायां उत्सवे प्रवृत्तं। उज्जयिन्यां महाकालनाम्नः महादेवस्य लिङ्गं प्रतिष्ठितं आसीत्। तस्य उत्सवकाले महती घटा बभूव। भवभूतिसमकाले तत्प्रणीतानि नाटकानि तत्र अभिनीतानि आसन्।

Digitized by Google

न्यत्र यास्यामि, भिक्षामनासाद्य बुभुक्षितस्तिष्ठामि। चौरा ऊचुः, यदि तुभ्यमुच्छिष्टं दास्यामः, तदा किं पुनः प्रयोजनं करिष्यसि? राजोवाच, तुङ्गं तुङ्गं धनिकगृहं दर्शयिष्यामि, चोरितवस्तुभारञ्च वोढास्मि। चौरा ऊचुः, ततस्तिष्ठ गृहाणोच्छिष्टमन्नम्। ततः कृतभोजनैश्चौरैर्दीयमानमुच्छिष्टमन्नं कर्परे कृत्वा वेतालेनापहारयन् राजोवाच, अद्याहं कृतार्थोऽस्मि युष्माकं प्रसादेन। ततस्तेषां मध्ये सरीसृपनामा चौरोऽब्रवीत्, यदहं शाकुनिकशास्त्रे (१) कृतश्रमोऽस्मि, ततः शृगालाः किं वदन्तीति जानामि। इतरे ऊचुः, जानीहि। सरीसृप उवाच, सखायः! श्रूयतां युष्माभिः। शृगालो वदति, अस्माकं मध्ये चत्वारश्चौराः एको राजाऽस्तीति। चौरा ऊचुः, चत्वारोऽपि चिरपरिचिता एव पञ्चमोऽसौ रङ्कः। दिवापि दृष्टोप्यत्रैवोच्छिष्टग्राही दृश्यते। ततोहि कुतोऽत्र राजशङ्का। सरीसृप उवाच, शृगालभाषितं मिथ्या न भवति। इतर ऊचुः,

---

१ शाकुनिकशास्त्रे—अत्र शाकुनिकशास्त्रमिदं पदं पशुपक्षिभाषितपरिज्ञाने वर्त्तते। पशुपक्षिणां ध्वनिश्रवणेन गतिविगतिजातिपङ्क्तिप्रभृतिदर्शनेन च भाविशुभाशुभगणनमपि शाकुनिकशास्त्रस्य विषयः।

Digitized by Google

प्रत्यक्षबाधितेऽर्थे (१) का श्रद्धा। ततः पश्चापि पुरुषाः प्रविविशुः। पुरपतिगृहे (२) सन्धिं कृत्वा बहूनि धनानि चोरयित्वा नगराद्बहिरागत्य गर्त्ते चिक्षिपुः। चौराश्चत्वारोऽपि सरसि कृतस्नानाः पुनर्नगरमागत्य मदिरागृहं विविशुः। राजा च स्वकीयमगारमाजगाम। तदनन्तरमास्थानमण्डपे (३) सर्व्वावसरं कृत्वा सिंहासनोपरिस्थितः दण्डनायकमाहूयादिदेश (४) अये परलक्षक! (५) त्वमाज्ञापालोऽपि न जानासि किमपि रात्रिचरित्रम्?

---

१ प्रत्यक्षबाधितेऽर्थे—प्रत्यक्षप्रमाणविरुद्धे वस्तुनि।

२ पुरपतिगृहे—पुरस्य पतिः शासने अधिकृतः राजपुरुषविशेषः। At the house of the governor of the city. सन्धिं दीर्घबिलं, सुरङ्ग इति भाषा।

३ आस्थानमण्डपे—सभागृहे। सर्व्वावसरं सर्व्वेभ्यो राजकार्य्येभ्यः अवसरं कृत्वा निवृत्तो भूत्वा इत्यर्थः। Refraining from all other work.

४ दण्डनायकं—शान्तिरक्षकं, कोटाल इति भाषा।

५ परलक्षकः—परान् विपक्षान् शान्तिनाशकान् लक्षयति यः सः। अत्र नामविशेषः। आज्ञापालोऽपि—सदाज्ञानुसरणे अधिकृतोऽपि। रात्रिचरित्रं—रात्रिसम्भूतघटनां, रात्रौ यत् चौर्य्यादिकमनिष्टमापतति तदपरिज्ञानात् सदाज्ञापालनाम्ने प्रमादी दृश्यते, तच्च शान्तिरक्षकस्य ते महत् स्खलनं इति तात्पर्य्यार्थः।

Digitized by Google

गच्छ तावदिदानीं चत्वारश्चौराः पिष्टिलनाम्नः शौण्डिकस्य (१) गृहे मद्यं पिबन्तः सन्ति, तानिह शृङ्खलबद्धान् कृत्वा सत्वरमानय। दण्डपाणिस्तु राजानं प्रणम्य गत्वा तथा कृतवान्। राजोवाच, रे रे मम सखायश्चौराः! परिचिनुथ माम्? चौरऊप उवाच, देव! मया तदैव परिचितो भवान्, किन्तु मे सखायः परमदुष्टाः शृगालस्यापि कथितमतथ्यं निर्धारितवन्तः, किमहं करोमि। सखिवचनैः प्रमत्तोऽस्मि। तथाहि——

एक एव हि नीतिज्ञः कर्म कृत्वा सुखी भवेत्।
बहूनपेक्षमाणस्य स्थानात् (२) प्रच्यवते मतिः॥

अपिच——

ज्ञातश्चारोऽपि (३) शूरोऽपि पण्डितोऽपि क्रियोद्यतः।
निमज्जति महाराज बहूनां मतिकर्दमे॥

राजोवाच, रे चौराः! परोपदेशग्रहणजं निज-प्रमादं शोचथ; स्वज्ञानदोषजं कथं न शोचथ?

---

१ शौण्डिकस्य शुल्काकारिण वक्तव्यविशेषेण मद्यपचनात् शौण्डिकः। शुल्क+इक।

२ स्थानात् प्रकृतकार्यात् ईप्सितलक्ष्यात्।

३ ज्ञातश्चारः ज्ञाततत्त्वः; यः कर्त्तव्यार्थस्य स्वरूपं ज्ञातवान्। बहूनां मतिकर्दमे बहूनां परस्परविरुद्धभाषिणां मतिकर्दमे विभिन्नमतिरूपे पङ्के इत्यर्थः।

Digitized by Google

चौरा ऊचुः, कोऽस्माकं ज्ञानदोषजन्मा प्रमादः(१) ? राजोवाच, स्फुट एवाच युष्माकं प्रमादोऽस्ति, यद्वीरवृत्तिसमर्थोऽपि(२) चौरवृत्तिं समाश्रयथ। चौरा ऊचुः, देव ! दुर्मतिरेवाच कारणम्। राजोवाच, यद्येवं स्वीकुरुथ, तदा किं न त्यजथ। चौरा ऊचुः, देव ! दरिद्रता तत्परित्यागस्य प्रतिबन्धिका। राजोवाच, यत् युष्माकं सख्यमालम्ब्य क्षणमहं चौरतां गतोऽस्मि, तत् कथं यूयं मम सख्येन राजतां (३) न यास्यथ ? तदग्रेऽपि परिहरिष्यथ दुर्मतिमिमाम्। चौरा ऊचुः, कथं न त्यक्ष्यामः। राजोवाच, इदानीं गृह्यलब्धा यूयं किंवा न स्वीकरिष्यथ। तथाहि——

आक्रमे (४) पतिता दृष्टा जिह्वायगतया गिरा।
दूषणं के न मुञ्चन्ति के न गृह्णन्ति वा गुणम्॥

अथवा पुनर्यदि कुवृत्तिं करिष्यथ, तदा

---

१ ज्ञानस्य दोषाः भ्रमसंशयमीहादयः तेभ्यः जन्म यस्य सः।

२ वीरवृत्तिः—वीरजनोचिता वृत्तिः युद्धादिका ; कृषिवाणिज्यादिका स्वाधीना निर्दोषा वा वृत्तिः।

३ राजतां—राज्ञीभावः राजता राजवत् ऐश्वर्यमित्यर्थः।

४ आक्रमे क्षमतायां पतिताः आयत्तीकृता इत्यर्थः। के दृष्टा जना जिह्वायगतया जिह्वायेव उच्चार्यमाणया गिरा वाक्येन दूषणं दोषं न मुञ्चन्ति न त्यजन्ति ; न वा गुणं गृह्णन्ति अवलम्बन्ते। वाक्यमात्रेण दोषत्यागः गुणपरिग्रहस्य सुकरः, कार्यतस्तु दुष्कर एव इत्यर्थः।

Digitized by Google

पुनरिमामेव दशां प्राप्स्यथ, इत्यभिधाय पुरपतिधनं पुरपतये दापयित्वा स राजा चौरान् मुमोच। तेषां मध्ये सरीसृपनामानं चौरं शाल्मलिपुरे(१) राजानं चकार, तदितरचौरान् काञ्चनेनैवाऽदरिद्रीकृत्य करुणया कुतूहलेन च प्रस्थापयामास। ततः कियता कालेन राज्ञा चिन्तितं, यत् सरीसृपो राजत्वं प्राप्य किमिदानीं समाचरतीति मया निरूपणीयं भवति। यतः——

दुर्ब्बलस्य गुरुर्भारी दुष्टाग्नेर्गुरुभोजनम्(२)।
राज्यं गुरु च दुर्ब्बुद्धेः परिणामसुखं कुतः॥

ततः स राजा सुचेतनं नाम चारपुरुषं प्राप्तराज्यस्य तस्य चरित्रनिरूपणाय प्रस्थापयामास। चरस्तु तत्राधिगतसर्व्ववृत्तान्तः पुनराजगाम। राजोवाच, सुचेतन! कथय वार्त्ताम्। चर उवाच, देव! भवतः पथ्यमपथ्यमिति नहि विचारयामि,

---

१ शाल्मलिपुर—a city in the continent of Sálmali; one of the seven dvipas, which is imagined to be surrounded by the sea of clarified butter. Sálmali is also the name of a river in the infernal regions, so that Sálmalipura may mean a city situated on the bank of the river Sálmali.

२ दुष्टाग्नेः मन्दाग्नेः उदरामयग्रस्तस्य। गुरुः दुर्व्वहः दुःसहः।

Digitized by Google

किन्तु तथ्यं कथयामि । अलीकभाषणं नोचितं चार-पुरुषस्य । तथाहि——

काणेन चक्षुषा जन्तुर्यथा किञ्चिन्न पश्यति ।
न पश्यति तथा राजा चारेणानृतभाषिणा ॥

तदहं यथा दृष्टं तच्चरितमुपवर्णयामि, शृणोतु देवः ।

एकस्मै कृपया तस्मै राज्यं दत्वा दुरात्मने ।
परानिष्टप्रवीणाय (१) बहूनां विपदः कृताः ॥
स दुर्वृत्तः पुराप्यासीत् समर्थो (२) भवता कृतः ।
दुर्वृत्तस्य समर्थस्य किन्नाम न करिष्यति ॥
कृपाक्षिप्तचित्तेन (३) भवतापि महात्मना ।
दुर्गतिः स्खलिता तस्य प्रकृतिस्तु न स्खलिता ॥
यशः पुण्यं सुखञ्चेति त्रयं राज्यतरोः फलम् ।
तच्चानाप्नुवतस्तस्य किं राज्येन प्रयोजनम् ॥
साधूनां हरते द्रव्यं हन्ति मानं मनस्विनाम् ।
निजसौकर्य्यलोभेन (४) किमकृत्यं दुरात्मनः ॥

---

१ परानिष्टप्रवीणाय—परेषां अनिष्टे प्रवीणः पटुः तस्मै ।

२ समर्थः शक्तियुक्तः परेषां निग्रहानुग्रहयोः क्षमः ।

३ कृपाक्षिप्तचित्तेन—कृपया क्षिप्तं स्खलितं आयत्तं चित्तं यस्य तेन । अनुकम्पापरतन्त्रमनसा इत्यर्थः ।

४ निजसौकर्य्यलोभेन—निजं यत् सौकर्य्यं सुविधा सुखस्वच्छन्दादिकं तस्मिन् लोभः लालसा तेन ।

Digitized by Google

नावसीदति पापेन लज्जते नापकर्मणा ।
न तृप्यति परस्वेन घस्मरस्य (१) कुतोघृणा ॥
ब्रवीति चौरवृत्त्याहं (२) गतोऽस्मि राजतां यया ।
त्यजामि केन दोषेण तामात्महितकारिणीम् ॥
स्वयं कृतानि (३) कर्म्माणि स्वयमेव विलुम्पति ।
तृष्णोपप्लुतचित्तानां स्थैर्य्यमङ्गीकृते कुतः ॥

राजोवाच, सुचेतन एभिः पद्यैस्तस्य दुरात्मनश्चरितं विदित्वा स्वस्थोऽहं तृप्तोऽस्मि, मन्ये ममापि दुरकीर्त्तिरेवेयम् (४)। ततो विक्रमादित्येन प्रच्छन्नवेशधारिणा चौरस्य राज्यं गत्वा चरवचनं परीक्षितं, पश्चाच्चौरोऽपि राजपदादवतार्य्य पूर्व्वामेव दशां प्रापितो हतश्च ।

---

१ घस्मरस्य भक्षकस्य उपघातकस्य सर्व्वनाशकस्य इत्यर्थः । घस भक्षणे, तस्मात् करः । घृणा दया, परक्लेशासहनं ।

२ चौरवृत्त्या—चौरव्यवसायेन । तां चौरवृत्तिं ।

३ स्वयं कृतानीति—यानि कार्य्याणि तेन चौरराजेन स्वयं कृतानि, तानि स स्वयमेव विलुम्पति अपलपति ; यद्वा विपरीताचरणेन तानि निष्फलानि करोति इत्यर्थः ।

४ दुरकीर्त्तिः—दुर् दुष्टा अकीर्त्तिः, महती अकीर्त्तिः ।

Digitized by Google

सत्यवीरकथा* ।

पुरा हस्तिनापुरनाम्नि (१) नगरे महामल्लनामा यवनेश्वरो बभूव। तस्मिन्नाससमुद्रं धरणिवलयं शासति तदुत्कर्षासहिष्णुः कार्फरराज(२)स्तमभियोद्धुं सकलबलसहितस्तत्राजगाम। यवनेश्वरस्तमायान्तं श्रुत्वा काम्बोज(३)सुरक्तैराखारोहैः बहुभिर्बलैः परिवारितः पुराद्बहिर्भूय तेन समं संग्राममकरोत्। तदुभयवर्गसमारब्धे संग्रामे बलीयसा कार्फरराजसैन्येन हन्यमाना यवनयोधा रणात् पराङ्मुखा बभूवुः। ततः सिंहभयार्दितमिव करि-

---

* वीरश्चतुर्विधः, सत्यवीरः दानवीरः युद्धवीरः दयावीरश्च। तत्र युधिष्ठिरादयः सत्यवीराः वलिप्रभृतयः दानवीराः भर्ज्जुनादयः युद्धवीराः जीमूतवाहनादयः दयावीराश्च।

१ हस्तिनापुर—The capital of the Kauravas and Pándavas, the remains of which still exist about 57 miles to the north-east of the modern city of Dehli, on the bank of the old channel of the Ganges. It was founded by Hastin, a King of the Lunar line.

२ कार्फर—is a corruption of Africa

३ काम्बोज—This name is applid to the people of the north-western corner of India ; the country was noted for the breeding of horses

Digitized by Google

यूथं पलायमानं निजबलं दृष्ट्वा यवनेश्वर उवाच, रे रे मम सैन्यस्वभटा(१) राजानो राजपुत्राश्च ! युष्माकं मध्ये कोऽपि तथा नास्ति, य इदानीं रिपुभयभग्नं मम सैन्यं स्वेन बाहुबलेन क्षणमवलम्बते ? तच्च यवनराजवचनं श्रुत्वा कर्णाटकुलसम्भवो(२) नरसिंह-देवनामा चौहानकुल (३) सम्भवश्चाचिकदेवनामाच राजकुमारौ प्रोचतुः, राजन् ! क इदानीं निजाभिमुखं पततः पाथसइव रिपुत्रासभग्नस्य भवद्बलस्य निवर्त्तयिता भवति, यदि क्षणं पराङ्मुख्य भवान्

---

१ सैन्यस्य स्वभटाः स्वपक्षीययोधाः सैन्यान्तर्गतयोधा इत्यर्थः ।

२ कर्णाट—The modern Karnatic; the name however was anciently applied to the central districts of the peninsula, including Mysore.

३ The Chouháns are one of the Agnikulas, who are divided into four tribes, the Pramaras, the Pariharas, the Cháluks, and the Chouháns. The last mentioned tribe was the most valiant of all, the name meaning the "four-handed warrior." The genealogical tree of the Chouháns exhibits 39 princes from Anhub, the first celebrated Chouhán, down to Prithvírája, the last of the Hindu emperors. The Chouháns sent forth twenty four branches, of whom, the most celebrated are the existing families of Boondi and Kotah.

Digitized by Google

अवलोकयति, तदा आवामेव भवतो विपक्षं खड्ग-धाराप्रहारपरिचितं करवावः। यवनेश्वर उवाच, साधु कुमारी साधु युवाभ्यामन्यः क एतादृशं व्यवस्यति ? ततो नरसिंहदेवः कुलिशपातानुकारिणा कषाघातेन तुरगं त्वरयित्वा परावृत्याऽतर्कित एव कार्फरवलं प्रविवेश, प्रविश्य च जितकाशिन (१) मायान्तं सितातपत्रपरिचितं कार्फरराजं शस्त्रेण हृदि हतवान्। कार्फरराजस्तु गतप्राणो भूमौ निपपात। चाचिकदेवेन च भूमौ पतितस्य तस्य शिरश्छित्वा यवनराजस्य पुरो नीतम्। यवनेश्वर उवाच, कस्येदं शिरः ? चाचिकः कथयति, कार्फरराजस्य। यवनेश्वर उवाच, केनासौ हतः ? चाचिको ब्रूते, राजन्! पराक्रमतुलितनरसिंहेन(२) नरसिंहदेवेन हतः। तत्पश्चाद्गामिना मया शिरश्छिन्नम्। यवनेश्वर उवाच, नरसिंहदेवः कुत्र ? चाचिको ब्रूते, कार्फरराजसन्निधानवर्त्तिभिः स्वामिबधामर्षितैः मङ्गोल-

---

१ जितकाशिनं—जितं जयः भावे क्तः। तेन काशते उल्लसति जितकाशी जयोल्लस इत्यर्थः।

२ पराक्रमतुलितनरसिंहेन—पराक्रमेण तुलितः अनुकृतः नरसिंहः नृसिंहावतारो येन तथोक्तः।

Digitized by Google

खभटै(१)र्बहुभिरेको हन्यमानो मया दृष्टः, क्व गतः क्वेदानीमस्ति वा तत्र न्यायते। ततो यवनराजः परसैन्यं हतनायकं पलायमानं दृष्ट्वा परमसानन्दो(२) बभूव। पुरुषांश्च तदनुगामिनः स्वसैनिकान् प्रत्याह, रे रे सैनिकाः! पलायमानान् परभटान् किं निहथ? सम्प्रति राज्यरक्षितारं कार्फ्ररराजक्षतान्तं नरकृपिणं नरसिंहमिव नरसिंहदेवं मे विज्ञापयत। तदनन्तरमेकत्र संग्रामप्रदेशे बहुतरनाराचभिन्नशरीरं(३)बहद्रुधिरधारासहस्रं(४) पुप्पितं किंशुकमिव

---

१ मङ्गीलखभटैः—मङ्गीलाः मङ्गदीयजातिविशेषाः सेवकसैयद-मङ्गीलपाठानानामन्वयाः तेषां खभटैः स्वपक्षीययोधैः।

२ परमसानन्दः आनन्देन सह मानन्दः (बहुव्रीहिः) परमश्चासौ सानन्दश्चेति परमसानन्दः। क्वचित् द्वयोः विशेषणयोरपि कर्मधारय-दर्शनात् साधु।

In rendering the phrase into English, the word "परम" should be considered as an adverb, thus—"exceedingly delighted."

३ बहुतरनाराचभिन्नदेहं—बहुतरा नाराचाः तैः भिन्नः क्षतः देहो यस्य तथोक्तः।

४ बहद्रुधिरधारासहस्रं—रुधिरस्य धाराणां सहस्रं रुधिरधारा-सहस्रं बहत् रुधिरधारासहस्रं यस्मात्। सहस्रशब्दोऽत्र अनियत-संख्यावाची।

Digitized by Google

वेदनामूर्च्छितं नरसिंहदेवं यवनराजो ददर्श, तुरङ्गादवतीर्य्य च बभाषे, हे नरसिंहदेव! जीविष्यसि? नरसिंहदेव उवाच, राजन्! मया यत् कृतं तदवगतं भवता? यवनेश्वर उवाच, ज्ञातं मया। कथितं चाचिकदेवेन, त्वया मम शत्रुर्हतः। नरसिंहदेव उवाच, तर्हि जीविष्यामि। यतः——

स्वीकृतं दुष्करं कर्म्म मया यस्य हितेच्छया।
तेन विश्वायमानो मे स्फुटितः श्रमपादपः॥

ततस्तच्छरीरादापुङ्खनिमग्नान्(१)बाणान् उद्धृत्य यवनराजस्तं कुमारं नानाभेषजप्रयोगेण नियमेन(२) च स्वल्पैरेव दिवसैर्निर्व्राणक्षतमचीकरत्। तदनन्तरं सहस्रसंख्यैः तुरङ्गैर्लक्षसंख्यैः काञ्चनकक्षचामरादिभिश्च तं पूजयितुमुपचक्रमे। प्रसादावसरे(३) नरसिंहदेव उवाच, राजन्! युवं राजपुत्राणां स्वाभाविक एव धर्म्मस्तत् किमद्भुतं मया कृतं, यदियं मम पूजा क्रियते? यदि तु पूजैव कर्त्तव्या तदा चाचिकदेवस्य

---

१ आपुङ्खनिमग्नान् फलात् आरभ्य पुङ्खपर्य्यन्तं शरीरान्तःप्रविष्टान्।

२ नियमेन—पथ्याहारादिना।

३ प्रसादावसरे—प्रसादस्य प्रसादचिह्नप्रदर्शनस्य पारितोषिक दानस्य अवसरे समये।

Digitized by Google

क्रियतां, येन रिपुशिरोऽप्यानीय सत्यरक्षणानुरोधेन भवतः पुरस्तान्मम यशः प्रकाशितं, स्वपौरुषं न ख्यापितम्! अन्यथानेन नीयमानं मारणचिह्नं(१) रिपुशिरो दृष्ट्वा को वाध्यगमिष्यत्, यन्मया मारितो-रिपुरिति। तदयमेव प्रथमं पूज्यतां। चाचिकदेव उवाच, कुमार नरसिंहदेव मामेवं ब्रूहि, कथमहं तव पराक्रमफलमादाय परोच्छिष्टजीवी भविष्यामीति। नरसिंहदेव उवाच, साधु सत्यवीर साधु; अनेन तव सत्येन सर्व्वमेव (२) विवेचितम्।

महेच्छोऽसि विदग्धोऽसि सतीपुत्रोऽसि चाचिक॥

ततस्तयोः परस्परमालापमुपकर्णयता समुपजातपरितोषेण यवनराजेन द्वावपि कुमारौ तुल्यमेव सत्कृतौ।

—०—

---

१ मारणचिह्नं—मारणस्य वधस्य चिह्नानि असिप्रहारादिजनितानि क्षतानि यत्र तत्।

२ सर्व्वमेव विवेचितं—सर्व्वं ऐहिकं पारत्रिकं समस्तमेव कुशलं विवेचितं विचारितं विचार्य्य सम्पादितमित्यर्थः। इदं ते सत्यं इह चामुत्र च कल्याणाय कल्पते इत्यर्थः।

Digitized by Google

दानवीरकथा।

आसीन्महीमण्डले सकलराजलक्षणोपेतो (१) सार्व्वभौमः शूद्रको(२)नाम राजा। एकदासौ अमात्यगणपरिवृतः परिषदमास्थितः। तदैको राजपुत्रः पुत्रभार्य्यासमेतो देशान्तरादाजगाम, वर्त्तनार्थी(३) च द्वौवारिकमब्रवीत्, भो द्वौवारिक! मामवेहि राजपुत्रम्। अहं पुत्रभार्य्यासहायः शूद्रकमहाराजस्य यशः श्रुत्वा वर्त्तनार्थी समागत्य तिष्ठामि। मम वृत्तान्तं राज्ञे विज्ञापय। श्रुत्वैतत् प्रतीहारी राजानं विज्ञाप्य आगन्तुकमुपनिनाय। तमवलोक्य राजा पप्रच्छ, को भवान् किमर्थमिहागत्य मिलितः? इति पृष्टः स ब्रूते, देव! वीरवरनामा क्षत्रियोऽहम्। भवत्सेवाकाङ्क्षी समागत्य तिष्ठामि। राजा वदति, किं जीवनं कर्त्तव्यं

---

१ सकलराजलक्षणोपेतः—सकलानि राज्ञः लक्षणानि विलक्षणधर्म्माः शौर्य्यौदार्य्यादयः तैः उपेतः युक्तः। सामुद्रिकैः उक्तानि आजानुलम्बितबाहुवक्षादीनि शरीरगतचिह्नानि वा।

२ शूद्रक—The name of the first Andhra king, author of the drama called Mrichhakaṭika.

३ वर्त्तनार्थी—आजीवार्थी। ४ जीवनं जीवति अनेन जीवनं वेतनं। करणे अनट्।

Digitized by Google

तद्वद। वीरवरेणोक्तं, प्रत्यहं सुवर्णशतपञ्चत्रयं(१) ददातु देव! राजाब्रवीत्, अहो! अत्रानेकमहागुणवन्तः सन्ति। केषामपि एतावज्जीवनं न विद्यते। तत् श्रुत्वा वीरवरो नृपतिमभिवन्द्य चलितः। ततः सान्धिविग्रहिकेणोक्तं, (२) देव! एतेन मा कातरो भव, दिवसकतिपयं एतावज्जीवनं दत्त्वा वीरवरः परीक्ष्यताम्। बहुलधनमपि विनष्टं न भविष्यति। ततो राज्ञा पुनरानीय तस्मै यथाभिलषितवर्त्तनं दत्त्वा स्थापितोऽयम्। वीरवरो वर्त्तनधनस्यार्द्धं ब्राह्मणेभ्यो दत्त्वा चतुर्थांशं अन्धपङ्गुजनेभ्यो दत्त्वा अवशिष्टचतुर्थांशेनात्मानं वर्द्धयति। एवं राजसेवां कुर्व्वन्नास्ते। अथैकदा दक्षिणस्यां दिशि रात्रौ एका स्त्री करुणस्वरेण रोदिति। तत् श्रुत्वा राजा वदति, द्वारि कस्तिष्ठति? वीरवरेणोक्तं देव! अहमस्मि। नृपेणोक्तं, वीरवर! का रोदिति, तां निश्चित्य मां ज्ञापय। ततोऽयं गतः। राजा

---

१ सुवर्णानां सुवर्णमुद्राणां तोलकपरिमितानां शतानां पञ्चत्रयं पञ्चदश। पञ्चदशशतसुवर्णमुद्राः इत्यर्थः। अत्र—राजाधिकारे।

२ सान्धिविग्रहिकेण—सन्धिविग्रहौ वेत्ति सान्धिविग्रहिकः, सन्धिबन्धने युद्धकरणे च कुशल इत्यर्थः।

Digitized by Google

च तस्य पश्चात् अनुपलक्षितो जगाम। वीरवरस्तत्र गत्वा रुदतीमालोक्याब्रवीत्। मातर्भवती किमर्थं एकाकिनी रोदिति? सा तु यत्नेन दृष्टा ब्रूते, वत्स! अहं शूद्रकस्य लक्ष्मीः, स महात्मा प्रातःकाले नाशं गमिष्यति, तदहमिदानीं कुत्र स्थास्यामि इति रोदिमि। तत् श्रुत्वा वीरवरेणोक्तं, मातर्भवती यथा चिरस्थायिनी, राजा च चिरजीवी भवति, तदुपायं वदतु भवती, अहं तावत् करोमि। लक्ष्मीः ब्रूते, वत्स! तत् दुष्करं कर्म्म कः करिष्यति? वीरवरेणोक्तं मयाऽशक्यमपि कर्त्तव्यमिति (१) वदतु भवती। लक्ष्मीः ब्रूते, द्वात्रिंशल्लक्षणोपेतं (२) कुमारं समानीय तन्माताभगिन्यौ तच्चरणौ स्वेच्छया दधाते। स्वयमपि पिता कात्यायन्यै बलिं ददाति, तदा राज्ञः शोभनं (३) भवति। केशाकर्षणशिरश्छेदं यदि पुत्रः स्वीकरोति, तदैव नान्यथेति निगद्य लक्ष्मीरन्तर्हिता बभूव। राजा सर्व्वं श्रुत्वा सुगुप्तं

---

१ इति—इति हेतोः।

२ द्वात्रिंशल्लक्षणोपेतं—द्वात्रिंशता लक्षणैः शरीरस्थैः सामुद्रिकैश्चिह्नैः महापुरुषत्वसूचकैः इत्यर्थः।

३ शोभनं—शुभं।

Digitized by Google

तदनुसरणं (१) करोति। वीरवरः सहसा खड्गहं गत्वा पत्न्यां पुत्रे दुहितरि च सर्व्वमकथयत्, प्राबोधयच्च (२)। तत् श्रुत्वा पत्नी वदति यद्येतत् दुष्करं कर्म्म न कर्त्तव्यं तदा परलोके निस्तारः कथं भविष्यति? तत्पुत्रः शक्तिवरो ब्रूते, तात! धन्योऽहं यन्मम मरणे राजा चिरजीवी, राज्यस्य च निस्तारो भविष्यति। दुहिता चाभिनन्दति। राजा सुगुप्तः सर्व्वं श्रुत्वाऽनुपलक्षितस्तिष्ठति। वीरवरः सपरिवारस्तत्र गत्वा तेनैव विधिना राज्ञो विपत्तिक्षयहेतोः स्वपुत्रं भगवत्यै बलिं ददौ, तच्छोकं परिहर्त्तुं राज्ञो दीर्घायुष्कामस्तेन(३) खड्गेन आत्मनः शिरश्चिच्छेद च। गुरुतरशोकेन वीरवरपत्नी दुहिता च नृपतेर्दीर्घायुष्कामा स्वशिरश्चिच्छेद। राजा सर्व्वमेतदवलोक्य सपरिवारस्य वीरवरस्य सात्विकत्वमधिगम्य(४)स्वशिरश्छेत्तुमुपचक्रमे। एतावति समये

---

१ तदनुसरणं—तस्य वीरवरस्य अनुसरणं अनुगमनं।

२ प्राबोधयत्—प्रकर्षेण ज्ञापयामास, तेषां सम्यग्ज्ञानार्थं व्याचष्टे स्म इत्यर्थः।

३ दीर्घायुष्कामः—आयुरेव आयुष्यं। स्वार्थे ष्यः। दीर्घं आयुष्यं कामयते यः सः। कर्त्तरि अः।

४ सात्विकत्वं सत्त्वेन सत्त्वगुणेन जनितं सात्विकं तस्य भावः। विशुद्धधर्म्मबुद्ध्या अनुष्ठितं आचरणं इत्यर्थः।

Digitized by Google

आकाशवाणी बभूव, राजन् त्वं आत्मबलिं न दास्यसि। त्वयि कात्यायनी प्रसन्नाऽभवत्। राजा वदति, मातः! यद्येवं तदा वीरवरः सपरिवारो जीवतु। वीरवरे सपरिवारे जीविते (१) सति राजा अनुपलक्षितः सहसा स्वगृहमागतः। प्राप्तजीवनो वीरवरः पत्नीं पुत्रं दुहितरं च स्वगृहे संस्थाप्य नृपद्वारमागतः। तमायातमवलोक्य राजा वदति, वीरवर! कुत्र गत्वा स्थितं भवता, का रोदिति? तद्गृह्यं कथय। इति पृष्टो ब्रूते, देव! एका स्त्री दुःखिनी रोदिति, तां निःसार्य्या(२)गतोऽस्मि। राज्ञोक्तं वत्स! स्वगृहं गच्छ। अथ परदिने राजा सर्व्वामात्यान् समाहूय वीरवरस्य सपरिवारस्य सात्त्विकत्वं निगदितवान्। तत् श्रुत्वा सर्व्वे विस्मिता बभूवुः। तदा वीरवरप्रसादात् राजा सार्व्वभौमो (३) बभूव। वीरवरश्च बहुतरहयहस्तिधनजनमणिरत्नानि (४)

---

१ जीविते—जीवनं प्रापिते कात्यायन्या इति शेषः। जीव + णिच् + क्तः।

२ निःसार्य्य—दूरं अपवाह्य। निर् + सृ + णिच् + यप्।

३ सर्व्वस्याः सप्तद्वीपाया भूम्याः पृथिव्याः ईश्वरः सार्व्वभौमः।

४ बहुतरेषु हयेषु, हस्तिषु, धनेषु, सुवर्णादिषु, जनेषु दासादिषु, मणिषु मरकतहीरकादिषु यानि रत्नानि जातिश्रेष्ठवस्तूनि तथोक्तानि "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति।

Digitized by Google

दत्वा शेखरदेशे राजानं कृतवान्। वद राजन्! वीरवरशूद्रकयोर्मध्ये को महान् महासत्त्वश्च (१)? राजा वदति, शृणु रे वेताल! सेवकानामयमेव धर्मः यत् प्रभुकार्य्ये प्राणांस्त्यजन्ति। किन्तु शूद्रको नृपतिर्महान् महासत्त्वश्च, यदेवंविधसाहसेन सेवकं परिवारसहितं जीवयित्वा राजानं कृतवान्। नृपतावितिवादिनि वेतालः शिंशपावृक्षे पुनर्ललाग।

—०—

जीवदयाकथा।

अत्रैव भरते (२) क्षेत्रे राजपुरं नाम नगरं, यत्र नगरे मयूरगणा जिनमन्दिरे वाद्यमानातोद्यध्वनिं (३) श्रुत्वा नृत्यं कुर्वन्ति। तत्र नगरे सुनन्द इति नाम्ना वसति धीवरः, परं (४) स्वभावेन जीवदयापरः। तस्य जिनदासनामा श्रावकः (५)

---

१ महासत्त्वः—महत् सत्त्वं मनः स्वभावो वा यस्य सः।

२ भरते—भरतस्य इदं भरतं तस्मिन्। "नधित्कार्श्यं सर्व्वत्र" इत्यनेन न दीर्घः।

३ आतोद्यध्वनिं—आतोद्यस्य वीणादिवाद्यचतुष्टयस्य ध्वनिं।

४ परं—यद्यपि जात्या धीवरः, तथापि प्रकृत्या जीवदयापरः।

५ श्रावकः—A particular class of Buddhist saints or ascetics; a Buddha or Jaina votary.

Digitized by Google

परममित्रं बभूव। अन्यदा जिनदासेन सह सुनन्दो गुरूणां पार्श्वं जगाम। गुरून् वन्दित्वा द्वावपि उपविष्टौ। गुरुभिः जीवदयाविषये धर्म्मादेशना(१) कृता——

कल्याणकोटिजननी दुरितदौर्भाग्यदुःखदलनी भवति जीवदया।

सुनन्देन अभिग्रहो (२) गृहीतः, भगवन् अतः-परं जीवबधोन कार्य्यः मया मांसं न भक्षितव्यम्। एवं बहुषु दिनेषु व्यतिक्रान्तेषु दुर्भिक्षः सञ्जातः। तस्मिन् दुर्भिक्षे सर्व्वोऽपि जनोऽस्य अग्रतो मत्स्यमांसाहारं करोति। सुनन्दोऽपि भार्य्यया भणितः त्वमपि लोकाचारं प्रतिपालय। तेन कथितं पापहेतुना कर्म्मणाऽलम्। भार्य्या प्राह, रे मूर्ख! त्वं केन भ्रामितः यत् कुलाचारं न पालयसि। इतश्च तस्य श्यालका मिलिताः, तैर्बलात् महाह्रदे नीतः तत्र जालं क्षेपितः (३)। जाले पतितान् व्याकुलान् बहून् मत्स्यान् दृष्ट्वा सुनन्दस्य हृदये कृपा

---

१ धर्म्मादेशना—धर्म्मस्य आदेशना आदेशनं, exhortation.

२ अभिग्रहः—अभि सम्यक् गृह्यते असौ अभिग्रहः व्रतं (a vow). अभि + ग्रह + अच् (कर्म्मणि)।

३ क्षेपितः—क्षिप् + णिच् + क्तः। अत्र प्रयोज्यकर्तुः कर्म्मत्वं व्याकरणविरुद्धमपि तदानीन्तनव्यवहारसिद्धमिति सम्भाव्यते।

Digitized by Google

समुत्पन्ना। सर्व्वान् मत्स्यान् विमुच्य सुनन्दो गृहं आगतः। एवं त्रीणि दिनानि तैः श्यालकैस्तेन सुनन्देन तत् पापकर्म्म कारितम्। तेन मनसाऽपि न विहितम्। परं संघट्टवशात् एकस्य मत्स्यस्य पाङ्गुड़ी (१) भग्ना। तेन श्यालकानां अग्रे कथितं, भो भो कुटुम्बस्य कृते प्राणिवधं न करोमि। इत्युक्त्वा तेन अनशनं गृहीतं मृतश्च।

अत्रैव भरते राजगृहे (२) नगरे नरवर्म्मा नाम राजा। तत्र मणिकारो नाम श्रेष्ठी द्वादशसुवर्णकोटीनां अधिपतिः, तस्य सुयशानाम्नी भार्य्या, तस्याः कुक्षौ सुनन्दजीवः समुत्पन्नः। तस्य दामन्नक इति नाम कल्पितं। क्रमेण अष्टवार्षिको जातः। अन्यदा भवितव्यतावशेन तस्य श्रेष्ठिनो गृहे मारिरोगः सञ्जातः। राज्ञा भणितं, अयं मारिरोगः सर्व्वत्र पुरे सञ्चरिष्यति, अतोऽस्य गृहद्वारे वाटी(३) कारिता। कियता कालेनैव मारिरो-

१ पाङ्गुड़ी—पाक्ना इति भाषा।

२ Rájagriha—was sometime the chief city in Magadha, (said to be nine yojanas distant from Pátaliputra.)

३ वाटी—इतियुक्तं गृहं, तस्य गृहस्य द्वारं हत्वा तथा बन्धनकारि यथा प्रवेशनिर्गमौ सर्व्वथा रहितौ।

Digitized by Google

गेण सर्व्वे मातापित्रप्रमुखाः (१) परिजनाः मृताः। पूर्व्वभवकृतानुकम्पावशेन परं दामन्नकः उद्धारितः(२)। परं गृहात् निःसारं न लभते। क्रमेण मृतकभक्षकाणां शुनां (३) प्रवेशमार्गेण निर्गतः भिक्षानिमित्तं भ्रमन् सागरपोतस्य व्यवहारिणो गृहे गतः। यावत् गृहद्वारि तिष्ठति, तावत् मुनियुगलं विहरणाय (४) समागतम्। दामन्नकं दृष्ट्वा ज्येष्ठतपोधनेन उक्तम्——

अहो भाग्यं भवेद्रङ्को गृहेऽस्मिन् सर्व्वसम्पभाक्॥

कुड्यान्तरितेन सागरपोतव्यवहारिणा इदं वचः श्रुत्वा स्वमनसि चिन्तितं, मुनयः प्रलयेऽपि अलीकं न वदन्ति, तावत् किं मम कुलक्षयो भविष्यति, समुद्रदत्तो मे पुत्रः किं विनाशं यास्यति? यत इयति प्रौढ़े (५) मम कुटुम्बे प्रवर्त्तमाने अयं रङ्को मम गृहस्वामी भविष्यति। अन्यच्च यत् मुनिना उक्तं तत्

---

१ माता च पिता च मातापितरौ प्रमुखौ प्रधानं येषां ते मातापित्रप्रमुखाः।

२ उद्धारितः—मारिरोगात् निसारं प्रापितः। उत्+ध+णिच्+क्तः।

३ शुनां—कुक्कुराणां। श्वन्+आम्।

४ विहरणाय—यादृच्छिकपर्य्यटनाय। ५ प्रौढ़े—प्रवृद्धे।

Digitized by Google

अन्यथा न जायते। श्रेष्ठी दुःखी बभूव, धिक् संसारनाटकम्! यो विभवो मम पितृपितामह-प्रमुखैः अतिचिरपरिपालितः, हा! तस्य विभवस्य अयं रङ्कः स्वामी भविष्यति। तावत् किमपि उपायं करिष्यामि। किं कृतेन दुःखेन? तावत् अस्य मारणोपायं चिन्तयामि। अयं रोग इव उपेक्षितो मरणाय जायते इति स्वचित्तेन स मन्त्रयित्वा मोदकं गृहीत्वा तस्य दामन्नकस्याग्रे उक्तं, वत्स! आगच्छ, यथा ते मोदकं ददामि। इति श्रुत्वा दामन्नकोऽपि तेन सह जगाम। गतो व्यवहारी चण्डालपाटके(१)। तत्र खड्गिकोनाम चण्डालाग्रणीः। तं आकार्य्य एकान्ते तस्मै द्रव्यं प्रदाय तस्याग्रे इत्युक्तं, भो मदीयं एतत् प्रयोजनं कुरु, यथा बालः प्रच्छन्नं हन्तव्यः। मारितस्य अभिज्ञानं मम दर्शयितव्यम्। चण्डालेनापि प्रतिपन्नम् (२)। नगरात् दूरं नीतो दामन्नकः। चण्डालेन चित्ते चिन्तितं, अनेन वरा-

---

१ चण्डालपाटके—चण्डालानां पाटकः विभागः पाड़ा इति भाषा। the half of a village, part of a village, a kind of village.

२ प्रतिपन्नं—स्वीकृतं।

Digitized by Google

केण कोऽपराधो विहितः, यत् सागरपोत एनं मारयति। तदहं सर्व्वथा एनं न मारयिष्यामि, मम हस्तौ न वहतः। ततो यमजिह्वासमानां कर्त्तिकां समाकृष्य तस्य कनिष्ठाङ्गुली छित्वा, तस्य बालकस्योक्तं, यदि अस्मिन् नगरे स्थास्यसि ततो मारयिष्यामि त्वां, यदि नगरं मुक्त्वा अन्यत्र यासि ततो मुञ्चामि त्वाम्। तेन रुदता उक्तं एवं करिष्ये। ततो मुक्तषण्डालेन। चण्डालेन गृहे गत्वा अङ्गुलीखण्डं दर्शितं सागरपोतस्य। सोऽपि तुष्टो बभूव। दामन्नकोऽपि वने भ्रमन् सागरपोतस्य गोकुलिकेन(१) दृष्टः पृष्टश्च कस्त्वम्? दामन्नकेनोक्तं उज्जयिनीवंशोद्भविक् पुत्रोऽहम्। ततस्तं स्वगृहे नीत्वा तेन गोकुलिकेन निजभार्य्यायाः समर्प्य उक्तं, तव अपुत्राया अयं पुत्रो गोवदेव्या (२) दत्तः। गोकुलिकगृहिणी परितुष्टा जाता। विनयप्रमुखैः गुणैः स तस्या अतीव वल्लभो बभूव। दामन्नकस्तत्र गोकुले वर्द्धमानो यौवनं समासासाद।

---

१ गोकुलिकेन—गोकुलरक्षणे नियुक्तेन पुरुषेण।

२ गोवदेव्या—कुलदेवतया।

Digitized by Google

अथ कदाचित् गोकुलविलोकनार्थं सागरपोतव्यवहारी आजगाम। तत्र दामन्नकं दृष्ट्वा व्यवहारिणा पृष्टं अयं को बालः? तेनोक्तं, एकाकी अत्र वने भ्रमन् निर्नाथो मया पुत्रत्वेन प्रतिपन्नः। व्यवहारिणा कर्त्तित-कनिष्ठाङ्गुलीदर्शनात् दामन्नकएवायमिति निश्चितं, चिन्तितञ्च, मम वाह्यधनस्य अयं स्वामी भविष्यतीति मुनिवचनं किं अन्यथा भवति? तथापि पुरुषकारो (१) न मोक्तव्यः। एवं विचिन्त्य सागरपोतेनोक्तं, भो गोकुलिक! वयं (२) गमिष्यामो गृहम्। तेनोक्तं बहोः कालात् अद्य यूयं(२) आगताः। अद्यापि गोकुलं न विलोकितम्। सागरपोतेनोक्तं, गृहे महत् कार्य्यं अस्ति, अतोऽधुनैव यास्यामः। गोकुलिकेनोक्तं, यदि अपरिहार्य्यं कार्य्यमस्ति ततो लेखं गृहीत्वा अयं मम पुत्रस्तत्र यास्यति। सागरपोतेन लेखं लिखित्वा तस्य करे अर्पयित्वा प्रेषितः सः गतो दामन्नकः। यावत् राजगृहनगरोद्यानं गतः, तावत् परिश्रान्तो-विश्रामहेतोः देवगृहे सुप्तः। निद्रा समागता।

---

१ पुरुषकारः—उद्योगः, अभीष्टसाधने प्रयत्नः।

२ वयं यूयमिति गौरवात् बहुत्वम्।

Digitized by Google

दूतश्च तस्यैव व्यवहारिणो विषा नाम्नी पुत्री देवपूजानिमित्तं तत्रैव प्राप्ता। तया दृष्टो दामन्नको विशाललोचनो विशालवक्षःस्थलः। तस्याः तं विलोकयन्त्याः पिटलेखे दृष्टिर्गता। यष्टिप्राप्तात् तं गृहीत्वा वाचयति, स्वस्ति श्रीगोकुलात् सागरपोतः समुद्रदत्तं सस्नेहमालिङ्ग्य वार्त्तयति (१) प्रस्तौति कार्य्यञ्च।

अधौतपादकस्यैव (२) पुरुषस्याग्र सत्वरं।
विषं दत्वा त्वया कार्य्यं निःशल्यं हृदयं मम॥

ततस्तया चिन्तितं, नूनं पित्रा मम योग्य एष वरो लब्धः, यत् अद्यैव विवाहः कार्य्यः, तत् अद्यतनीयं सुन्दरं दिनं दृष्टम्। अतोऽद्यैव विवाहः भविष्यति। यत् विषं दातव्यं, तत् औत्सुक्यवशात् आकारस्थाने अनुस्वारो विहितः। तदहं शुभं करिष्यामि। इति विचिन्त्य नयनाञ्जनं गृहीत्वा विन्दुस्थाने आकारः कृतः। पुनरपि मुद्रयित्वा लेखस्तथैव मुक्तः। सा गृहं गता। श्लोकवेलानन्तरं दामन्न-

१ वार्त्तयति—वार्त्तं आगमिष्यं करोति, अनागमयं पृच्छति वा। वार्त्तशब्दात् तत्करोतीत्यर्थे णिच्।

२ अधौतौ पादौ येन तथोक्तस्य बहुव्रीहौ कः। पादधावनात् पूर्व्वमेव। विलम्बं विना, अद्यैव इत्यर्थः।

Digitized by Google

कोऽपि तत् गृहं आजगाम। समुद्रदत्तस्य लेखः समर्पितः, समुद्रदत्तेनाऽपि वाचयित्वा लेखोऽवधारितः। तातादेशो मम प्रमाणं (१) इति भणित्वा विवाहस्य सामग्री कृता। समग्रोऽपि स्वजनवर्गो मिलितः। तस्मिन्नेव दिने शुभे लग्ने समागते दामन्नको विवाहं कारितः।

अत्रान्तरे सागरपोतो नगरं प्राप्तः। मार्गमिलितेन लोकेन कथितं धन्यस्वं येन ईदृशो जामाता प्राप्तः। सागरेण चिन्तितं, नूनं तेन दुरात्मना मम पुत्री परिणीता। गृहागतेन दृष्टा स्वपुत्री विवाहकङ्कणालङ्कृतशरीरा, दृष्ट्वा दामन्नकः कौतुकभूषितकरः (२)। हा अन्यथा अहं कार्यं चिन्तयामि, दैवयोगेन अन्यथा परिणमति। साम्प्रतं मम गृहमनुष्याणां अयं स्वामी बभूव। यतः गृहस्थानां गृहेषु स्त्रियः प्रमाणं; स्त्रीणां जामाता प्रमाणम्। एतत् अनुचितं द्रष्टुं न शक्नोमि। मम पुत्र्या वैधव्यं वरं सहिष्ये पुनरेनं सर्व्वथा मारयिष्यामि। इति विचिन्त्य गतो मातृपाटके। खड्गिलः भणितः,

---

१ प्रमाणं—बहुमानास्पदं, सर्व्वथा पालनीयमित्यर्थः।

२ कौतुकं—विवाह सूत्रम्।

Digitized by Google

रे चाण्डाल ! त्वया मम वचो न प्रमाणीकृतम् । तेनोक्तं तदा बालकं दृष्ट्वा कृपा उत्पन्ना । अधुना दर्शय यथा तं व्यापादयामि । सागरपोतेन भणितं यदि एवं ततोऽस्य नगरदेवतापूजनार्थं तं दामन्नकं प्रेषयिष्यामि ; तदा त्वया मारयितव्यः । ततो गृहं आगतः । गृहं आगतेनोक्तं, बधूवराभ्यां कुलोचित आचारः प्रतिपालितः किं वा न ? परिजनेनोक्तं न प्रतिपालितः । ततो नगरदेवीपूजनाय सामग्री कृता । ततश्चलिते वरबध्वौ देवीपूजार्थं मार्गे व्रजन्त्यौ दृष्टे दृष्टनिविष्टेन समुद्रदत्तेन, दृष्टे च ईदृशे सन्ध्यासमये सूर्येऽस्तमिते, तिमिरप्रसरे परिस्फुरति, युवां कुत्र चलिते ? दामन्नकेनोक्तं नगरदेवीपूजनाय । समुद्रदत्तेनोक्तं, तर्हि युवां तिष्ठतं, अहमेव गत्वा देवीपूजां करिष्यामि । पूजोपकरणं गृहीत्वा गतः । समुद्रदत्तो देवीगृहं प्रविशन् पूर्वप्रविष्टेन खड्गिलेन हतः । यावत् सागरपोतः समुद्रदत्तनिरीक्षणाय आयाति तावद्दृष्टो दामन्नको बधूसहितः । ततः स पुत्रविनाशं श्रुत्वा हृदयं स्फुटित्वा मृतः । श्रातदत्तान्तेन राज्ञा दामन्नकः तस्य गृहे स्वामी कृतः । अन्यदा मङ्गलपाठकैः पठितं——

Digitized by Google

परोपकरणं कायादसारात् सारमाहरेत् (१)।

तथाच——

प्रवर्त्ततां मनुजहिताय सञ्जनोदयावति द्रविणततिर्ह्रीयताम्(२)।

एतत् श्रुत्वा तेषां त्रयाणां सहस्रं सुवर्णानि दत्तानि दामन्नकेन। राज्ञा अनुचितं दानं श्रुत्वा दामन्नक आकारितः, पृष्टं दानकारणम्। तेन निजपूर्ववृत्तान्तो राज्ञोऽग्रे निवेदितः। राज्ञा परितुष्टेन तस्मै श्रेष्ठिपदं दत्तम्। अथ स विपुलान् भोगान् भुनक्ति दानं ददाति प्रसादान् उद्धरति(३)। अन्यदा तस्य चिन्ता बभूव, यत् पूर्वभवे मया किं कर्म्म विहितं यत् व्यसनस्थाने मम उत्सवः। इति विचिन्तयतस्तस्य प्रभातं जातम्। प्रभाते धर्म्मनियुक्तेन (४) पुरुषेण दामन्नकस्य अग्रे उक्तं, उद्याने विमलबोध

---

१ असारात् क्षणभङ्गुरत्वात् सारहीनात् अस्थिरात् कायात् सारं सारांशभूतं परोपकरणं परोपकारं आहरेत् उद्धरेत्।

२ दयावति जने द्रविणततिः धनविस्तारः न ह्रीयतां न न्यूना भवतु। ह्रीयतामित्यत्र हा-धातोः कर्म्मणि प्रार्थनायां लोट्। ततिः—तन विस्तारे इत्यस्मात् क्तिः।

३ प्रसादान् उद्धरति—अनुग्रहान् परिशोधयति, प्रत्युपकारेण पूर्वोपकारिभ्य आनृण्यं लभते।

४ धर्म्मनियुक्तेन—धर्म्मे देवार्चनादौ नियुक्तेन।

Digitized by Google

आचार्यः समागतः। दामन्नको हृष्टो बभूव। गतो वन्दनार्थम्। वन्दित्वा पूर्वभवः पृष्टः। मुनिनापि पूर्वोक्तस्तस्य पूर्वभवः कथितः, यत्त्वया पूर्वभवे मत्स्यानां त्रिवेलं कष्टं उत्पादितम्। ततोऽस्मिन् भवे तवापि त्रिवारं कष्टं आगतम्। यत् एकस्य मत्स्यस्य पाङ्गुरी भग्ना, ततस्तव कनिष्ठाङ्गुली छिन्ना। जीवदयाप्रभावात् तव ईदृशी सम्पत्। इति श्रुत्वा जातिस्मरो जातः दीक्षां गृहीत्वा स्वर्गं जगाम।

सत्यमञ्जरीकथा।

अत्रैव भरते वैताढ्यपर्वते कनकपुरं नाम नगरं, तत्र कनकरथो नाम विद्याधरो राजा। तस्य एते गुणा निवसन्ति। त्यागी सरलः दाक्षिण्यसारो(१) रूपवान् कामरूपी (२); विद्याप्रभावतः पूजितसमीहितसार्थः (३)। अन्यदा रात्रौ निजनग-

---

१ त्यागी—दानशीलः, दाक्षिण्यं परेच्छानुवर्त्तनं तस्य सारो यस्मिन्, परमदाक्षिण्ययुक्तः।

२ कामरूपी—कामेन इच्छानुसारेण नवनवरूपधारणे पटुः।

३ विद्याप्रभावतः—आत्मज्ञानबलेन पूजितः पुरस्कृतः समीहितानां अभीष्टानां सार्थः समूहो येन, आत्मज्ञानानुसारेण सम्पाद्यमानं हि अभीष्टं श्रीभते।

Digitized by Google

रस्य मध्ये नष्टचर्यायां (१) परिभ्रमति कनक-रथः। तावत् एकस्मिन् देवकुले प्रेक्षणिका(२)भवति, तत्र गीतं गीयते। तावत् गायनेन एषा गाथा पठिता। तद्यथा——

हंसाः सर्व्वत्र सिताः स्त्रिस्त्रिणः सदा चित्रिताङ्गयष्टयः।
सर्व्वत्र जन्ममरणं सर्व्वत्र विभोगिनी भोगाः॥

इमां गाथां श्रुत्वा विद्याधरो निजमनसि चिन्तयामास। चयाणां पदानां अर्थः प्रत्यक्षं दृश्यते। अस्मिन् जीवलोके हंसाः सर्व्वत्र श्वेताः। मयूराः चित्रितरोमराजयः। जन्ममृत्यू सर्व्वत्र। परं एतत् वचनमात्रं न पुनः प्रत्यक्षं, यत् भोगिनां सर्व्वत्र भोगा भवन्ति। एतत् अलीकम्। अहं भोगवान् वर्त्ते, यदि एवंविधा भोगा मम विदेशेऽपि भवन्ति, तदा एतत् सत्यं वचः। इति चिन्तयित्वा निजमन्त्रिणं आकार्य्य तेन सह मन्त्रयित्वा श्रीताम्रचूड़नगरे गतो योजनशतप्रान्ते। नगरगतेन राज्ञा चिन्तितं, मनो-ज्ञवेशधारी रूपवान् पुरुषः सर्व्वत्र गौरवं लभते। ततःकारणात् विनष्टदेहो बभूव। प्रस्रवन्नयनयुगलः

१ नष्टचर्य्यायां—नष्टानां दुष्टानां चौरादीनां चर्य्या गूढ़चरणं गूढ़-दर्शनम्।

२ प्रेक्षणिका—सन्ध्याकालीनं प्रतिमाप्रदर्शनं।

Digitized by Google

विनष्टनासिकः प्रनष्टोष्ठपुटः, किं बहुना अतीव कुरूपः विलोकितुमशक्यो जातः।

इतश्च ताम्रचूड़ो राजा सप्तभूमिकप्रासादे उपविष्टो नगररमणीयतां विलोकयति। तत्र निजसमीपे सेवाकरणार्थं सामन्तप्रमुखसभ्येषु उपविष्टेषु निजराज्यैश्वर्य्येण गर्व्वितोराजा एवं वदति, हे सभ्याः! कस्य प्रसादेन यूयमीदृशीं सम्पदं विलसथ (१)। तैस्छन्दानुवृत्त्या राज्ञोऽग्रे उक्तं, राजन्! तव प्रसादात् सर्वमेतत् विजृम्भते। अथ राजपुत्री सत्यमञ्जरी सामन्तादीनां तेषां इति वचः श्रुत्वा ईषत् हसित्वा मौनेन स्थिता। राज्ञा हास्यकारणं पुत्री पृष्टा, वत्से! किमेतत्? सा प्राह, तात! अमीभिस्तव सेवकैः अलीकं उक्तम्। अतो मया हसितम्। राजा प्राह, वत्से! किं अलीकम्? तया उक्तं अमी, तव प्रसादात् इति कथयन्ति, तत् असत्यम्। राज्ञा पुत्री पृष्टा, वत्से! तर्हि किं सत्यम्? तया उक्तं, सर्वः स्वकर्म्मणा वर्त्तते जनः। राजा सभामध्ये पुत्र्या इति वचः श्रुत्वा चटितः। ततो मन्त्रिणं आकार्य्य एवं वदति, रे रे कञ्चित् दरिद्रं

१ विलसथ—उपभुङ्ग्ध्वं, enjoy.

Digitized by Google

कुष्ठिनं व्याधिपीड़ितं महादीनं नरं पुत्रीयोग्यं वरं आनयत, यथा इयं सत्यमञ्जरी तस्मै दीयते, यथा स्वकृतकर्म्मफलं प्राप्नोति। इति राज्ञो वचः श्रुत्वा सर्वेऽपि नगरमध्ये तादृग्यं नरं विलोकयन्ति। अत्रान्तरे तस्या माता लोकमुखात् इति श्रुत्वा सभामध्ये समागता। सत्यमञ्जरीं प्रति एवं वदति, वत्से! त्वया राज्ञोऽग्रे किं उक्तम्? पुत्री प्राह, मया अलीकं न उक्तम्। यतः सर्वोऽपि निजकर्म्मफलं भुनक्ति। माता प्राह, वत्से! अद्यापि किञ्चिदपि न विनष्टम् (१)। राज्ञो वचनं मानय। पुत्री प्राह, प्रलयेऽपि अलीकं न वच्मि।

अथ तैः राजसेवकैर्नगरमध्ये परिभ्रमद्भिस्तुच्यथमध्ये स एव कुष्ठरूपधारी पुमान् दृष्टः। तैः परस्परं इत्युक्तम्। यादृग्यो देवेन आदिष्टः अयन्तादृगएव। एतस्मात् अपरः कोपि दुःखी न जायते। तत एनं गृहीत्वा यास्यामो राजसमीपे। इति विचार्य्य उक्तं तैः, भोः कुष्ठिन्! उत्तिष्ठ राजा त्वां निजकन्यापरिग्रहाय आकारयति। ततः तेन कुष्ठिना उक्तं,

---

१ राजकोपस्य फलं अद्यापि नानुभूतं, अतः अद्यापि किञ्चिदपि ते सुखस्वाच्छन्द्यं न विनष्टं जातं।

Digitized by Google

अहं अन्येऽपि दैवेन हसितः, भवतां नहि युक्तं मया सह हास्यं कर्त्तुम्। किं राजपुत्रीयोग्योऽपरः कोऽपि वरो नास्ति। राजपुत्रैरुक्तं, भो! उत्तिष्ठ, वयं राजादेश्यकारिणः। परन्तु एनं अर्थं अस्माकं स्वामी वेत्ति, वयं न विद्मः। एवं उक्त्वा तैः सर्वैरुत्थाप्य नीतो राजसमीपे। ततो मन्त्रिभिः करान् वियोज्य (१) राजा विज्ञप्तः, स्वामिन्! भवतां आदेशेन अयं नरः समानीतः। ततो राज्ञा निजपुत्री तस्मै कुष्ठिने प्रदत्ता। ततः कुष्ठी राजानं प्रति प्राह, स्वामिन्! अज्ञातकुलस्य व्याधितस्य नरस्य पुत्रीं दातुं तव न युज्यते(२)। अन्यच्च ममापि एनां परिणेतुं न युज्यते(२)। किं राजहंसी सह पाणिग्रहणं कर्तुं काकस्य युज्यते(२)? एवमनिच्छन्नपि कुष्ठी राज्ञा निजपुत्रीं परिणाय्य विसर्जितः। सत्यमञ्जरी मातापित्रोश्चरणान् अभि-

---

१ करान् वियोज्य—अञ्जलिपुटं कृत्वा।

२ अत्र तव, मम, काकस्य च इत्यत्र सम्बन्धे षष्ठी; युज्यते इति कर्मणि लट्। दातुं परिणेतुं कर्तुमिति च कर्तृपदमिति कथञ्चित् व्याख्येयं। Properly speaking these are instances of sanskrit impersonal verbs, not recognized in sanskrit grammars.

Digitized by Google

वन्द्य हृष्टमुखकमला राजभवनात् निःसृता। यावत् निजभर्त्रा सह याति सत्यमञ्जरी, तावत् कुष्ठी राजमार्गे पतित्वा स्खलितः। निजप्रियां प्रति कुष्ठी प्राह, देवि! अस्मात् स्थानात् पदमपि चलितुं न शक्नोमि। ततः सत्यमञ्जरी भणति, नाथ! कातरो मा भव, मम पृष्ठप्रदेशमारोह, यथा समीहितं स्थानं प्रापयामि। तस्याः स्वभावं ज्ञात्वा कुष्ठी प्राह, अद्य अत्रैव तिष्ठावः, कल्ये (१) यत् युक्तं तत् करिष्यावः। अस्मिन् प्रस्तावे महाजनवर्गो राजधवलगृहे(२) गत्वा राजानं विज्ञापयति। स्वामिन्! प्रसादं कुरु, यथा तव जामातुः एकं तृणकुटीरकं दत्वा अर्पयामो वयम्। राज्ञा प्रसादः कृतः। ततो महाजनवर्गेण तयोः कुटीरकं दत्वा अर्पितम्। तस्मिन् कुटीरके निजभार्यासहितः कुष्ठी स्थितः। अथान्तरे तेन कुष्ठिना निजहृदये चिन्तितं, एषा मम भार्या मयि रक्ता, किंवा अरक्ता, तत् अहं अस्या रागविरागौ विलोकयिष्यामि। ततो वक्तुं आरभत, देवि! सावधानहृदया एकं मम वचनं शृणु। मम संसर्गात्

---

१. कल्ये—प्रत्यूषे।

२ राजधवलगृहे—राज्ञः सौधे। धवलनामके गृहविशेषे वा।

Digitized by Google

स्तोककालेनैव त्वमपि कुष्ठिनी भविष्यसि, यतः एते रोगाः सञ्चारिणो भवन्ति। पामा क्षयः कुष्ठं कामलः नेत्ररोगः, एते पञ्च रोगाः संसर्गात् जायन्ते। कुष्ठप्रभावात् तव शरीरं विनाशं यास्यति, विषदृष्ट्वयोगात् यथा आम्रफलं विनाशं याति। तावत् निजजननीभातुलानां शरणं (१) व्रज। मम क्षते किं मरिष्यसि? इत्युक्त्वा मौनमाधाय कुष्ठी स्थितः। ततः सत्यमञ्जरी भणति, नाथ! ईदृशं असमञ्जसं किं प्रलपसि? सुकुलोत्पन्नाः प्रलयेऽपि ईदृक् कर्म्म न समाचरन्ति। आर्य्यपुत्र! एतत् किं न श्रुतं, उत्तमनारीणां भर्त्तार एव देवता भवन्ति? हे नाथ! तावत् मम अग्रे एवंविधं नीचजनसदृशं वाक्यं न भाषितव्यम्। तेन विद्याधरेण निजपत्न्या अनुरागं ज्ञात्वा बहुरूपकारिणी (२) देवता स्मृता। स्वामिनि बहुरूपकारिणि देवते! साम्प्रतं जात्यसुवर्णमयं (३) प्रासादं कुरु। ततो देवतया क्षणार्द्धेन प्रासादो निर्मितः। स कीदृशः? पञ्चवर्णरत्ननिर्म्मितं यस्य

---

१ शरणं—गृहं।

२ बहुरूपकारिणी—बहुविधं रूपं रूपयुक्तं वस्तु हर्म्यादिकं करोति या सा।

३ जात्यं—जातौ भवं सुवर्णं, श्रेष्ठं कांचनमिति यावत्।

Digitized by Google

भूपीठं (१) शोभते, निर्मलस्फाटिकमणिरचिता यस्य भित्तयो राजन्ते। यस्मिन् च प्रासादे काञ्चनस्तम्भेषु रचिताः सहस्रसंख्या रत्नपुत्तलिका वर्त्तन्ते। तस्य मध्यगृहे सुवर्णसिंहासनम्। उपरि स्थितं देवकुमारसमानरूपं आत्मानं पश्यति कुष्ठी। तं प्रासादं दृष्ट्वा नगरलोको विस्मितः। किं स्वर्गादवतीर्णं देवविमानम्। एषः प्रासादः पूर्वं न दृष्टः, पुस्तकेषु न श्रुतः। सर्वथा महाश्चर्यकारी अयं प्रासादः।

इतश्च ताम्रचूडेन राज्ञा स हस्तात्तः श्रुतः। श्रुत्वा महाकौतुकपूर्णहृदयः विलोकनार्थं चचाल राजा। यावत् निजपरिवारेण सहितो राजा तस्मिन् प्रासादे आरोहति, तावत् स्फाटिकभित्तिरचनात् न लभते मार्गं, सर्वं तेजोमयमिव दृश्यते। ततो राज्ञा महता कष्टेन लब्धो मार्गः। राजा तस्य प्रासादस्य शिखरे सिंहासनोपविष्टं तं दिव्यरूपं दिव्याभरणधारिणं विद्याधरं ददर्श। तथाविधं दृष्ट्वा राज्ञो मनसि विस्मयो बभूव।

इतश्च तस्य विद्याधरस्य अमात्यो बुद्धिसागर-

---

१ भूपीठं—भूमेरधस्तात् कियद्दूरपर्य्यन्तं यत् मूलं स्थाप्यते, यस्योपरि गृहं निर्म्मीयते, तत् भूपीठं।

Digitized by Google

नामा विद्याधरसुभटसहितस्तत्र आगतः। बुद्धिसागरो राजानं प्रणम्य उपविष्टः। सर्वे विद्याधरसुभटा यथास्थानं उपविष्टाः। अत्रान्तरे विद्याधरैर्नाटकं प्रारब्धं,तद्दृष्ट्वा सर्वोऽपि नगरनिवासी लोको विस्मितः, ताम्रचूडोऽपि विस्मयं गतः। सर्वे सकौतुकं एवं कथयन्ति। पूर्वं कुष्ठी साम्प्रतं एवंविधरूपधरः कोऽयम्? किं इन्द्रः, किंवा कन्दर्पः, किंवा नारायणः, किंवा बलदेवः, किंवा धनदनामा यक्षः? यावत् ताम्रचूड़प्रमुखः सर्वोऽपि लोकः एवं वितर्कयति, तावत् एकेन विद्याधरसुभटेन एषा गाथा पठिता——

जय वैताढ्यनगाधिप ! जय बहुविद्याविजितप्रतिपक्ष !
जय प्रणयिजनवत्सल ! जय जय श्रीकनकरथ भूप !

एनां गाथां श्रुत्वा लोकैरिति चिन्तितं, निश्चितमयं विद्याधरेन्द्रः; केनापि कारणेन स्वरूपं विहाय कुष्ठी इह आगतः। तावत् एषा सत्यमञ्जरी राजपुत्री धन्या कृतपुण्या, यया विद्याधरस्वामी अयं भर्त्ता प्राप्तः। अथ कनकरथराज्ञा स्वयं उत्थाय ताम्रचूड़स्य राजासनं दापितम्। अत्रान्तरे राजपत्नी सत्यमञ्जरीमाता धारिणीनाम्नी सा तत्र आगता। सत्यमञ्जरी ताम्रचूड़ं स्वपितरं प्रणम्य जल्पे, तात!

Digitized by Google

त्वया कुत्सितशरीराय कुष्ठिने अहं दत्ता, ममभाग्य-प्रभावात् सोऽपि अमरकुमारोपमो जातः।

तत् तात! तव वचनं सत्यं, किंवा मम वचः सत्यम्? राज्ञा भणितं,पुत्रि! तव कथितं सत्यं,नास्ति सन्देहः। इयन्तं कालं यावत् अहं आत्मकुग्रहेण(१) विडम्बितः। अद्य मे ज्ञातं, सर्व्वस्य स्वकर्म्म प्रमाणम्। ततश्च ताम्रचूडेन राज्ञा विद्याधरः प्रत्यक्षः,स्वामिन्! यूयं केन कौतुकेन एवंविधं रूपं विधाय अत्रागताः। ततो विद्याधरेण आमूलचूलं(२) निजवृत्तं राज्ञोऽग्रे कथितम्। राजा तत् श्रुत्वा हृष्टो बभूव। ततो विद्याधरो राजानं प्रति प्राह, राजन्! अनुजानीत(३) मां, यथा निजपुरं गच्छामि। ततो यौतुकदानैस्तं विद्याधरेन्द्रं सन्तोष्य राज्ञा स्वपुत्री उक्ता, वत्से! समयान्तरे पुनर्दर्शनं दद्याः। इत्युक्ता तौ विसर्जितौ स्वनगरम्प्रति।

सम्पूर्णम्।

—०—

१ आत्मकुग्रहेण—आत्मनः कुग्रहः अशुभग्रहः मङ्गलादिकः तेन। यद्वा स्वस्य कुग्रहेण दुष्टेन ग्रहेण आग्रहेण।

२ आमूलचूलं—मूलञ्च चूला च मूलचूले तत्पर्य्यन्तं आमूलचूलं। चूला—चूड़ा डलयोर्नास्ति भेदः।

३ अनुजानीत—गौरवात् बहुत्वम्।

Digitized by Google

SA´HITYAPARICHAYA

PART. I.

ENGLISH TRANSLATION.



STORY OF LEARNED FOOLS.

Then on being again brought down, the Vampire related another story—Please your majesty, in olden times, in the Deccan, there was a town named Brahmapura. There lived a brâhman of the name of Vishṇusvámin. He was very poor. He had four sons. Sometime after, Vishṇusvámin having died, his four sons, to keep body and soul together, went over to the house of their maternal uncle. But finding them poor, the uncle did not receive them. Then they made an attempt to put an end to their existence ; when some good man, dissuading them from it, said—"Sons of a bráhman ! do ye acquire knowledge ; then all kinds of happiness will ensue." On hearing that, they gave up the idea of suicide, and went away to acquire knowledge.

Sometime afterwards, they all becoming proficient in learning, met together and questioned each other—the first man said "I know the science of collecting the bones of the dead". Another said—"I know the science of causing the circulation of the blood". The third observed—"I know the science of collecting the nails, hairs, and tooth." The fourth exclaimed—"I know the science of reviving the dead." Desi-

Digitized by Google

rous to test their knowledge, they, coming by the bones of a tiger, imparted life to it. The tiger thus restored to life, devoured all the four. "Now say, O king!" asked the vampire, which of them, will incur the sin of murder?" "Hear, O vampire," replied the king, "he who gave the life will be the real murderer." The king, having spoken thus, the vampire again stuck up to the Sinsapa-tree.

STORY OF AN ASCETIC.

Then on being again brought down, the Vampire related another story. Please your majesty, in the country of Kalinga, there was a city named Yajnasthala. A bráhman of the name of Yajnasoma lived there. His wife was Somadattá. On her he begat a son named Brahmasvámin. He, after having become versed in the truths of all the sciences, came by his death through the dispensations of fate. Then his parents, together with their friends and relatives bewailing much, came to the burning-ground for performing the rites of cremation.

At that very time, an ascetic, who lived in the place of cremation, having beheld the bráhman-lad who was versed in all the sciences and was of a most beautiful person, cried aloud with a plaintive voice; and (then) danced merrily. Then getting up abruptly, he by the exercise of supernatural powers quitted his worn-out frame and entered the corpse of the Bráhman-lad. The boy having risen (as if) from a sleep, his parents were in a rapture; and all their friends felt delighted. Brahmasvámin being thus restored to life, renounced all kinds of pleasures, and passed his time in religious meditation. "Please your majesty, (asked the vampire) tell me the reason why the ascetic, the dweller of the burning-ground, cried and why also he danced." "Listen O, vampire," replied the king, "he cried, thinking that he should have to abandon a body in

Digitized by Google

which he had dwelt long ; and he danced, thinking that by quitting a worn-out body he should receive that of a twice-born, which was the receptacle of all virtues."

STORY OF A HERO OF COMPASSION.

Then on being taken down again, the Vampire related another story. Please your majesty, there is on the banks of the Narmadà, a town a named Dharmapura. There was a king named Jímútaváhana. Once upon a time as the king sat at his ease with his ministers, a lady cried in plaintive strains. On hearing her lamentations, he ordered the door-keeper saying, "warder, go and enquire who is crying." Having gone thither he said—"who art thou, mother ! why dost thou mourn." "O child !" replied she, "I am a mother of Nàgas. Eight of my sons have been devoured by Garuda; and here is only one son surviving. Garuda desired to eat him too out of spite, and hence I am bewailing." Then the warder returned and informed the king of everything, saying, "Please your majesty, she is the mother of a Nága called Sankha and mourns in apprehension of her future grief for her child. For, eight of her sons have been devoured by Garuda ; and she has only one son surviving ; but Garuda desires to eat him also out of spite."

On hearing that, the king said, "Warder, go and tell her that I will insure the safety of her son ; but she must take me along with her, after having ascertained the time of Garuda's arrival." Having heard that the warder departed and told the mother of the Nágas, "O mother of Nágas ! the king will protect thy son; but as soon as Garuda arrives, thou shouldst inform his majesty of it." Having said that, he departed. Then at the time of Garuda's arrival, she conducted Jímútaváhana, most virtuous of kings, who presented his own body to Garuda. Then Garuda ate one of the sides of the king's

Digitized by Google

person. After that, turning himself up and presenting his other side to him, the king said "Thou high-minded lord of birds ! do thou eat at thine ease this side of mine also, and then return to thy place." On hearing this, Garuda reflected much and said within himself in great astonishment—"Who is this glorious person, whom I, a vile wretch, have devoured ? Others expire at my very sight ; but he, though being eaten, utters words like these with serenity. In particular he is seen wearing the sacred thread. I have therefore killed a brâhman." Having mused thus, Garuda said to him, "O magnanimous being ! art thou a bráhman ? "I am not a bráhman" replied the king ; "banishing all misgiving, do thou eat me." "Art thou a Kshetriya ?" rejoined Garuda. "On hearing that the king remained silent. Garuda said to him again—"O magnanimous being ? I have made out thy caste ; but tell me, scoundrel that I am, thy name." At his most pressing request, the king replied, "O lord of birds ! I am king Jímútaváhana." "Surely I devour Nágas" exclaimed garuda, "but why hast thou caused thyself to be eaten." Thus questioned he replied, "Lord of birds ! thou hast devoured the eight sons of Sankha's mother ; and only one of her sons survives ; but thou seekest to eat him too. Hence she mourns. I have therefore presented my body to thee on account of a promise (made by me) to protect him." He heard that and was (very) sorry, and then descended into the nether world, brought nectar and was ready to heal the body of Jímútaváhana, when the king exclaimed—"O lord of birds ! if such is to be the case, then first of all restore to life the young Nágas and then thou wilt do whatever (seems) proper to thee." Feeling delighted at these words, he first restored them all to life, and then made him revive. Now, the mother of the Nágas with her nine sons, rejoicing much, took up her abode in that very place without fear. Jímútaváhana too came back to his own palace.

Digitized by Google

"Please your majesty, (quoth the vampire) tell me, between Jímútaváhana and Garuda, which is the more glorious." "Listen, O sprite," replied the king, "thinking that the lord of birds would not devour him, as he wore the sacred thread, and specially as he bore no grudge against him (Garuda), thinking also that he would acquire great merit by extending his protection to the Nága's sons, Jímútaváhana presented his body to Garuda. But Garuda is eminently glorious." The king having spoken thus, the Vampire again stuck up to the Sinsapà-tree.

A DIFFICULT RIDDLE.

Then the king, jumping from one branch to another, pressed hard the vampire and stood (a while) on a certain branch catching hold of him. Unable to take him down by tying him up (with a string), he cut off the bough with his scimitar and placing him on his shoulder together with the bough, began to walk in silence to the presence of Kshántisíla. Nevertheless, the Vampire put to him a question most difficult to solve. Please your majesty, in the southern regions, there lived a king named Dharmasena. Chandrávatí was his queen consort, on whom he begat a daughter, named Vilásavatí. Once on a time, the ruler of Sinhala came to conquer Dharmasena. Now, between those two kings a contest ensued. Dharmasena subdued by his more powerful foe, the lord of Sinhala, abandoned his dominions and mounting a steed went into a forest. Receiving the tidings of this, his queen consort, Chandrávatí, took her daughter Vilásavatí (with her) and fled to a wood. To that very wood, a Kshetriya, named Prachaṇḍasinha, accompanied by his son, came for hunting the deer. Noticing the foot-prints of two ladies on the muddy pathway, he thus addressed his son, "O my son! here are seen foot-prints of

Digitized by Google

two beautiful fair ones; should they be found out, then she, who has the larger feet, will be my wife, and she, who has the smaller, will be yours." On hearing that, his son gave his assent. Then by following the foot-marks, they tracked Chandràvatí and Vilàsavatí to a tank, through the dispensations of fate. The lady with the larger feet, was espoused by Prachaṇḍasinha, and the one with the smaller, by his son. In course of time they begat two sons on them. "What will be the relationship between these two boys? Please your majesty, mitigate your anger and remove my doubts." Having heard that, the king was quite unable to reconcile their (conflicting) relationship, and thinking that there was no fault in not returning an answer when he knew it not, he went on to the presence of Kshàntisila in complete silence.

STORY OF A MUSICIAN.

In the city of Gorakshapura there lived a king named Udayasinha. He was an admirer of all virtues, and was discerning and generous. Hence the learned resorted to him. One day, a musician, named Kalánidhi, (a receptacle of the fine arts) arrived there from the state of Tírahuta. While singing songs at the time of the worship of the king's (household) idols, he was lauded by all those who were in the king's audience-hall, and rewarded by the king with gold. Hearing his praise, and observing his reward, the native musicians became angry, and traduced him out of jealousy. "Please your majesty," they said to the king, "that musician is a foreigner, and is the "receptacle of the fine arts only in name. He knows nothing of music; why then does your majesty reward him. For——

> The ignorance of a king is as much (exhibited) before the world in neglecting the learned, as in rewarding dunces."

Digitized by Google

"Oh" musicians" replied the king, "by the singing of this man my soul becomes bathed in nectar, as it were, and therefore I give him reward. Why do you say what is oppsed to experience." "As he has no worth," replied the musicians ; "so let your majesty judge between his and our performances in your audience-hall." "Kalànidhi !" asked the king, "do thou give a reply to their speech." "Please your majesty" replied Kalànidhi, "this is not the fit time to give a reply, or to sing a song; for——

> While Harasinhadeva was my hearer, then O king ! I sang ; for the black bird warbles not his best air (the fifth note) with his sweet voice, when the spring has passed away.'

"Please your majesty" replied the musicians, "his vanity is excessive ; let your majesty then judge (between ourselves)." 'Oh !" exclaimed the king, "the people of Tírahuta are naturally very vain of their worth." "Please your majesty," said Kalànidhi, I am not a vain man ; but I speak the truth. Should I sing, and should your musicians sing, who will judge of the difference of our performances ? For——

> There were two persons who were versed in the science of music, the god, Hara, and Harasinhadeva. Now Harasinha having gone to heaven, there is only Hara, the master of music.

If that supreme lord, coming down in person, judge (between ourseleves), then shall I sing in competition with others."

"The great lord" said the musicians, "is certainly invisible (1) and this gentleman does not approve of other umpires ; hence the fact of his recognizing no umpires, is to be considered as a sign of his defeat."

---

(1) Literally, attainable with difficulty.

Digitized by Google

"If so" demanded Kalànidhi, "you (had better) appoint an umpire, and I will sing before him."

"A native umpire," replied the musicians, "would be regarded by you as partial to us. Hence we would sing before the deer, for they understand music, and would not be biased in favor of either party."

"The deer," rejoined Kalànidhi, "though they are beasts, are fond of music, but they would be moved by any kind of performance. If beasts are to be admitted as umpires, let then the kine be so appointed. The condition will be, that he alone will be the musian, deserving of reward, by whose songs the kine tormented with thirst, and going in search of water, will refrain from drinking it, and come back from near the tank in their eagerness to enjoy the music." Then accordingly as the trial was being proceeded with, Kalànidhi triumphed, and received marks of royal favor (was honored by the king).

STORY OF A BORN FOOL.

१ फले—कार्य्याकार्य्यनिर्णयरूपे सविद्यसादृश्यात् विदुषां तुल्यत्वात् । लोकविद:—having the knowledge of the world, contradistinguished from one who is versed in literature.

2. Kusumapura—"The city of flowers"—It is another name for Pátaliputra, the mordern Patna. In the drama of Mudrárákshasa, this name is always used, while Pátaliputra or Palibothra is the appellation mentioned by Megasthenes, the ambassador of Seleucus in the court of Chandragupta. Hence it follows that the latter was the ancient, and the former the medieval name of the modern city of Patna.

Digitized by Google

सर्व्वेषामस्माकमाहारसिद्धिर्न सम्भवत्येव। ततः स खादतु शत्रुशरावं, योऽस्य वैरस्य प्रत्युद्धारे समर्थो भवति। परिवारेणोक्तं, आर्य्य! यदि भवान् जीवति तदा चरमे तस्य वैरस्य परिवारसंहारसम्भवस्य प्रत्युद्धारः सम्भवति। ततः सकलपरिवाराणां परामर्शेण शकटार एव तदन्नं खादित्वा स्वकीयं जीवनं रक्षितवान्। परिवारास्तस्य मृता एव।

एकदा स राजा नन्दः प्रस्रावगृहाभ्यन्तरस्थितं कुर्व्वन् बहिर्बभूव। तं हसन्तं दृष्ट्वा पानीयपरिचारिका तदानीं तत्रावस्थिता विचक्षणानाम्नी चेड़ी जहास। ताम् हसन्तीमवलोक्य राजोवाच, रे विचक्षणे! कुतो हससि? विचक्षणोवाच, यतो देवो हसति। राजोवाच, मया कुतो हस्यते। विचक्षणोवाच, देव! तदहं न जानामि। राजोवाच, भाः कपटिनि पापे! त्वयैवोक्तं, यतो देवो हसति ततोऽहमपि हसामि। त्वमेवाभिदधासि, यत्तदहं देवस्य हासकारणं न जानामि। किमेतन्ममापि पुरतः परस्परविरोधिनी वचने कथयसि। यदि स्वहितमिच्छसि, तदा कथय सत्वरं ममहासबीजं, नोचेत्तदा शास्तिं करिष्यामि। ततो राज-

Digitized by Google

कोपभीतया भणितं, देव! सद्यः कथयितुं न शक्नोमि एकमासाभ्यन्तरे कथयिष्यामीति।

ततो लब्धावसरा सा दासी चिन्तयामास, यत् सुबुद्धि(१)परामर्शपरिच्छेद्यमेतत्। ततः सुबुद्धिं कमपि पृच्छामि। सुबुद्धिषु प्रथमगणनीयः शकटारः, स चेदानीं भागधेयदोषतः कारागृहे विद्यते। ततस्तमेव गत्वा पृच्छामि। इति परामृश्य तत्र गतवती। तत्र च कारागृहदुःखदुर्ब्बलं शकटारं मिष्टान्नपानैः परितोष्य तावद्वृत्तान्तमपृच्छत्। शकटार उवाच, विचक्षणे विना देशकालानुसारिणा(२) प्रकरणज्ञानेन(३)परिच्छेत्तुं न शक्यते राज्ञः स्मितकारणं, तदवसरं(४)कथय। विचक्षणावसरं कथितवती। शकटार उवाच, त्वं कथयसि, यन्मूत्रप्रवाहं दृष्ट्वा अश्वत्थवृक्षं

---

१ सुबुद्धीनां यः परामर्शः उपदेशः तेन परिच्छेद्यं निर्णेतव्यं।

२ विना देशकालानुसारिणा—यस्मिन् स्थाने यस्मिन् काले च काचित् घटना सम्भवति, तस्य स्थानस्य तस्य कालस्य च अनुसारिणा अनुयायिना।

३ प्रकरणज्ञानेन—प्रसङ्गज्ञानं विना; तत्तद्व्यापाराणां मध्ये पौर्व्वापर्य्यसङ्गतिज्ञानं विनेत्यर्थः।

४ तदवसरं—तस्य स्मितस्य अवसरं समयविशेषं। यस्मिन् समये स्मितं चकार तं।

Digitized by Google

पश्यन् राजा जहास। तर्हि पूर्व्वदृष्टस्य कस्यापि वस्तुनः स्मरणं न हासनिमित्तम्। तदिदानीं वृक्षं दृष्ट्वा मनसस्तदासन्नत्वेऽपि (१) प्रकृत एव वृक्षधर्म्मो न हासनिमित्तं हासस्य वस्तुविकृति(२) दर्शनजन्यत्वात्। किन्तत् विकृतं दृष्टं राज्ञा अश्वत्थवृक्षे ? आं ज्ञातं। मूत्रप्रवाहवहदश्वत्थबीजं क्षुद्रतरं दृष्ट्वा तदुद्भूतं महापरिमाणं वृक्षं पश्यन् परामृष्टवान् राजा, यदहो वैकृत्यं(३)विधातुः प्रपञ्चस्य(४)। क्वेदं बीजं क्वायन्तरुः तदुद्भवः(५)। एवं परामृश्य हसितं भूपालेन पुनः पुनः। शकटारस्तदेव निर्द्धार्य्य अब्रवीत्। विचक्षणया च तदेव वचनं गत्वा राज्ञः पुरस्तादुक्तं। राजोवाच, विचक्षणे ! सत्यं कथय शकटारो जीवन्नपि वर्त्तते।

---

१ तदासन्नत्वेपि—दर्शनात् परं राज्ञश्चित्तं वृक्षविषयिण्या चिन्तया युक्तं। तथापि प्रकृतः स्वाभाविकः वृक्षधर्म्मः अश्वत्थवृक्षस्य गुणः उच्चत्वचञ्चलदलत्वादिरूपः।

२ वस्तुविकृतिदर्शनजन्यत्वात्—हासः वस्तूनां स्वाभाविकैः गुणैः नोत्पद्यते ; किन्तु स्वभावस्य अन्यथाभावदर्शनेन जायते एव।

३ वैकृत्यं—विकृतिरेव वैकृत्यं स्वार्थे ष्यञ्।

४ प्रपञ्चस्य—प्रपञ्चरूपस्य सृष्टिकार्य्यस्य। प्रपञ्चः विस्तारः चित्यतेजोमरुदाकाशानां पञ्चीकरणं वा।

५ तदुद्भवः—तस्मात् बीजात् उद्भवति यः सः तथोक्तः।

Digitized by Google

विचक्षणोवाच, अथ किं ? राजोवाच, कोऽन्यः शकटारादिदं निर्द्धारयितुमलञ्चवति ? अहो तर्कः(१) शकटारस्य ! ततस्तर्कपरितुष्टेन राज्ञा शकटारः पुनरानीय सम्मानपात्रं कृत्वा राज्यचर्च्चायां मन्त्रिराक्षसस्य द्वितीयः कृतः। शकटारस्तु तां पदवीमासाद्य चिन्तयामास, अहो दुर्नीतिरस्य राज्ञः ! सकलपरिवारं मम हत्वा मामेव मन्त्रिपदव्यां स्थापयति, मूलमुत्खन्य दले जलं ददाति । तथाहि——

उत्कटं वैरमुत्पाद्य पुनर्यो मैत्रमिच्छति।
यमपक्षनयावायाः स पन्थानमवेक्षते ॥

कथं वा मम पापि मनः प्रत्येति दुष्टाशयेऽस्मिन्।

यतः——

दृष्टा वैरक्रिया यस्य पुरा पर्य्यन्त(२)गामिनी।
तस्मिन् विश्वासमायान्तं मृत्युर्व्रजति मस्तके ॥

तदिदानीं किमुचितम् ? पुरातनस्य वैरमिदानीन्तनञ्च सौहृदं चिन्तयन् सन्दिग्धचित्तोऽस्मि । किं करवाणि ? अथ वैरोद्धारार्थमेव तदापि जीवनं

---

१ तर्कः अनुमानं। Reasoning.

२ पर्य्यन्तगामिनी—पर्य्यन्तं चरमसीमानं परां काष्ठां गच्छति या सा। विश्वासमायान्तं विश्वस्तं जनं।

Digitized by Google

स्वीकृतं यदानेन दुरात्मना भूस्वामिना पश्यतो(१) मम पुत्रादयो हताः। तद्यथा——

सर्व्वस्वं गतमेव गच्छतु नृपं (२) ग्लानिश्च सा मामकी,
लक्ष्मीः प्रच्युतिनिश्चयैव सुधियः शोचन्ति के तां गताम्।
ते पुत्राः सदसि प्रगल्भ(३)वचसस्ताः सानुरागाः स्त्रियो,
नप्तारः किल ते च चारुचटुलास्तेति न स्वन्ति मे॥

तद्दैरम् अवश्यमुद्धरणीयम्। तथाप्यपयशो विनिवार्य्य येन वैरमप्युध्रियते, तेनाधमपुरुषपदवी न प्राप्यते। तथाहि——

पापात्त्रस्यति यः स एव पुरुषः स्यादुत्तमो भूतले,
पापात्मापि बिभेति योऽपयशसः स ज्ञायते मध्यमः।
वासो यस्य न पातकादपि न वा लज्जापराधादपि,
प्रज्ञावद्भिरुदाहृतोऽयमधमः सर्व्वत्र निन्दाष्पदम्॥

इति चिन्तयन्नेव स मन्त्री कदाचिदाराम-दर्शनकौतुकेन तुरगारूढो भ्रमन् पुराद्बहिः किय-

---

१ पश्यतो मम पश्यन्तं माम् अनादृत्य। अनादरे षष्ठी। Before my eyes, under my very nose.

२ गच्छतु नृपं—तत्सर्व्वस्वं नृपं गच्छतु, नृपो मम सर्व्वस्वं गच्छातु। किञ्च तेन सर्व्वस्वेन सह ग्लानिः धनजनितं मे मनोमालिन्यमपि नृपं गच्छतु।

३ प्रगल्भवचसः—वाग्मिनः। चारुचटुलाः—चारवः सुन्दराः, चटुलाः चञ्चलाः क्रीड़ाचपलाः, प्रियभाषिणो वा। चटु (प्रियवाक्य) + ल (अस्त्यर्थे)।

Digitized by Google

त्यपि दूरे कुशानुत्खाय तन्मूले तक्रं ददानमेकं ब्राह्मणं ददर्श। तं दृष्ट्वा शकटार उवाच, वटो कस्त्वं, किमत्र कुरुषे ? वटुरुवाच, चाणक्यशर्म्मा ब्राह्मणोऽहम्। साङ्गं(१)वेदमधीयानेन पथा विवाहार्थितया गच्छतो मम कुशाङ्कुरेण पदे क्षतं कृतं, तेन क्षतेन विवाहभङ्गः संवृत्तः। अमर्षितस्तदा प्रतिज्ञां कृतवानस्मि,यदस्याः स्वस्याः कुशं निर्मूलं करिष्ये। ततो वृक्षायुर्व्वेदाधिगमः(२)कृतः। नोचेत् प्रतिज्ञापूरणं कथं स्यात्? तदयमभ्युपायः सुकरो निर्द्धारितः, यत्तक्रेण कुशा विनश्यन्तीति। तथा समाचरन् पूर्ण-प्रतिज्ञो भवामि। शकटार उवाच, दिष्ट्या(३) भवता वृक्षायुर्व्वेदाधिगमः कृतः। नोचेत् प्रतिज्ञापूरणं कथं स्यात्? चाणक्य उवाच,यद्ययमुपायो न स्यात् तदाभिचारिक-(४) कर्म्मणि मम प्रवीणतास्त्येव। ततः कुशविनाश-

---

१ साङ्गं—अङ्गैः सह। अङ्गानि खलु—शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः। छन्दसां निचितिश्चैव षडङ्गो वेद इष्यते। शिक्षा—orthoepy; कल्पः—ritual; व्याकरणं—grammar; निरुक्तं—derivation; ज्योतिषं—astronomy; छन्दः—versification.

२ वृक्षायुर्वेदाधिगमः—वृक्षाणाम् आयुर्वेदः जीवनविषयकं शास्त्रं तस्य अधिगमः अध्ययनम्। Study of botany.

३ दिष्ट्या—भाग्येन, आनन्देनेत्यव्ययं। happily.

४ आभिचारिककर्म्मणि—अभिचारः मारणवशीकरणोच्चाटनरूपः स प्रयोजनमस्य आभिचारिकं तादृशं कर्म्म तस्मिन्।

Digitized by Google

कामनया होममेव करिष्ये। तदाकर्ण्य शकटार-श्चिन्तयामास अहोऽस्य ब्राह्मणस्यामर्षः! अहो उपाय-प्रवीणता! यद्ययं मम वैरिणो वैरी भवति तदाहं वैरोद्धारकर्म्मणि विनायासेनैव कृतार्थो भवामि। ततः शकटारस्तत्सहितः कुशीलूनं कृत्वा तं ब्राह्मणं स्वकीयागारमानीतवान्। पश्चात् पुरो-धसा समं संप्रधारणां (१) विधाय राज्ञः पितृत्रयाह-श्राद्धे(२) तं पात्रत्वेनोपनीतवान्, परामृष्टवांश्च, यदयं ब्राह्मणोऽकृतविवाहः कपिलः (३) श्यावनखदन्तः पात्रानर्ह एव। विशेषतो मम विरोधिना मन्त्रिराक्ष-सेन मयोपन्यस्तोऽयमिति(४)निश्चितमपमानयितव्यः। अथ रात्रि श्राद्धं कर्त्तुमुद्यते ब्राह्मणे च पात्रासन-निषण्णे(५), मन्त्रिराक्षसः "देव! नायं ब्राह्मणः पात्र-

---

१ सम्प्रधारणां सम्यगवधारणं बन्दीवस्त इति भाषा।

२ पितुर्मृत्युदिनकर्त्तव्ये श्राद्धे, एकोद्दिष्टश्राद्धे।

३ कपिलः—पिङ्गलः। श्यावनखदन्तः—श्वेतनखदन्तः। एतदुप-लक्षणम्।

४ उपन्यस्तः—स्थापितः, आहूतः।

५ पात्रं भाजनविशेषः—श्राद्धकाले यस्मिन् भाजने विविधानि खाद्यानि सज्जीकृत्य पितरमुद्दिश्य निवेदितानि भवन्ति, तत् पात्रम्। एकोद्दिष्टश्राद्धे तादृशमेकं पात्रं दीयते; पार्व्वणे तु पञ्च त्रीणि वा

Digitized by Google

योग्य" इत्यभिधाय, तत् साधकानि(१) पठितवान्, उवाच च, शकटारः शूद्रः कथमिदमपि कार्य्यमनुसन्धाय राज्ञो धर्म्माधर्म्मं कुरुते ? तच्च मन्त्रिराक्षसस्य वचनं श्रुत्वा जातामर्षेण नन्देन राज्ञा दुर्दैवदेशितेन पात्रासनादवतार्य्य साधिक्षेपं (२) ब्राह्मणश्राणक्यो बहिर्निःसारितः। ततश्च तं चाणक्यं तथाविधापमानक्रुद्धं नन्दबधे कृतप्रतिज्ञं विज्ञाय शकटारो मन्त्री कृतकृत्यो देहत्यागाय वाराणसीं जगाम। तथाहि——

विचक्षणा परिव्राता चाणक्यश्च परीक्षितः।
बुद्ध्यैव शकटारेण वैरमुद्धृतमग्नता (३) ॥

पाचानि कल्प्यन्ते। यः कश्चित् ब्राह्मणः आहूतः श्राद्धविधेः साक्षित्वेन सदस्यत्वेन च स्थापितो भूत्वा पितृरुद्देशे दीयमानं द्रव्यादिकं गृह्णाति, सोऽपि यथोचितगुणयोगात् पावमित्यभिधीयते। नन्दराजसमये एषा प्राचीनरीतिरनुसृता आसीत्। आधुनिकैस्तु दर्भमयं ब्राह्मणं स्थापयित्वा श्राद्धकर्म्म क्रियते।

१ तद्यथा—श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥ श्रेष्ठो यामस्य राज्ञस्य कुलस्यो स्यादनुत्तमः। प्रतिरोद्धा गुरोर्यश्च त्यक्ताग्निर्वार्द्धुषिस्तथेत्यादीनि वचनानि। see Manu, chapter 3,. sloka. 128—68.

२ साधिक्षेपं—सनिकारं सतिरस्कारम्।

३ वैरमुद्धृतमग्नता—अग्नता प्राणिवधं अकुर्व्वता वैरं उद्धृतं वैरनिर्य्यातनं कृतम्।

Digitized by Google

अथोभयविद्याकथा ।

वेदमभ्यस्यती यस्य मतिर्लोके न हीयते ।
वेदे लोके च यी दक्षः स खादुभयपण्डितः ॥

आसीत् कुसुमपुरे नन्दो नाम राजा । तेन पितृत्तयवासरे श्राद्धं करिष्यमाणेन सचिवदोषाच्चाणक्यशर्म्मा ब्राह्मणः पात्रत्वेनाहूय प्रकोपितः । क्रुद्धस्तु चाणक्यः प्रतिज्ञां कृतवान् । तद्यथा——

यावन्न प्रहिणोमि नन्दभवनीनाथं यमस्यालयं
यावन्नाव नृपं करोमि वृषलं तस्यैव सिंहासने ।
यावच्चास्य तु मन्त्रिराक्षसमहं नामात्यतामानये (१)
मुक्तां मूर्द्धि शिखां न तावदशमी(२) बध्नामि चैनां पुनः ॥

एवं कृतप्रतिज्ञः स चाणक्यश्चन्द्रगुप्तनामानं(३) वृषलं द्वारि दृष्ट्वा अवोचत्, रे वृषल! यद्यस्मिन् राज्ये राजा भवितुमिच्छसि तदा मामनुगच्छ । वृषल-

---

१ आनये—आ + नी + (लट्) ए । यावच्छब्दयोगात् सर्व्वत्र भविष्यत्काले लट् ।

२ अशमः—शान्तिरहितः, अनन्यकर्म्मा इत्यर्थः । बध्नामि—भविष्यत्सामीप्ये लट् ।

३ चन्द्रगुप्तः—नन्दराजेन मुरानाम्न्यां दास्याम् उत्पादितः । अतोऽसौ मौर्य्य इत्यभिहितः आसीत् । अस्य सन्ततिश्च मौर्य्यवंशाख्यया ख्यातिमासस्राद ।

Digitized by Google

स्तथाविधशुभादृष्टप्रेरितस्तमनुजगाम। चाणक्यस्तु तेन वृषलेनानुगम्यमानस्तपोवनं गत्वाभिचारिकेन होमेन नवापि नन्दान् यमनिकेतनं नीतवान्। ततोऽसौ चिन्तयामास, यदेका तावत् प्रतिज्ञा पूर्णा। इदानीं तावत् चन्द्रगुप्तवृषलं नन्दसिंहासने राजानं कृत्वा द्वितीयां पूरयामि। राजा च विना सेनया कुतः सम्भवति? सेना च धनाधीना, धनञ्च संप्रति मम हस्ते नास्ति। किं करवाणि?

ततः परामृश्य पर्व्वतकेश्वरं राजानमुपसृत्योवाच, राजन्! पर्व्वतकेश्वर! कुमारोऽयं चन्द्रगुप्तो मया कुसुमपुरे राजा कर्त्तव्यस्ततो भवानिमं स्वबलैरुपकृत्यार्द्धं राज्यं गृह्णातु। पर्व्वतकेश्वरस्तु नन्दबधे दृष्टानुभावस्य चाणक्यस्य उद्यमे फलसिद्धौ जातप्रत्ययः, सकलबलसहितः नन्दप्रदेशं कुसुमपुरं गत्वा चन्द्रवृषलं राजानञ्चकार। लब्धराज्ये तु चन्द्रगुप्ते राक्षसप्रयुक्तेन पुरुषेणोपायनीकृता(१)सुन्दरी। चन्द्रगुप्तपुरतो नृत्यन्त्यास्तस्याः श्रमजलपानघूर्णमाना मक्षिका दृष्ट्वा विषकन्येयमिति(२) निश्चित्य चाणक्यः परिचिन्तयामास,

---

१ उपायनीकृता—उपहारत्वेन दत्ता।

२ विषकन्या—प्रथमं प्रतिदिनम् अत्यल्पमत्यल्पं विषं भुङ्क्ता, क्रियता

Digitized by Google

यदियं विषकन्या चन्द्रगुप्तवधाय राक्षसेन चरद्वारा प्रहितास्ति, तदनयैवार्द्धराज्यहरस्य वधो भवतु। तदनन्तरं तां विषकन्यां तस्यैव पुरुषस्य द्वारा पर्व्वतकेश्वराय दापितवान्। तस्याञ्च सहवास-वशात् तपस्विनि (१) पर्व्वतकेश्वरे मृते चन्द्रगुप्तस्य निष्कण्टकं (२) राज्यं जातम्।

चाणक्यः पुनश्चिन्तयामास, यदियं द्वितीया मम प्रतिज्ञा पूर्णा, तदिदानीं मलयकेतोः(३) भूपालस्य राज्याद्राक्षसं समानीय चन्द्रगुप्तस्य मन्त्रितां ग्राहयित्वा पूर्णप्रतिज्ञो भवामि। तदर्थ-मपि कृत एवाभ्युपायः। यद्राक्षसस्य प्रियमित्रं चन्दनदासो वसत्यत्रैव, तस्य स्थाने राक्षसस्य गृह-जनाः सन्त्येव। अन्यच्च धर्म्मपटधारिणा(४) पुरुषेण

कालेन सा तथा विषपाने अभ्यस्ता बभूव, यत् तस्याः शरीरं विषमय-मभूत्; तेन च तद्गात्रलिप्तः सरत्खे दविन्दुं पीत्वा मक्षिका म्रियन्ते स्म। इदमापाततः कविकल्पनमेव प्रतिभाति।

१ तपस्विनि—निरपराधे—poor.

२ निष्कण्टकं—न सन्ति कण्टकानि शत्रुरूपाणि यस्मिन् तथोक्तं।

३ मलयकेतुः—पर्व्वतकराजस्य पुत्रः। चन्दनदासः—मणिकार-श्रेष्ठी राक्षसस्य परमसुहृत्।

४ धर्म्मपटं—यमपटं।

Digitized by Google

राक्षसनामाङ्किता मुद्रा समानीय दत्ता। सा राक्षसहस्ताङ्गुल्यालिङ्गितेति (१) तया मुद्रयाङ्कितं शकटदासलिपि(२)भूषितं पत्रं मलयकेतुं सेवमानस्य मम सहाध्यायिमित्रस्य भागुरायणस्य (३) हस्ते प्रविष्टमेव। शकटदासोऽपि मया निःसारितो राक्षसमनुवर्त्तत एव। भद्रभटप्रभृतयः शूराः परमाप्ताः समयकृत्य(४)कुशला मया धनपरितोषिताः कृत्रिमविरोधं कृत्वेतः पलायिताः। संप्रति मलयकेतोर्विश्वासपात्रान्येव विद्यन्ते। अवश्यं तेन लेखनेन (५) तैः पुरुषैरस्मिन्नवसरे राक्षसमलयकेत्वोः सौहृदभङ्गकारिणा भवितव्यम्। तदेवं सम्पन्ने कारणकलापे (६) कार्य्यसिद्धिरपि नः सम्यक्प्राया (७)।

---

१ राक्षसहस्ताङ्गुल्यालिङ्गिता—सा मुद्रा अङ्गुरीयरूपा राक्षसहस्ताङ्गुल्या आलिङ्गिता धृता। इति श्रुत्या हेतोः तदङ्गुरीयकस्थितमुद्रया अङ्कितं पत्रं राक्षसेनैव लिखितमिति मलयकेतुना निश्चीयते स्म।

२ शकटदासः—अमात्यराक्षसपक्षपाती कायस्थः चन्द्रगुप्तप्रकृतिषु भेदप्रयोगकार्य्ये नियुक्तः।

३ भागुरायणः—सिंहबलदलनाम्नो नन्दराजसेनापतेः कनिष्ठभ्राता, चाणक्यपक्षपाती गूढचरः।

४ समयकृत्यकुशलाः—यस्मिन् समये यत् कृत्यं करणीयं तत् जानन्तः।

५ तेन लेखनेन—जालपत्रेण राक्षसमुद्रालाञ्छितेन।

६ कारणकलापे—कारणपरम्परायां, Chain of causes.

७ सम्यक्प्राया—प्रायेण सम्यक् सम्पन्ना, almost accomplished.

Digitized by Google

यतः—

सम्पन्ने कारणव्राते (१) कार्यं सम्पद्यते परम्।
प्रतिबन्धा यदा धाता न स्वादिदृङ्नियेष्टितः॥

धातापि संप्रत्यनुकूल एव लक्ष्यते। यतः——

नन्दा हृता राज्यमिदं गृहीतं नष्टोऽरिराज्यार्द्ध हरी विपक्षः।
लोकावशेषां किल मे प्रतिज्ञां मन्ये क्रमात् पूरयितेव(२) धाता॥

अथवा धातुश्चरित्रे क्वानुगतिः (३)? कस्यचिन्निस्तीर्णपारावारस्य तटान्तमागत्य नौर्निमज्जति। किन्तु यदायत्तं(४) ततो न प्रमाद्यामीति परामृश्य शार्ङ्गरवनामानं शिष्यमाहूयापृच्छत्, वत्स! चन्द्रगुप्तमभियोक्तुं गतप्रयाणस्य मलयकेतोः किं वृत्तम्? शार्ङ्गरव उवाच, आर्य! मलयकेतुरन्तिकमेवागतः। किन्तु मन्त्रिराक्षसस्य सनिकारं (५) निःसारणव्या-

---

१ कारणव्राते—कारणकलापे। प्रतिबन्धा—प्रति + बन्ध + लृट्। विघ्नकर्त्ता।

२ पूरयिता—पूर + णिच् + (लुट्) ता, पूरयिष्यति।

३ अनुगतिः—अनुगमः नियमः इत्यर्थः।

४ यदायत्तं—यत् आयत्तं स्वस्य अधीनं निजौद्योगेन साध्यं, ततः तस्मात् न प्रमाद्यामि प्रमत्तो भवामि। कार्यसिद्धिर्दैवाधीना; उपायायोजनन्तु पुरुषायत्तं, अतः तस्मिन् अवहितो भवामि।

५ सनिकारं—सतिरस्कारम्। निःसारणव्याहत्या—निष्काशनरूपया बाधया।

Digitized by Google

कृत्वा द्वित्राणि (१) दिनानि पथि विलम्बितोऽस्मि स राजा। चाणक्य उवाच, आः कथं राक्षसस्यापि निकारः! किन्तत्र निमित्तम्? शिष्य उवाच, गहनं खलु राजचरितं, क्वचिन्निमित्तनिरपेक्षापि(२) क्रिया सम्भाव्यते। राक्षसनिकारे त्विदं निमित्तं, यत् शकटदासलिपिविभूषितं पत्रं राक्षसमुद्राङ्कितं राक्षसानुजीविना (२) विपक्षस्थानं नीयमानं वर्त्मनि प्राप्तम्। चाणक्य उवाच, तदिदं स्थानमेव(३)निकारस्य। राजापथ्यकारिणो ध्रुवमेव निकारमनुभवन्ति। सनिकारं निःसारितो राक्षसः कुत्रेदानीं श्रूयते। शिष्य उवाच, मानभङ्गदुःखितः क्वाप्यरण्ये भविष्यति। चाणक्य उवाच, वत्स! घातकपुरुषेष्वभिधेहि, यच्चन्दनदासमानीय शूलमारोपयत। चन्दनदासं ब्रूहि यद्राक्षसः स्वकीयगृहजांस्तव मन्दिरे न्यासीकृत्य (३) कुसुमपुरग्रहणसमये पलायितस्तानानीय देहीति।

---

१ द्वित्राणि—द्वे वा त्रीणि वा (बहुव्रीहिः)।

२ निमित्तनिरपेक्षा—निमित्तं निरपेक्षते न अनुवर्त्तते या सा। कर्त्तरि अच्। न कारणानुसारिणी।

३ इदं स्थानमेव—इदं षड्यन्त्ररूपं निकारस्य स्थानम् अनुरूपकारणं।

४ न्यासीकृत्य—न्यासत्वेन स्थापयित्वा। न्यासः निक्षेपः गच्छित इति भाषा।

Digitized by Google

शिष्यस्तथा कृत्वा पुनरागत्य प्रणम्योवाच, आर्य्य! चन्दनदासो मित्रवत्सलो मरणमप्यङ्गीकुरुते, न राक्षसस्य गृहजनान् ददाति। राक्षसोऽपि तां वार्त्तामाकर्ण्य चन्दनदासबणिजः प्राणरक्षानुरोधेन बधस्थानमागत्य वदन्नस्ति (१), यदाचार्य्यः चाणक्यो मां यत् कुरुते तत् कुरुताम्। चन्दनदासबणिजं निरपराधं मदर्थं प्राणानुपेक्षितुम् उद्यतं परित्यजतु। चाणक्य उवाच, पूर्णा तर्हि मम प्रतिज्ञा, मन्त्रिराक्षसं ब्रूहि, यदि चन्दनदासस्य सुहृदः प्राणान् रक्षितुमिच्छति भवान्, तदा चन्द्रगुप्तस्य राज्ञो मन्त्रितामङ्गीकृत्य खड्गं गृह्णातु। शिष्य उवाच, किं करोतु राक्षसो वराकः। संप्रति चन्दनदासरक्षानुरोधपराधीन (२) एवाङ्गीकरिष्यति। दुरतिक्रमणीयो हि कर्म्मधारापाशबन्धः(३)।

---

१ वदन्नस्ति—कथयन् विद्यते। This is the progressive form in Sanskrit.

२ रक्षानुरोधपराधीनः—रक्षा एव अनुरोधः अपरिहार्य्यं कर्म्म तस्य पराधीनः परतन्त्रः।

३ कर्म्मधारापाशबन्धः—कर्म्मणां सुकृतदुष्कृतकर्म्मणां धाराः परम्पराः ता एव पाशाः रज्जवः तैः बन्धः बन्धनं। लोकैर्हि निजकृतस्य पापस्य पुण्यस्य च फलमवश्यमेव भोक्तव्यम्। तथाहि "मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम्॥"

Digitized by Google

तथाहि——

अङ्गीचकार किल वामनतां मुरारी रामोऽध्युवास वनमब्धिरवाह वन्यं ।
दन्तावला(१)दवसृणिव्यवसायरुद्धाः किन्नाचरन्त्यहह कार्यवशात् पुमांसः ॥

ततो मन्त्रिराक्षसश्चन्द्रगुप्तस्य साचिव्यमनभिमतमप्यङ्गीकृत्य खड्गं जग्राह। चाणक्यस्तु चन्द्रगुप्तं राजानं प्रति निश्चिन्तो बभूव। तावदेवं वेदाध्ययनसामर्थ्यान्नन्दं हत्वा लौकिककार्यदक्षतया चन्द्रगुप्तं नृपं राक्षसञ्च तन्मन्त्रिणं कृत्वा पूर्णप्रतिज्ञः शिखां बद्ध्वा सोल्लासः स्वाभिमतस्थानं जगाम।

रोषी यस्य कृतान्तपत्तनमिती(१) नन्दान्नव प्राहिणोत्
निर्बीजी(२) हषलाय नूनमभवत्तोषस्तु राज्यप्रदः।
स ख्यातः किल विद्यया च सकले बुद्ध्या च भूमण्डले
चाणक्यश्चतुराननः(३) प्रतिनिधिः केषां न वा गोचरः(४) ॥

---

५ दन्तौ एषां सतः दन्तावलाः। दन्त + वलच्। सृणिः अङ्कुशः तस्याः व्यवसायः क्रिया प्रहार इत्यर्थः तेन रुद्धा नियन्त्रिताः।

१ कृतान्तपत्तनमिती—कृतं शुभाशुभकार्यं अन्तयति सुखदुःखभोगविधानेन नाशयति इति कृतान्तः। यद्वा कृतं सृष्टं वस्तुजातम् अन्तयतीति कृतान्तः। अन्तात् तत्करोत्यर्थे णिच् (णिधु) ततः कर्त्तरि अच्। तस्य पत्तनं नगरम् इतः भूलोकात्।

२ निर्बीजः—नास्ति बीजं यस्य, अकारणः स्वतः सम्भूतः। spontaneous

३ चतुराननप्रतिनिधिः—चतुराननस्य ब्रह्मणः प्रतिनिधिः प्रतिरूपः, दुर्घटघटने पटुरित्यर्थः।

४ केषां न गोचरः—सर्वेषामपि लोकानां प्राचीनानाम् इदानीन्तनानामपि गोचरः श्रुतिगोचरः।

Digitized by Google

दानधर्म्मकथा।

जम्बुद्वीपेऽत्र भारते श्रीवासो नाम पत्तनम्। तत्र नरवाहनो नाम राजा, तस्य कमला नाम पट्टमहादेवी (१)। तयोर्मातापित्रोर्नेत्रानन्दनो ललिताङ्ग इति नाम नन्दनोऽजनि। सर्व्वकलाकुशलोऽतीव विद्यावान् विवेकवान् गुणज्ञः, बालोऽपि विदुषां मनसि उवास। 'देवगुरुपितृमातृप्रमुखसर्व्वस्वजनानां भक्तिमान्, परम् अतीव दानेश्वरः(२)! याचके दृष्टे तस्य महती प्रीतिः।

गलितेव तिथिस्तस्य चित्ते मास इवाधिका।
तद्दिनं गणनां नैति यस्मिन्नार्थिसमागमः (३)॥

अथ सज्जन इति नाम सेवकस्तस्य मित्रमभवत्। नाम्ना सज्जनः परन्तु परिणामेन(४) दुर्ज्जनः। अन्यदा

---

१ पट्टमहादेवी—पट्टे राजासने या महादेवी कृताभिषेका राज्ञी।

२ दानेश्वरः—दानकार्य्ये समर्थः।

३ यस्यां तिथ्याम् अर्थिसमागमो न जातः, सा तस्य सज्जने गलिता च्युता नष्टा इव। सा तिथिः तस्य चित्ते मास इव अधिका दुःसहक्लेशजननात् तादृग् दीर्घा। यस्मिन् दिने अर्थिसमागमो न, तत् दिनं गणनां न एति प्राप्नोति, तस्य परमायुर्गणनायां स्थानं न लभते, लवमासः पञ्चिकायामिव इति भावः।

४ परिणामेन—परिक्रम्यते स्वयमेव पच्यते परिणामः फलम्। कर्म्मकर्त्तरि घञ्।

Digitized by Google

तेन राजकुमारेण पित्रा प्रसादीकृतं बहुमूल्यम् आभरणं याचकाय दत्तम्। सज्जनेन राज्ञोऽग्रे ललिताङ्गस्य दानावगुणः कथितः (१)। राजा तस्य वचसा कोपं गतः। कुमारमाकार्य्य पूर्वं सामवाक्यैः कथितम्। किन्तु प्रौढः पुत्रोऽपि मित्रवत्।

यतः—

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताड़येत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् (२)॥

वत्स! किं न श्रुतं भवता——

तरुदाह्यतिशीतेन दुर्भिक्षमतिवर्षणात्।
अतित्यागात् अनौचित्यं नाति: कुत्रापि शोभते (३)।

वत्स! अतः कारणात् त्वया अल्पतरो व्ययः कार्य्यः! कुमारः प्राह, तात——

गरीयसापि त्यागेन न याति निधनं धनम्।
ग्रामेणीदुम्बरेणेऽपि महाकूपे जलं यथा (४)॥

---

१ दानावगुणः—दानस्य अवगुणः दोषः।

२ लालयेदिति—पञ्च वर्षाणि व्याप्य वयसः प्रथमपञ्चवत्सरान् लालयेत् पालयेत् पुत्रमिति शेषः। प्राप्ते—उपस्थिते।

३ अतिशीतेन तरुणां दाह्यो दग्धस्येव दशा भवति, यथा सायिबीरियायां हिमानीपातात् वृक्षादयो दग्धवत् भवन्ति। अतिदानात् अनौचित्यं सर्वस्वव्ययात् दारिद्र्यं निजकुटुम्बभरणाचमलादिकञ्च आपतति।

४ महाकूपस्य जलं समुदयग्रामीणजनैः उदुम्बरग्रामेणापि न निःशेषतामायाति।

Digitized by Google

तथाप्यहं राजन् तत् न करिष्ये यत् भवतः अप्रियं, पूज्यादेशः प्रमाणम् इत्युक्त्वा कुमारः स्वगृहं ययौ। कुमारोऽतिदानात् निर्धनः। याचकाः कथयन्ति, कुमार! किमेतत्—

चिन्तामणिनिभो(१) भूत्वा सौम्य! दानेन भूतले।
पाषाण इव संवृत्तः तदिदानीं कथं भवान्॥
कलामिन्दुः करं(२) दाता धारां धाराधरो यदि।
सङ्कोचयिष्यते (३) तर्हि, जीविष्यति कथं जगत्॥
संग्रहैकपरः प्राप समुद्रोऽपि रसातलम्।
दाता तु जलदः पश्य भुवनोपरि गर्ज्जति (४)॥
समुद्राः स्थितिमुज्झन्ति चलन्ति कुलपर्व्वताः।
प्रलयेऽपि न मुञ्चन्ति महान्तोऽङ्गीकृतं तु यत् (५)॥

---

१ चिन्तामणिः—वाञ्छितफलदायी कविकल्पनासम्भूतः मणिविशेषः।

२ कलां—षोड़श भागं, कौमुदीम् इत्यर्थः। करं इसम्।

३ सङ्कोचयिष्यति—संहरिष्यति, वितरितुं विरतः भविष्यति।

४ समुद्रोऽपि—संग्रहैकपरः नद्यादिभिः केवलजलसञ्चयपरायणः, रसातलं रसाया धरण्याः तलम् अधस्तात् अपैति अपगच्छति। किन्तु दाता जलवर्षणपरो जलदः भुवनस्य पृथिव्या उपरि आकाशे गर्ज्जति। कूपस्य अधोगतिः दातुश्च उन्नतिर्निश्चिता इति भावः।

५ प्रलये समुद्राः स्थितिं मर्य्यादाम् उज्झन्ति उद्वेला भवन्ति; कुलपर्व्वताः महेन्द्रादयः चलन्ति स्वस्थानात् भ्रंशन्ते। किन्तु महान्तः यत् अङ्गीकृतम् उपपन्नं तदिति शेषः यत्तदोर्नित्यसम्बन्धात् न मुञ्चन्ति त्यजन्ति। तथाहि—"अद्यापि नीलकण्ठः किल कालकूटं कूर्म्मो बिभर्त्ति धरणीं

Digitized by Google

कुमार एवं श्रुत्वा पुनर्हानं दातुम् आरेभे। राज्ञा श्रुतं, राजमन्दिरमध्ये प्रवेशो रक्षितः(१)। कुमारो मनसि दुःखं चकार।

व्याधिमालिन्यदारिद्र्यापमानव्यसनागमे (२)।
परदेशं विना नान्यद्दिष्ट श्रेयो मनस्विनाम्॥

इति निश्चित्य मध्यरात्रे निर्जने जाते तुरङ्गममधिरुह्य एकां दिशं प्रति चचाल। तस्य मित्रं सज्जनोऽपि सहैव चचाल। मार्गे व्रजतोर्द्वयोरिति संलापो बभूव। कुमारेण कथितं, भोः सज्जन! ब्रूहि कामपि वार्त्ताम्। तेनोक्तं, कुमार! पुण्यपापयोः किं श्रेष्ठम्? कुमारः प्राह, रे मूर्ख!

अबलाबालगोपालहालिकानामपि स्फुटम्।
इदं हि यज्जयी धर्म्मात् अधर्म्मेण पुनः क्षयः॥

खलु पृष्ठकेन। अम्भोनिधिर्वहति दुःसहवाड़वाग्निम् अङ्गीकृतं सुकृतिनः परिपालयन्ति।"

Kulàchalas—family-mountains. A series or system of seven chains of mountains in Southern India. They are Mahendra, Malaya, Sahya, Saktimat, Riksha (for which Gandhamádana is sometimes substituted), Vindhya, and Pàripátra.

१ प्रवेशः अभ्यन्तरगमनं रक्षितः प्रतिहारिभिः निषिद्धः।

२ व्याधितस्य परदेशगमने जलवायुपरिवर्त्तनात् व्याधिशान्तिः। मालिन्यं मनस्तापः, तत्तत्स्थानजनानां मालिन्यादिदूषितभूतानां विदेशे अभावात् तस्य शान्तिर्भवति।

Digitized by Google

तेनोक्तं, अहं मूर्खः, परं कथय किं पुण्यं किं पापं वा ? कुमारः प्राह,——

वचः सत्यं गुरौ भक्तिः श्रुत्वा दानं दयार्हिते ।
धर्म्मोऽयमिष्टसंयोगकरोऽनिष्टनिवारकः (१) ॥

एतस्मात् विपरीतोऽधर्म्मः । सज्जनेनोक्तं, हे कुमार ! धर्म्मेण क्षयः पापेनैव जयः । यत् इदानीं तव धार्म्मिकस्यापि दुःस्था(२) ईदृशी अवस्था जाता । ततो धर्म्मात् कुतो जयः ? साम्प्रतं पापं कर्त्तुं युक्तम् । चौर्य्यादिना व्यापारेण लक्ष्मीम् उपार्जय । कुमारः प्राह, सज्जन ! एवं मा भण ।

अन्यायेनागता लक्ष्मीः खद्योत इव दीप्यते ।
क्षणं प्रकाश्य वस्तूनि निर्व्वाणे केवलं तमः ॥

अत्र वने आवां द्वावेव जनौ, को वादे(३) निर्णयं ददाति । यदि आवयोरन्यतो गच्छतोः केऽपि साक्षिणो धर्म्मात् जयं कथयिष्यन्ति, तदाहम् आजीवितान्तं तव किङ्करत्वं करिष्ये । सज्जनेनोक्तं, कुमार ! यदि मम वचः प्रमाणं, तदाहं तव तुरङ्गाभरणादिकं ग्रहीष्ये । कुमारेणोक्तं, एवमस्तु । इति

---

१ अर्हिते—पीड़िते आर्त्ते दया । इष्टसंयोगकरः—इष्टलाभजनकः ।

२ दुःस्था—दुःखसंकुला ।

३ वादे—तर्के, न्यायान्यायविचारे ।

Digitized by Google

प्रतिपन्ने गतौ। पल्लीग्रामे जरातुरा वृद्धपुलीन्द्राः दृष्टाः, भोः पुलीन्द्राः (१) धर्म्मात् जयः पापात् वा? दैवयोगात् तैरपि पापादेव जयः कथितः। सज्जनेन कुमारपार्श्वात् तुरगाभरणादिकं जग्रहे। ललिताङ्गकुमारोऽपि चरणचारी समेति। धृष्टः सज्जनो वदति, कुमार! धर्म्मपक्षपातफलं प्रत्यक्षम् अनुभूतं, अधुनापि पापं प्रमाणीकुरु। कुमारः प्राह, सज्जन! प्रलयेऽपि नाहं धर्म्मं त्यजामि। तर्हि धर्म्मजये(२) नेत्रे हारितव्ये। इत्थं पणबन्धश्चक्रे। पूर्व्वपरित्यक्ता पल्ली पुनः प्राप्ता। दैवयोगात् तैर्ज्जरत्पुलीन्द्रैः पापादेव जयः कथितः। दूरे गत्वा सज्जनेन कुमारोऽभाणि, देव! निजं वाक्यं पालय, नेत्रे मम समर्प्यताम्। कुमारेणापि वटतरोस्तले गत्वा धर्म्माज्जयं ब्रुवता स्वयमेव उद्धृत्य स्वनेत्रे सज्जनाय समर्पिते। सज्जनोऽपि चक्षुषी गृहीत्वा गतः पापी। तत्रैव वटतरोस्तले स्थितस्य कुमारस्य सूर्य्योऽस्तमितः।

---

1 Pulíndras or Pulindas—Barbarians, barbarous tribes living in woods and mountains, especially in Central India; but there were some in the north and on the Indus.

१ धर्म्मजये—धर्म्मस्य जये धर्म्मे जिते सति इत्यर्थः।

Digitized by Google

श्रूयमाणा विविधाः पक्षिणोऽपि तदापदि।
क्रन्दन्त इव दुःखेन (१) निखीना नीडवेश्मसु॥
अवान्तरे वटे तत्रैकत्र संमिलितास्तदा।
भारुण्डपक्षिणः(२) खैरं संलापमिति चक्रिरे॥

भोः पक्षिणः! केन किं किं कौतुकं दृष्टम्? एकेन पक्षिणोक्तं, चम्पायां(३) नगर्य्यां जितशत्रुर्नाम महीपतिः। तस्य पुत्री पुष्यावती नाम। दैवयोगात् पूर्व्वभवकर्म्मवशात् सा नयनविकला जाता। पाणिग्रहणयोग्या पितुर्मनसि सा जीवितशल्यं वर्त्तते। अन्यदा राज्ञा नगरीमध्ये पटहो दापितः (४)। यः कश्चित् जितशत्रोः पुष्यावत्याः पुत्र्याः लोचने औषधबलेन मन्त्रबलेन वा सञ्जीकरोति(५), राजा तस्मै निजराज्यस्य अर्द्धं कन्याञ्च दास्यति। एकेन लघुपक्षिणा(६) वृद्धपक्षिणः पार्श्वे पृष्टं, तात! उपायः

---

१ दुःखेन कुमारस्य तादृशदुर्दशादर्शनात् जनितेन दुःखेन।

2 Bhárunda is an imaginary bird of gigantic proportions, resembling the Roc, the monstrous bird of Arabian mythology.

3 Champá, Champávati, Champápuri, is the capital of Anga. Traces of it still remain in the neighbourhood of Bhagalpur. It was also called Málini, from its being surrounded with champaka trees as with a garland.

४ पटहो—ढक्का दापितः, पटहवादनेन नगरमध्ये घोषणा कारिता।

५ सञ्जीकरोति—सुस्थीकरोति। सत्-अज+ङ=सज्ज। सज्ज-क्वि-क्र-ति।

६ लघुपक्षिणा—अल्पवयस्कपक्षिणा।

Digitized by Google

कोऽप्यस्ति, येनोपायेन तस्या नेत्रे पुनर्नवे भवतः ? हृष्टपक्षिणोक्तं, यत्त !

दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च नैव च।
सञ्चरन्ति महाधूर्त्ता वटे यक्षादयो यथा (१)॥

ततः कारणात् अधुना मा पृच्छ, प्रभातसमये उपायं कथयिष्यामि। लघुपक्षी आग्रहं न विमुञ्चति, अत्याग्रहेण पृष्टं, कथितं (२) विना त्वां न मोक्ष्यामि। तेनोक्तं, वल्ली वटमूलं वेष्टयित्वा वटोपरि समागतास्ति। तदीयरससंसेकात् लोचने तत्कालमेव (३) पुनर्नवे भवतः। एवं तस्य वचः कुमारेण वटमूलस्थितेन आकर्णितम्। प्रथमं तत् औषधं स्वलोचनयोः क्षिप्तं, लोचने निर्मले जाते। चिन्तितं कुमारेण, औषधं गृहीत्वा यास्यामि चम्पानगर्यां, राजपुत्रीलोचने निर्मले करोमि। ततः पुण्यम्(४) औषधं लब्ध्वा एकस्य भारुण्डपक्षिणः पक्षमध्ये प्रविश्य निलीनः। प्रभातसमये ते सर्वेऽपि

---

१ वटवृक्षमाश्रित्य यक्षरक्षीभूतपिशाचादयः निभृतं वर्त्तन्ते, विश्वस्तमभिगच्छतः पान्थानाक्रामन्ति च। तद्वत् धूर्त्ताः रात्रौ गूढमवतिष्ठमाना विश्वस्तमालापं श्रुत्वा जनानुपद्रवन्ति। तथाच लोकानामाभाणकं "वटे वटे यक्ष" इति।

२ कथितं कथनं (भावे क्तः)।

३ तत्कालमेव तत्क्षणादेव, अविलम्बेनैवेत्यर्थः।

४ पुण्यं—पावकं, दीपघ्नमित्यर्थः।

Digitized by Google

भारुण्डपक्षिणो गतायस्यायां पुरि। कुमारः पञ्च-मध्यात् निःसृत्य नगरीं प्रविष्टः। ततश्च राजकुले(१) जगाम। तत्र गत्वा तेनैव औषधेन राजपुत्रीनेत्रे निर्मलीकृते। राज्ञार्धराज्यं दत्तं, कुमारी दत्ता। ललिताङ्गकुमारेण शुभलग्ने परिणीता पुष्पावती। अर्धराज्यं करोति।

कियति काले गते स एव सज्जनो ग्रासमात्रार्थं(२) गृहात् गृहं रङ्कवत् भ्रमन् राजकुमारसिंहद्वारे आजगाम, तेन दृष्टः। अथ तेन आत्मनः परम-मित्रं सज्जनः उपलक्षितः (३)।

अथ त्याजितदुर्वेषं कारितस्नानभोजनम्।
परिधापितसद्वस्त्रं कुमारस्तमभाषत॥
अद्य मे सफलं राज्यं यत्र दुःखसखी (४) भवान्।
समाजगाम तत्सौख्यं (५) भुङ्क्ष्व निश्चिंतमानसः॥

कुमारेण सज्जनस्य महासनं(६) दत्तम्।

---

१ राजकुले—राजगृहे। "स्वजातीयगृहे गोत्रे गृहेऽपि कथितं कुलम्।"

२ ग्रासमात्रार्थं ग्रासमात्राय केवलीदरान्नाय इदं ग्रासमात्रार्थं, अर्थेन चतुर्थीसमासः विशेषणत्वञ्च। अत्र क्रियाविशेषत्वमेतत्।

३ उपलक्षितः—प्रत्यभिज्ञातः।

४ दुःखसखः दुःखे सखा दुःखसखः। समासे टच्।

५ तत्सौख्यं—तस्मात् सौख्यं सुखानां समूहः तत्। समूहार्थे ष्यञ्।

६ महासनं महत् उत्तमं आसनम्।

Digitized by Google

एकदा एकान्ते पुष्पवत्या पृष्टं, नाथ ! सज्जनेन सह भवतो महती प्रीतिर्वर्त्तते। कोऽयं सज्जनः ? कुमारेणापि आमूलचूलं (१) देशान्तरगमनादारभ्य सर्व्वं यथावृत्तं(२) कथितम्। कुमार्य्या उक्तं, नाथ ! नायं सज्जनः किन्तु दुर्जनः। अनेन साकं प्रीतिं कर्त्तुं तव न युज्यते। सर्व्वथा अयं त्याज्य एवेति विसृश्यामुं विसृज। राजन् किं न श्रुतम् ?

उत्तमैः सह साङ्गत्यं (३) पण्डितैः सह संकथा (४)।
अलुब्धैः सह मित्रत्वं कुर्व्वाणो नावसीदति ॥
हंसवायसवन्मैत्री युवयोर्न हि युज्यते (५)।
नीचसङ्गप्रसङ्गेन हत्तुरेव न संशयः ॥

एवम् उक्तोऽपि कुमारः सज्जनं न मुञ्चति। यतः—

महतामप्यहो दैवात् दुर्व्वारा नीचसङ्गतिः।
कर्पूरस्य कथं न स्यात् अङ्गारेण समं रतिः(६) ॥

अन्यदा ललिताङ्गश्वशुरेण जितशत्रुणा एकान्ते

---

१ आमूलचूलं—मूलम् आद्यीभागः चूला चूड़ा चरमीभागः। मूलचूलापर्य्यन्तं आमूलचूलम्।

२ यथावृत्तं—वृत्तम् अनतिक्रम्य यथावृत्तं, सर्व्वं यथा आपतितं तथा।

३ साङ्गत्यं—सङ्गतिरेव साङ्गत्यं, स्वार्थे ष्यञ्। संसर्गः।

४ संकथा—संलापो मिथोभाषणमित्यर्थः।

५ हंसवायसवत् राजहंसकाकयोरिव युवयोः मैत्री न युज्यते न श्रीभते।

६ कर्पूरं महार्घं वस्तु अङ्गारं अकिञ्चित्करं, तथापि दग्धद्विचूर्णकार्थमुभयोः मित्रत्वं क्रियते।

Digitized by Google

सज्जनः पृष्टः, कोऽयं ललिताङ्गकुमारः, अस्य का जातिः ? तेन प्रकटितः आत्मस्वभावः, राजन् ! अहं राजकुमारः, अयं कौलिकपुत्रः (१)। एवं श्रुत्वा क्रुद्धेन राज्ञा ललिताङ्गमारणाय सेवका आदिष्टाः, सन्ध्यासमये यो धवलगृहप्रतोलीद्वारमार्गेण(२) समायाति स विनाश्य इति। एवं सन्ध्याकालप्रेषितं(३) ललिताङ्गस्य आकारणम्। कुमारोऽपि खड्गं गृहीत्वा यावदुत्तिष्ठति, तावत् पुष्पवत्या निषिद्धः।

विश्वासोऽत्र न कर्त्तव्यः तं नरेण विजानता(४)।
नीतौ किं न श्रुतं राज्ञा मित्रं कस्यापि नो भवेत्(५)॥

तत् स्वामिन् तिष्ठन्तु भवन्तः। अस्मिन् कार्ये सज्जनं प्रेषय। प्रेषितः सज्जनो राजप्रतोलीद्वारं प्रविशन् मारितः। कुमार्या ज्ञातं तस्य पिता हत इति, पत्युरग्रे निवेदितं, स्वामिन् ! सैन्यं सज्जीकृत्या

---

१ कौलिकपुत्रः—कौलैः शूकरैः उपजीवति कौलिकः तस्य पुत्रः।

२ धवलगृहप्रतोलीद्वारमार्गेण—धवलगृहस्य प्रतोलीद्वारं रथ्याद्वारं तस्य मार्गस्थेन।

३ सन्ध्याकालप्रेषितं—सन्ध्याकाले प्रेरितं लोकमुखेन विज्ञापितमित्यर्थः। आकारणं—आह्वानं निमन्त्रणम्।

४ तं राजानं विजानता विशेषेण जानता जनेन अत्र राजनि विश्वासो न कर्त्तव्यः इति अन्वयः।

५ नीतौ—नीतिशास्त्रे। नोशब्दः नञर्थकं अव्ययम्

Digitized by Google

बहिर्याहि। तथा कृतम्। जितशत्रुरपि सन्नद्धो(१) बभूव। प्रधानैर्विघ्नो(२) राजा।

सहकारिणं सखी मुक्त्वा मुक्तसम्पदः।
इत्यर्थे (३) यूयतां देव जयराजनिदर्शनम्॥

तथाहि—विन्ध्याचलमहाटव्यां वटवृक्षे शुकमिथुनं वसति। सुतो जातः। अन्यदा मातापित्रोर्वने गतयोः नीड़ात् शुको निःसृतः, स्तोकं भूमिं यात्वा ग्रैष्मवात् भूमौ पतितः, श्रान्तः केनचित् मुनिना दृष्टः, कृपया जलं पायितो, निजे आश्रमे जग्राह। शुकनाश इति नाम दत्तम्। शुकस्य पितरावपि तं पुत्रं गवेषयन्तौ तत्रैव आश्रमे आगतौ। अन्यदा कुलपतिना (४) कथ्यमानं शिष्यानाम् अग्रे शुकः शुश्राव, यत् समुद्रमध्ये हरिमेलो नाम द्वीपः। तस्य ईशानदिक्कोणे (५) सहकारो महाद्रुमोऽस्ति अमृतसिक्तः (६)। तस्य फलेन दोषरोग-

---

१ सन्नद्धः—सन्नाहयुक्तः युद्धार्थमुद्यतः। सम्+नह+क्त।

२ प्रधानैः ऐश्वर्ययुक्तैः पौरैः।

३ इत्यर्थे—अस्मिन् अर्थे वस्तुनि प्रस्तावे इत्यर्थः।

४ कुलपतिना—प्रधानमुनिना। कुलस्य मुनिसमूहस्य आश्रमस्थितस्य पतिः पालयिता तेन।

५ ईशानदिक्कोणे—ईशानदिक् एव कोणः तस्मिन्।

६ अमृतसिक्तः—अमृतेन सुधया सिक्तः अमृतसेकेन वर्द्धित इत्यर्थः, अतस्तस्य अमृतगुणयुक्तं फलं युज्यते।

Digitized by Google

जरामुक्तं वपुर्भवति । उड्डीय ययौ शुकः सहकार-फलानयनाय । तत्रैव द्वीपे विलम्बमान(१) आम्र-भारेण समुद्रमध्ये पतितः सागरसार्थपतिना(२) दृष्टः गृहीतो जीवापितः (३) । व्यवहारिणा पृष्टं, शुकस्त्वं किमिदं फलं प्राप्तः । शुकेन स्ववृत्तान्तः कथितः । फलं सागरदत्तस्य दत्तम् । अन्यफलं गृहीत्वा पित्रोरर्पितम् । सागरेण तत्फलं जयपुराधीशस्योपढौकितम् । तस्य फलस्य सम्बन्धो(४)माहात्म्यं च कथितम् । राज्ञा विश्वस्य उपकाराय(५) सहकार-तरुर्वाटिकायां वापितः,महोत्सवेन पुष्पितः,फलितः, सह राजमनोरथैः (६) । अन्यदा शकुनिकामुख-गृहीतसर्पगरलम् आम्रफलस्य उपरि पतितम् ।

---

१ विलम्बमानः—विशेषेण लम्बमान अवनमितदेहः ।

२ सागरसार्थपतिना—सागरवाहिनां सार्थानाम् वणिजां पतिः तेन ।

३ जीवापितः—जीवं जीवनम् आपितः प्रापितः पुनरुज्जीवितः ।

४ सम्बन्धः प्राप्तिप्रकारः । माहात्म्यं महत् गुणवत्त्वम् ।

५ उपकाराय—रोगजराद्यपनयनेन लोकानामिष्टसाधनाय । वाटिकायां—आहतस्थाने ।

६ सहकारस्य मुकुले जाते राज्ञः मनोरथानां तत्तदभिलाषाणां मुकुलं जातम् । तस्य फले जाते तन्मनोरथाः फलिताः । तथा सहकारे पुष्पिते फलिते च राज्ञा महोत्सवः कारितः ।

Digitized by Google

विषतापात् तत्फलं सकलमपि पक्वं गलित्वा १) भूमौ पतितम्। आरामरक्षकेण राज्ञ उपढौकितम्। राज्ञा "इष्टं धर्म्मे नियोजयेत्(२)" इति कारणात् पुरोहिताय फलम् अर्पितम्। तेन पुरोहितेनापि अप्रक्षालितमेव सहसा भक्षितं विपन्नश्च(३)। क्रुद्धेन राज्ञा "विषतरु"रिति भणित्वा छेदितः सहकारः। मर्त्तुकामा, देहविकला, रोगातुरा, अन्धाः, कुष्ठिनः सर्वेऽपि जनास्तस्य फलानि तथा अदन्ति स्म, यथा स्पष्टदेहा(४)बभूवुः। राज्ञा तत्स्वरूपं ज्ञातम्। आजीवितावधि(५) सन्तापो बभूव। तथा त्वमपि मा कुरु जयराजकथां श्रुत्वा।

इतश्च नरवाहनस्य राज्ञः प्रधानैः कुमारानयनाय आगतैः कुमारस्य कुलादिकं कथितम्। ललिताङ्ग-

---

१ विषतापात्—विषस्य तापात् प्रभावात्। पक्वं—अकालपक्वम्। गलित्वा—द्रवात् च्युत्वा।

२ इष्टं प्रियं वस्तु, धर्म्मे धर्म्मकर्म्मणि, नियोजयेत् प्रयोजयेत्, इष्टं वस्तु निजसेवार्थं न विनियोज्य धर्म्मार्थं विनियोजयेदित्यर्थः।

३ विपन्नश्च—मृतश्च।

४ स्पष्टदेहाः—पूर्णदेहाः सुस्थशरीराश्च जाताः। यथा अदन्ति स्म तथा स्पष्टदेहा बभूवुः, अदनमात्रेनैव स्पष्टदेहा जाताः।

५ आजीवितावधि—जीवितस्य अवधिः चरमसीमा तत्पर्य्यन्तम्।

Digitized by Google

मातापितरौ तत्र समागतौ। श्वशुरको(१) ललिताङ्गकुमाराय निजं राज्यं दत्त्वा प्रव्रज्य त्रिदिवं ययौ। नरवाहनराजेन स्वपुत्रो निजनगरे आनीतः अपराधं क्षमितः (२)। वत्स! इदानीं मे ज्ञातं, यद्दानप्रभावात् द्रव्यं न क्षयति। ततः पिता ललिताङ्गस्य राज्यं दत्त्वा, दीक्षां गृहीतवान्, चारित्रं(३) पालयित्वा च दिवं ययौ। राजा ललिताङ्गः राज्यं प्रतिपालयति।

---

१ श्वशुरक इति स्वार्थे कन्।

२ अपराधं क्षमितः—पित्रा अनुरुद्धेन ललिताङ्गेन दानप्रतिरोधरूपस्य पितुरपराधस्य मार्ज्जना कृता। अत्र नरवाहनराजेन इति प्रयोज्यकर्त्ता, स्वपुत्र इति प्रयोज्यकर्तुः कर्म्मत्वं, ततः कर्म्मणि उक्ते प्रथमा। क्षमित इति क्षमधातोर्णिच् ततः क्तः। णिजन्तक्षमधातोः प्रयोज्यकर्तुः कर्म्मत्वं कुत्रापि व्याकरणे न प्रतिपादितमिति ध्येयम्।

३ चारित्रं—आत्मीकृतविधिना समाधिपरायणः आत्मनः निर्म्मलं चरित्रं रचित्वा इत्यर्थः।

Digitized by Google

नलदवदन्ती ।

अत्र भारते कोशलदेशे कोशला(१) नाम नगरी। तत्र इक्ष्वाकुकुलोत्पन्नो निषधो नाम राजा, तस्य सुन्दरा(२)नाम राज्ञी, नलकूवरौ द्वौ पुत्रौ च। इतश्च विदर्भदेशे कुण्डिनपुरं नाम नगरम्। तत्र भीमरथो राजा, तस्य पुष्पदन्ती भार्य्या। तयोः समुत्पन्ना पुत्री। तस्या भाले सूर्य्यविम्बमिव स्वाभाविकं (३) तिलकं वर्त्तते। यत् अस्यां गर्भगतायां मात्रा स्वप्ने दवे(४) दह्यमानो दन्ती दृष्टः, अतस्तस्या दवदन्ती इति नाम कृतम्। सा खलु शुक्लपक्षचन्द्रकला इव दिने दिने वृद्धिं याति। समर्पिता कलाचार्य्यस्य समीपे विद्याग्रहणाय, क्रमेण समग्रविद्यायां निपुणा जाता। क्रमेण यौवनं प्राप्ता।

तां यौवनस्थां दृष्ट्वा राज्ञा चिन्तितं, एषा निरुपमरूपा कस्मै दातव्या। तावत् अस्याः समानरूपो वरो नास्ति। यदि वा अस्ति तथापि न

---

1. Kosalà or Uttara-kosalá is another name for Ayodhyá; "रघुपतेः क्व गतोत्तरकोशला"।

२ सुन्दरी इत्येव भवितुमर्हति। अथवा "निरङ्कुशाः कवयः"।

३ स्वाभाविकं—स्वभावजातं न तु कृत्रिमं चन्दनहरितालादिकृतम्।

४ दवे वने। दवदावौ वनानलौ इत्यमरः।

Digitized by Google

ग्रायते। ग्रतः स्वयंवरं कर्त्तुं युक्तं, यथा निजे-च्छया दृयं मम पुत्री वरं वृणोति। ततो दूतं प्रेष्य ग्राकारिता राजानः राजपुत्राश्च ग्रागता गजतुरग-रथपदातिभिः परिवृताः। नलोऽपि तत्र प्राप्तः। भीमरथेन राज्ञा सर्व्वेऽपि सन्मानिताः प्रवरावासेषु। ततः कारितः काञ्चनमयस्तम्भमण्डितः स्वयंवर-मण्डपः। तत्र स्थापितानि सुवर्णसिंहासनानि, तेषु उपविष्टाः राजानो राजपुत्राश्च। ग्रत्रान्तरे जनकादेशेन प्रकटितप्रभाजालतिलकालङ्कृता प्रसन्न-वदना स्वयंवरमण्डपं मण्डयन्ती दवदन्ती समा-गता। तां दृष्ट्वा विस्मितमुखाः सर्व्वेऽपि राजानो जाताः। ततोऽन्तःपुरप्रतीहार्य्या भद्रया सह क्रमेण काश्मीकुङ्कणकाश्मीरकौशाम्बीकलिङ्गो-ज्जयिनीश्वरादीन् प्रत्याख्याय, दवदन्त्या उक्तं, धिक् धिक् ग्रनेन स्वयंवरमण्डपसंवरणपरिश्रमेण (१) निर्व्विण्णा ग्रहम्। तदग्रतो गच्छामि। ततो भद्रया उक्तं, देवि! ग्रयं कन्दर्पसमानरूपो निषध-पुत्रो नलः। ततो विस्मितचित्तया दवदन्त्या चिन्तितं, ग्रहो ग्रस्य ग्रसामान्यं रूपम्! ग्रहो

---

१ संवरणं—परितो भ्रमन्। निर्व्विण्णा—विरक्ता।

Digitized by Google

उदग्रं सौभाग्यम् (१)! ततो नलस्य कण्ठे वरमाला क्षिप्ता। "अहो सुष्ठु दत्तं (२), सुष्ठु दत्तं दवदन्त्या" इति समुत्थितो जनकलकलः। अत्रान्तरे खड्गम् आकृष्य नलं आक्षेप्तुं (३) प्रवृत्तः कृष्णराजः, भो नल! दवदन्तीं परिणेतुं न लभ्यते। अनया दवदन्त्या अयुक्तं कृतं यत् त्वं वृतः। तावत् एनां मुञ्च अथवा युद्धसज्जो भव। नलेन भणितं, अरे नराधम! यदि दवदन्त्या त्वं न वृतः, ततः किं दूनितोऽसि (४)? तावत् परित्यक्तसाधुमार्गोमया त्वं शिक्षयितव्यः! खड्गम् आकृष्य ज्वलत्कोपानलो नलो बभूव।

ततो द्वयोरपि दले सन्नद्धे जाते दवदन्त्या चिन्तितं, हा मन्दभाग्या अहं, यत् मम कृते एष प्रलयः (५) उपस्थितः। तावत् यदि मम अर्हति देवे भक्तिः, तदा श्रीशासनदेवात्(६) नलो विजयलक्ष्मीं

---

१ उदग्रं—महत्, सौभाग्यम् ऐश्वर्यम्।

२ सुष्ठु दत्तं—समीचीनम् आचरितम्।

३ आक्षेप्तुं—निन्दितुम्।

४ दूनितः—क्लेशितः दूधातोः भावे क्तः। दूनम् इतः प्राप्तः।

५ प्रलयः—उपप्लवः।

6. Sri-sâsanadeva belongs to the jaina-pantheon.

Digitized by Google

प्राप्नोतु, उपशाम्यतु संग्राम इति। ततो झटिति देवप्रभावेण प्रबुद्धः(१) रोषरहितः क्षणराजश्चिन्तयति, अहो मया अयुक्तं कृतम्। न सामान्योऽयं पुरुषः, तावत् नमस्कर्त्तुं युज्यते। ततः क्षणराजेन प्रणामपूर्वं क्षमितो नलः। तेन च सभाष्य विसर्जितः क्षणराजः। नलस्य पराक्रमं विलोक्य विस्मितेन भीमरथराजेन महाविस्तरेण(२) पाणिग्रहणं कारितम्। करितुरगरत्नालङ्कारवस्त्रादीनि नलकुमाराय दत्तानि। एवं विवाहानन्तरं कियन्ति दिनानि तत्र स्थित्वा पुनर्नगरीं प्रति चलितो नलः। नलेन सह व्रजन्ती दवदन्ती मात्रा एवं उक्ता——

जप जपनीयं विनयं, कुरु पुत्रि वर्जय परनिन्दाम्।
व्यसनेऽपि मा विमुञ्च स्वदैवेच्छायावन्निजनायकम् (३)॥

इति जननीशिक्षाम् अङ्गीकृत्य पितरौ प्रणम्य प्रस्थिता दवदन्ती। मार्गे व्रजतो नलस्य अस्तं गतो रविः। अन्धकारपटलेन पूरितो भुवनगर्भः, जल-

---

१ प्रबुद्धः—चैतन्यं प्राप्तः, अज्ञानापगमादिति भावः।

२ महाविस्तरेण—महत्या घटया।

३ जपनीयं—इष्टदेवनामादिकम्। यथा, जनः निजदैवेच्छायां न त्यजति, तथा त्वं पतिं विपदि अपि मा परिहर।

Digitized by Google

स्थलवृक्षगिरिगर्त्तादिविशेषो(१) न ज्ञायते। तथापि निजनगरोत्कण्ठितमना गमनात् न निवर्त्तते नलः। कियद्भिरस्खलितप्रयाणैः(२) कोशलानगरी-परिसरे(३) गतो नलः। नलेन दवदन्ती प्रत्युक्ता, देवि! जिनभवनमण्डितप्रदेशा(४) एषा मम पुरी कोशला नाम। तया भणितं धन्याहं, नलं प्रियं प्राप्य नित्यं देवान् पूजयिष्यामि। अथ प्रशस्त-दिवसे विविधतूर्य्यरवापूरितदिगन्तरां पदे पदे क्रियमाणमङ्गलोत्सवां नलो निजनगरीं प्रविष्टः। ततश्च दवदन्तीसहितेन नलेन प्रणतौ मातापितरौ। नलो दवदन्त्या अविमुक्तो नवनवैर्विनोदैः(५) कालं अतिक्रामति।

---

१ भुवनविवरं तमसा तथा आवृतं, यत् इदं जलं इदं स्थलं, अयं वृक्षः अयं पर्व्वतः अयञ्च गर्त्तः इत्यादिविशेषं ज्ञातुं न शक्यते स्म। सर्व्व-मेकाकारमदृश्यत।

२ कियद्भिः अस्खलितप्रयाणैः—By a few uninterrupted journeys.

३ परिसरे—नगरप्रान्तवर्त्तिनि विस्तृते अनावृते भूभागे, a Maidan; "पर्य्यन्तभूः परिसरः" इत्यमरः।

४ जिनभवनमण्डितप्रदेशा—जिनदेवस्य मन्दिरैः मण्डिताः प्रदेशाः स्थानानि यस्यां तथोक्ता।

५ विनोदैः सभोगैः, चित्तनिर्व्वृतिसाधनैः।

Digitized by Google

अन्यदा निषधराजेन नलं निजपदे निवेश्य कूवरं कुमारत्वे स्थापयित्वा दीक्षा गृहीता। ततोऽनल इव दुर्व्विषहतेजःप्रसरो नलो राज्यं पालयति। अन्यदा नलेन मन्त्रिणः पृष्टाः। अहं जनकोपार्जितामेव महीं पालयामि, किंवा अधिकाम्? मन्त्रिभिः उक्तं, त्रिभागन्यूनं (१) भरतार्द्धं (२) वशीकृतम्। किन्तु इतो द्वियोजनशतैः तक्षशिला(३) नगरी वर्त्तते। तत्र कदम्बो राजा तव आज्ञां न मानयति। अयं त्वया उपेक्षितो रोगलेश (४) इव दुःसाध्यो बभूव। ततः प्रथमं दूतः प्रेष्यतां, येन तस्य चित्तं ज्ञायते। ततो दूतः

---

१ त्रिभागन्यूनं—तृतीयः भागः त्रिभागः तेन न्यूनं हीनम्। साधारणसंख्यावाचिनामपि क्वचित् (त्रिदिवादिषु इव) पूरणार्थकत्वम्।

२ भरतार्द्धं—भरतस्य अधिकारः भरतं। न खित्काद्यैं सर्व्वत्र इति ष्ठञ्भावः। तस्य अर्द्धम्।

India is supposed to be divided into two equal parts, the Aryávarta, or Hindustàn, and the Dákshinàtya or Deccan. Here the former is meant.

३ तक्षशिला—The Taxila of Ptolemy, and other classical writers. It was a city of the Gàndhàras in the Panjab; and took its name from Taksha, son of Bharata and nephew of Ràma. General Cunningham has found its remains at Sahdhari.

४ रोगलेशः—स्तोकावशिष्टः रोग इव।

Digitized by Google

प्रहितो गतोऽविलम्बं तच्चग्रिलाम्। तेन भणितः कदम्बः, वैरिवनदहनदावानलेन(१) नलेन आज्ञातं, यत् मम पदसेवाम् अङ्गीकृत्य निजराज्यं परिपालय, यदि एवं न करिष्यसि, ततोऽस्माद्राज्यात् भ्रंशं प्राप्स्यसि। इति दूतवचनं श्रुत्वा दशनाग्रदष्टोष्ठपुटः आत्मानम् अजानन्(२) कदम्बराजः दूतं प्रति प्राह, रे दूत! तव स्वामी किं बालोऽथवा किं प्रमत्तोऽथवा वातग्रस्तः यः सकलरिपुभुजङ्गगरुडं मां न जानाति? अथवा किं तस्य गुणदोषविचारज्ञाः केऽपि मन्त्रिणो न सन्ति, यैः एवम् असमं(३) जल्पन् नलो न निषिद्धः? अहो दूत! गच्छ यदि तव स्वामी जीवितस्य अतीव निर्विण्णः, ततः संग्रामविषये सज्जो भूत्वा त्वरितम् आगच्छतु। अहमपि सज्जीभूय स्थितोऽस्मि। ततो दूतेनापि आगत्य कदम्बोक्तं कथितं नलस्याग्रे।

---

१ वैरिवनदहनदावानलेन—वैरिणः एव वनानि तेषां दहनं भस्मसात्करणं तत्र दावानलः वनाग्निरिव तेन।

२ आत्मानम् अजानन्—निजस्वरूपज्ञानविधुरः, स्वयं हीनबलः नलस्तु बलीयान् इति अविन्दयन्।

३ असमं—असमञ्जसं युक्तिविरुद्धम्। extravagantly। क्रियाविशेषणमेतत्।

Digitized by Google

ततः कोपारुणितलोचनः चतुरङ्गसेनायुक्तो नल-राजश्चचाल, क्रमेण प्राप्तस्तच्छिलायाम्। ततो वेष्टिता नलेन तच्छिलानगरी। तदसहमानः कदम्बः सन्नह्य बहिर्निर्गतः। द्वाभ्यां बलाभ्यां प्रारब्धं युद्धम्। नलेन कदम्बो भणितः, एभिः क्षमितुच्छैः पदातिभिर्मारितैः किं प्रयोजनम्? अहं त्वञ्च द्वावपि युद्धं कुर्व्वः। ततो द्वावपि बाहुयुद्ध-प्रमुखैर्युद्धैर्योद्धुं प्रवृत्तौ। कदम्बेन यत् यत् युद्धं प्रार्थितं, तत्र तत्रासौ निर्जितो बभूव नलेन। ततः पलाय्य संयमं प्रतिपद्य कायोत्सर्गे(१) स्थितः कदम्बः। नलेन एवं भणितं, अनेन सच्चरित्रेण त्वया अहं निर्जितः। तावत् निजराज्यं कुरु। कदम्बेन न गृहीतं राज्यं निस्पृहत्वेन। ततश्च नलेन जयशक्ति-नामा कदम्बपुत्रः राज्ये स्थापितः। अथ नरेन्द्रै-र्नलस्य भरतार्द्धराज्याभिषेकः कृतः। ततो विविध-विनोदैः दवदन्त्या सह कालं गमयति।

कूवरोऽपि निजकुलाङ्गारो राज्यलुब्धो नलस्य छलं विलोकयन् वर्त्तते। अन्यदा भवितव्यतावशेन

---

१ कायोत्सर्गे—कायस्य उत्सर्गः त्यागः तस्मिन्; प्रायोपवेशनादि-व्रतैः प्राक्त्यागार्थसुद्यतः।

Digitized by Google

नलस्य द्यूतव्यसनं जातम्। नलस्य राज्यं गृह्णामि, इति चिन्तयन् कूवरो नलेन रमते। निरन्तरं डमरुवत् (१) द्वयोरपि जयः सञ्चरति। बहुकालो गतः। दैववशेन नलेन कूवरो जेतुं शक्तः। नलस्य वाञ्छितः पाशको न पतितः। ततः क्रूरः कूवरः पुनः पुनर्नलसारिमारणं करोति। ततः कूवरेण विजितो ग्रीष्मे जलेन हीयमानं सर इव विभवेन हीयमानो नलो बभूव। विखिन्नो लोकः। द्यूतान्धनलेन संपद्यमानमनोरथो हर्षितः कूवरः। नलानुरक्तेन लोकेन कृतो हाहारवः। तं हाहारवं श्रुत्वा समागता दवदन्ती। सा जल्पति, नाथ! मम प्रसादं कुरु। त्वामहं प्रार्थयामि, एतत् द्यूतव्यसनं मुञ्च। निश्चितं वैरिण इव तव व्यसनदानदक्षा इमे अक्षाः। वरं लघुबान्धवस्य(२) कूवरस्य एतत् राज्यं देहि। आत्मनः पुनरकीर्तिं मा अर्जय। अनेकयुद्धप्रारम्भैः अर्जितं राज्यं द्यूतेन हारितं मम चित्तं दुनोति। दवदन्त्या इत्थं भणितोऽपि नलो

१ डमरुवत्—डमरौ क्रीडने भाग्यमाश्रे तस्य उभयीरपि मुखयोः वाद्यं जायते, तथा तयोः सङ्गीदरयोः (डमरुमुखद्वयवत् दृढसम्बन्धसम्पृक्तयोः) मध्ये जयः सञ्चरति स्म।

२ लघुबान्धवस्य—कनिष्ठभ्रातेः अनुजस्य।

Digitized by Google

द्यूतात् न निवर्त्तते। ततो दवदन्त्या मन्त्रिणः प्रहिताः। तैर्बहुविधम् उक्तोऽपि नलो द्यूतात् न निवर्त्तितः। सन्निपातग्रहीतस्य(१) किञ्चित् भेषजादिकं न सम्भवति। ततश्च हारितसमग्रराजगो हारितदवदन्तीप्रमुखान्तःपुरो (२) हारितशरीरपरिहितसकलाभरणो नलो बभूव। ततः कूवरेण भणितं, मम राज्यं त्यज, अत्र मा तिष्ठ। एतत् राज्यं पूर्व्वं तव पित्रा दत्तम्। साम्प्रतं पुनर्मम भ्रात्रैदत्तम्। ततो नलः परिहितवस्त्रद्रव्यो (३) राज्यं त्यक्त्वा चलितः। दवदन्त्यपि नलेन सह चलन्ती कूवरेण प्रथमं निषिद्धापि अमात्यभयेन विसर्ज्जिता। पाथेयसारथिसहितः समर्पितो रथः। नलेन उक्तं येन मया भरतार्द्धविजयोपार्ज्जिता लीलया लक्ष्मीः त्यक्त्वा तस्य मम एकेन रथेन किं प्रयोजनम्? प्रधानैर्भणितोनलः चिरसेवकानपि अस्मान् त्वामनुव्रजतः कूवरो निवारयति। किञ्च अस्मिन् वंशे यो राजा

---

१ सन्निपातग्रहीतस्य—कफपित्तवायूनां धातूनां विकारः सन्निपातः तेन ग्रहीतस्य आक्रान्तस्य।

२ अन्तःपुरशब्दोऽत्र अवरोधवत् स्त्रीजनवाची।

३ परिहितवस्त्रद्रव्यः—परिहितं वस्त्रमेव द्रव्यं पार्थिवविभवः यस्य तथोक्तः।

Digitized by Google

तं सेवामहे वयम्। अस्माकं अयं क्रमः (१)। साम्प्रतं दवदन्त्येव तव भार्य्या मन्त्री सहायश्च। एषा शिरीष-कुसुम-सुकुमारशरीरा सूर्य्यकरनिकरसन्तप्त-रेणुकणदुर्गमे मार्गे कथं कमलकोमलाभ्यां चरणाभ्यां चलिष्यति? ततः स्वामिन् एनं रथं गृहीत्वा दव-दन्त्या सह रथमारोह। एवं प्रधानैः प्रार्थितो रथम् आरुह्य दवदन्त्या संह प्रस्थितो नलः। स्नानोद्यता-मिव (२) एकवस्त्रां दवदन्तीं दृष्ट्वा नगरनारीभिः प्ररुदितम्। नलेन दवदन्ती पृष्टा, देवि! कुत्र व्रजामो वयम्? तया उक्तं, देव! कुण्डिनपुरं प्रति गच्छामः। तत्र प्राघुणकीभूय (३) अनुगृह्यतां मे तातम्। ततो नलादेशेन सारथिना कुण्डिनपुरं प्रति प्रेरिता रथतुरङ्गमाः। क्रमेण रौद्रशब्द-प्रादुर्भूतविद्रावितहरिणसमूहं विषविषमविसर्पत्-सर्पभीषणम् अरण्यं प्राप्तो नलः। तत्र वने करविधृत-धनुर्व्वाणशस्त्रैर्भिल्लैः रुद्धोनलः रथं मुक्त्वा तेषां सम्मुखो बभूव। ततश्च दवदन्ती तं करे धारयित्वा प्राह,

---

१ क्रमः—परिपाटी, रीतिः।

२ स्नानकाले हि उत्तरीयं त्यक्त्वा केवलमधोवासो ध्रियते।

३ प्राघुणकीभूय अतिथिर्भूत्वा। प्राघुण+(स्वार्थे) कन्+च्वि+भू+यप्।

Digitized by Google

स्वामिन् ! एषु मृगालरूपेषु तव सिंहवत् कः आक्षेपः ? भरतार्द्धविजयलक्ष्मीविलासभवनम् (१) एषु तव कृपाणं न विसृज । इतश्च अन्यभिल्लैः रथो गृहीतः । विपरीते विधौ पुरुषस्य पुरुषकारः किं करोति ? तस्मिन् अरण्ये निजकरेण दवदन्त्याः करं गृहीत्वा पाणिग्रहणोत्सवं स्मारयन् चलितो नलः । दर्भाग्रभिन्नकोमलचरणकमलस्रवद्रुधिर-विन्दुभिः दवदन्त्या तत् अरण्यम् इन्द्रगोपाङ्कितं (२) कृतम् । दवदन्त्या पृष्टं, स्वामिन् ! अद्यापि कियद्-गन्तव्यम् ? नलेन उक्तं, देवि ! योजनशतम् एतत् अरण्यम्, अद्यापि पञ्चैव योजनानि उल्लङ्घितानि । अतो धीरा भव । तयोरेवम् उक्तवतोः अस्तं गतो रविः । ततश्च नलेन कोमलपल्लवैः प्रशस्तं प्रस्तरं(३) विधाय भणितं, देवि ! अत्र शयनं कुरु, भयशङ्का न

---

१ भरतार्द्धविजयलक्ष्मीविलासभवनम्—भरतार्द्धस्य आर्य्यावर्त्तस्य विजयलक्ष्म्याः विलासभवनं लीलास्थानम् । कृपाणबलेनैव भारतवर्षार्द्धस्य जयविधानात् इति भावः ।

२ इन्द्रगोपाः रक्तवर्णाः क्षुद्रकीटविशेषाः । अत्र इन्द्रगोपानां रुधिरबिन्दुभिः सह सादृश्यम् ।

३ प्रस्तरः—प्रस्तीर्यते यः सः । प्र + स्तृ + (कर्म्मणि) अप् । शय्या ।

Digitized by Google

कर्त्तव्या । अहं प्रहरकः(१)स्थितोऽस्मि । इत्युक्त्वा नलेन निजवसनार्द्धं प्रस्तरे छिन्नम् । ततो देवान् वन्दित्वा पञ्च परमेष्ठिनश्च(२) स्मृत्वा प्रसुप्ता दवदन्ती । तस्यां निद्रायमाणायां नलेन चिन्तितम्, येषां श्वशुरः शरणं ते पुरुषाः पुरुषेषु रेखां(३)न लभन्ते । ततोऽहम् ईदृगवस्थो दवदन्त्याः पितृगृहे न व्रजामि । हृदयं वज्रवत् कठिनं कृत्वा प्रियामपि इमां सुप्ता रङ्गवत् आमोदरं गृहीत्वा अन्यत्र व्रजामि । दवदन्त्याः शीलप्रभावेण कोऽपि अपायो (४) न भविष्यति । यतः सतीत्वशीलमेव(५) सर्व्वाङ्गरक्षणकरः सन्नाहः । ततः कुरिकया निजवसनार्द्धं छिन्नम् । दवदन्ती-वस्त्राञ्चले निजरुधिरेण अक्षराणि लिखितानि ।

याहि जनक्ष भवनं मा कुरु कालेऽकालारि श्रमक्षम् ।
अहमेव सहे सकलं न यावन्मयि विधिः प्रसीदति ॥

---

१ प्रहरकः—पर्य्यायेण प्रहरे प्रहरे अवेक्षां रक्षां करोतीति प्रहरकः । प्रहर-कन् ।

२ पञ्च परमेष्ठिनः—जैनानां पञ्च परमाराध्यान् देवान् ।

३ रेखां गणनाम् ।

४ अपैति अपगच्छति नश्यति अनेन इति अपायः विघ्नः । अप + इण् + घञ् (करणे) ।

५ सतीत्वशीलं—सतीत्वमेव शीलं सदृत्तम् । "शीलं स्वभावे सदृत्ते" इत्यमरः ।

Digitized by Google

अहं पुनः अन्यत्र व्रजामि। ततश्चाशब्दं रुदन् चौरवत् निःशब्दपदो गन्तुं प्रवृत्तो नलः। प्रसुप्तां दवदन्तीं मुक्ता चलितकन्धरं(१) विलोकयन् किय-द्भूमिभागं गत्वा पुनः चिन्तितवान्, अरण्ये प्रसुप्तां बालाम् अनाथाम् एनां व्याला राक्षसा वा भक्षयि-ष्यन्ति। ततो मम का गतिर्भविष्यति? अतः कारणात् सूर्य्योदयं यावत् रक्षामि एनाम्। प्रभात-काले व्रजतु एषा निजेच्छया। ततस्तैरेव पदैः (२) निवृत्तो नलः। भूमिसुप्तां दवदन्तीं दृष्ट्वा चिन्तितं नलेन, हा! दवदन्ती एकवस्त्रा एकाकिनी शून्यारण्ये स्थपिति। अहो नलस्य असूर्य्यम्पश्यम् अन्तःपुरम्!! (३) मम कर्म्मदोषेण एनाम् अवस्थां गता दवदन्ती। तावत् किं करोमि। अहं हताशः। अनाथामिव प्रियां महीपीठे लुण्ठितां विलोकयन्नपि यत् अहं न लज्जे, तत् निश्चितं निर्लज्जोऽहम्। वज्रघटि-तोऽस्मि यन्मया एषा दवदन्ती अरण्ये मुक्ता। तावत् पतिव्रताम् एनां मुक्ता अन्यत्र गन्तुं मम मनो न

---

१ चलितकन्धरं चलिता कन्धरा यस्मिन् तत्, कन्धरां ग्रीवां परा-वर्त्य "ग्रीवाभङ्गाभिराम" मित्यर्थः।

२ यैः गतवान् तैरेव पदैः पदचिह्नैरित्यर्थः।

३ अन्तःपुरं—अन्तःपुरिकागणः।

Digitized by Google

उत्सहते। जीवितं मरणं वा मम अनया सह भवतु। अथवा अपायशतसंकुले अरण्ये अहमेव भवामि दुःखभाजनम्। एषा पुनः वल्लिलिखितं मम आदेशं कुर्व्वती स्वजनभवने गत्वा सुखेन तिष्ठतु। एवं कृतनिश्चयो रजनीं गमयित्वा दवदन्तीजागरणकाले तिरोहितः त्वरितपदक्षेपं नलः।

इतश्च रजनीविरामे दवदन्त्या स्वप्नो दृष्टः, "फुल्लपुष्पमनोहरे सहकारवृक्षे अहम् आरूढा, मया तस्य पेशलानिफलानि भक्षितानि। ततश्च वनगजेन सहसैव उन्मूलितः सहकारवृक्षः। अहञ्च पृथ्वीतले निपतिता।" ततश्च प्रतिबुद्धा दवदन्ती। नलम् अदृष्ट्वा यूथभ्रष्टा(१) हरिणीव दिशो विलोकयितुं प्रवृत्ता। हा अहितं कृतं यत् शून्यारण्ये अशरणा प्रियतमेन मुक्तास्मि। अथवा प्रभाते मम वदनशुद्धिसलिलानयनार्थं कुत्रापि जलाशये गतो भविष्यति।

ते द्रुमाः पर्वतास्तेऽपि तदरण्यञ्च सा च भूः।
एकमेव न पश्यामि नलं कमललोचनम्॥

एवम् अनल्पविकल्पव्याकुलचित्ता दिशो विलोकयन्ती नलम् अप्रेक्षमाणा भीता स्वप्नार्थं विचारयितुं प्रवृत्ता। यः पुष्पफलसमूहः सहकारवृक्षः

१ सजातीयगणे यूथमित्यमरः।

Digitized by Google

स नलोराजा। यत् मया फलानि आस्वादितानि तत् राज्यसौख्यं, यत् वनगजेन सहकारवृक्षः उन्मूलितः स दैवयोगेन नलस्य राज्यभ्रंशः, यत् पुनः तस्मात् सहकारवृक्षात् अहं पतिता, ततोऽहं नलात् भ्रष्टा जाता। अतोऽनेन स्वप्नेन दुर्लभं मम नलस्य दर्शनम्। ततो मुक्तकण्ठम् उच्चैः रोदितुं प्रवृत्ता दवदन्ती। यत् कातरचित्तानां स्त्रीणां व्यसने समुपस्थिते धीरिमा न भवति। हा नाथ! त्वया अहं कथं त्यक्ता? किं तव भारकारिणी भवामि? सर्पस्यापि निजकञ्चुलिका भारं (१) न करोति? भो वनदेवताः! युष्मानहं प्रार्थयामि मे प्राणनाथं दर्शयत, अथवा तस्य पदपङ्कजैः पवित्रितं मार्गं दर्शयत। पक्वदाड़िम्बफलमिव स्फुट धरणि(२)! यथा तेन तव विवरेण पातालं प्रविश्य निर्वृतिं प्राप्नोमि। एवं विलपन्ती अश्रुजलसारणीभिः(१) अरण्यवृक्षान् सिञ्चन्ती नलं विना कुत्रापि जले स्थले रतिं न प्राप्तवती।

ततो वस्त्राञ्चले अक्षराणि दृष्ट्वा विकसहृदना

---

१ कञ्चुलिका कांचुलि इति भाषा। अती निर्मोकम्।

२ हे धरणि पक्वदाड़िम्बफलम् इव स्फुट विदीर्णा भव, येनाहं तव विदीर्णविवरमार्गेण इत्यर्थः।

३ सारणी क्षुद्रनदी। A rill.

Digitized by Google

दवदन्ती वाचयति, निश्चितं प्रियतमेन त्यक्ताहं देह-मात्रेण न पुनश्चित्तेन। अन्यथा कथं आदेशदानेन अनुगृहीताक्षि। गुरुवाक्यमिव निजपतेः आज्ञां कुर्व्वत्या मम निर्म्मल इहलोकः, अतो व्रजामि पितु-र्गृहम्। यत् पुनर्भर्त्तुर्भवनं, पतिं विना तत् परा-भवस्थानं नारीणाम्। इति निश्चित्य चलिता पार्श्वस्थितं नलमिव नक्षत्राणि विलोकयन्ती। विमलशीलप्रभावेण तस्याः केऽपि उपद्रवा न प्रभ-वन्ति। कोपवशसञ्जितक्रमोऽपि कुटिलदंष्ट्रः सिंहो दवदन्तीम् आक्रमितुं न शक्तः। गन्धलुब्धभ्रमरवधि-रितसकलदिक्चक्रं विस्तृतशुण्डादण्डं कुपितमपि गजकुलं दवदन्तीशीलप्रभावेण दूरं याति। विस्फा-रितस्फारफणाः हुङ्कारविमुक्तविषनिकराः प्रसरद्रोष-विकलाः विषधराः तस्यां प्रहर्त्तुं(४) न क्षमाः।

अथ मार्गपरिश्रमस्वेदजलक्लिन्नगात्रया कण्टक-विद्धपादतलक्षरद्रुधिरया धूलिधूसरशरीरया दव-दन्त्या दृष्टः सार्थ एकः समापतन्(५)। तत-श्चिन्तितं दवदन्त्या, अहो मम पुण्योदयेन अरण्य-

---

१ तस्यां प्रहर्त्तुं तां दष्टुम्।

२ समापतन्—आगच्छन्।

Digitized by Google

निस्कारणकारणं मया प्रशस्तः सार्थो दृष्टः। सार्थवाहो जननीमिव तां प्रणम्य पृच्छति, देवि! कासि त्वम्? कथम् अरण्ये परिभ्रमसि? ततो दवदन्त्या रुदत्या तस्याग्रे सर्वो निजवृत्तान्तः कथितः। तेनोक्तं, महाराजनलस्य भार्या मम पूजनीयासि। ततो मम आवासं पवित्रीकुरु। इति भणित्वा निजावासं नीत्वा सार्थवाहो देवतामिव तां पूजयति। अत्रान्तरे प्राप्तो वर्षाकालः। चिरात्रं निरन्तरा वृष्टिः सञ्जाता। दवदन्ती सुखेन स्थिता। विरतायां वृष्टौ सार्थं मुक्त्वा एकाकिनी पुनश्चलिता दवदन्ती।

ततश्च मार्गे गच्छन्ती पीतकेशं भ्रमरकुलकृष्णशरीरं कर्त्तिकाकरालकरं राक्षसं पश्यति। ततो भणितं राक्षसेन, अहो सप्तरात्रं बुभुक्षितस्य मम भक्ष्यमुपस्थितम्। दवदन्त्योक्तं, भद्र! जातस्य जीवस्य ध्रुवो मृत्युः। अकृतार्थस्य मृत्युर्भयाय नालम्। अहं अनेकदुःखदूनिता दुःखमोक्षस्य कृते मरणं प्रार्थयामि। त्वमपि नलविरहानलदग्धां मां सुखेन भक्षयिष्यसि। भक्षय मां किं विलम्बसे? एष मया तुभ्यं आत्मा समर्पितः। मरणं विना दुःखानां जलाञ्जलिः कुतो जायते? ततस्तस्याः

Digitized by Google

सत्त्वेन तुष्टो राक्षसः प्राह, भद्रे तुष्टोऽस्मि। तव किं प्रियं करोमि ? तया उक्तं, यदि तुष्टोऽसि, ततः कथय कदा मम पतिसङ्गमो भविष्यति ? विभुत्वबलेन (१)ज्ञात्वा भणितं राक्षसेन, प्रवासदिवसादारभ्य सम्पूर्णेषु द्वादशवर्षेषु पितृगेहस्थितायाः स्वयमेव मिलिष्यति नलस्तव। पुनस्तेन भणितम्, अनेन मार्गखेदेन किम् ? यदि भणसि ततो निमेषमात्रेण त्वां पितृमन्दिरे नयामि। तया उक्तं, कृतार्थाहं नलसङ्गमकथनेन। नाहं परपुरुषेण समं व्रजामि, व्रज त्वं स्वस्थाने। प्रभापुञ्जभास्वरं देवशरीरं दर्शयित्वा अदृश्यो बभूव राक्षसः। द्वादशवार्षिकं नलप्रवासं ज्ञात्वा दवदन्त्या नियमा गृहीताः।

ततस्तीव्रतपश्चरणपरा पारणके वीजरहितफलविहितप्राणवृत्तिः(२) चित्तस्थितां श्रीशान्तिनाथप्रतिमां ध्यायन्ती गिरिगुहायां स्थिता। सार्थवाहः सार्थमध्ये ताम् अदृष्ट्वा सभ्रान्तचित्तः सर्व्वत्र विलो-

१ विभुत्वबलेन—विभुत्वम् आकाशादीनां विभूनामिव सर्व्वव्यापकत्वं भूतभविष्यद्वर्त्तमानव्यापित्वं सर्व्वज्ञत्वमिति यावत्।

१ पारणके—पारणमेव पारणकं तस्मिन्। उपवासादनन्तरं भोजने। वीजरहितैः फलैः विहिता प्राणवृत्तिः जीवनधारणं यया सा।

Digitized by Google

कथन् गिरिगुहायां समागतः। ध्यानसमाहितया तया सम्भाषितः सार्थवाहः। तयोः संलापं श्रुत्वा सम्प्राप्तास्तत्र केऽपि तापसाः हरिणा इव निश्चल-कर्णाः स्थिताः। विस्मितचित्तैस्तापसैश्चिन्तितम्, अहो मानव्या ईदृग् रूपं ईदृशी शक्तिर्न भवति। ततो नूनं कापि देवता एषा। सार्थवाहेन उक्तं, देवि! किं त्वं ध्यायसि, किंवा निर्भया तिष्ठसि? तया उक्तम्, अहम् अर्हन्तं देवं(१) ध्यायामि। तस्य प्रभावात् नास्ति भयं मम। जिनधर्मस्वरूपं सविस्तरं कथयित्वा तत्र प्रतिपत्तिं(२) कारितः सार्थवाहः। तापसा अपि सम्प्राप्तक्षीरपाना काङ्क्षिकमिव निज-धर्मं निन्दन्तः जिनधर्मं प्रपन्नाः। तत्र सार्थवाहेन नगरं कारितम्। यत् तापसानां पञ्चशतानि प्रति-बुद्धानि(२) ततस्तस्य नगरस्य तापसपुरं नाम कृतम्। तत्र जिनमन्दिरं कारितम्। मध्ये श्रीशान्तिनाथ-प्रतिमा स्थापिता। सर्वेऽपि जिनधर्मपराः तत्र सुखेन कालम् अतिक्रामयन्ति।

एवं धर्मप्रसक्ता मलिनगात्री सप्तवर्षाणि गिरि-

---

१ अर्हन्तं—जैनानां प्रधानदेवताम्।

२ प्रतिपत्तिं—श्रद्धां गौरवं वा।

३ प्रतिबुद्धानि—सत्यज्ञानं प्राप्तानि।

Digitized by Google

गुहायां स्थिता। अन्यदा तया अकस्मात् एवं श्रुतं यथा—"दवदन्ति! अमुकप्रदेशे तव पतिरश्व नलो दृष्टः"। एवं श्रुत्वा वचनानुसारेण प्रधाविता दवदन्ती गता दूरम् अरण्ये पतिता। नलम् अविलोकयन्ती रोदितुं प्रवृत्ता।

अथान्तरे केनचित् सार्थवाहेन दृष्टा पृष्टा सा, कासि त्वं? तया उक्तं, वणिक्पुत्री अहम्। पितृगृहं यान्ती अरण्ये प्रसुप्ता परित्यक्ता भर्त्रा। सार्थवाहेन उक्तम्, अहम् अचलपुरे गमिष्यामि, ततस्त्वमपि आगच्छ वत्से! पुत्रीमिव प्रयत्नेन त्वां नेष्यामि। ततः प्रधानवाहने आरोपिता। चलितः सार्थवाहः। प्रभाते प्राप्य अचलपुरं दवदन्तीं मुक्त्वा अन्यत्र गतः सार्थः। तत्र अचलपुरे ऋतुपर्णो नाम राजास्ति। तस्य चन्द्रयशा नाम राज्ञी। तस्या दासीभिर्दृष्ट्वा दवदन्तीम् अस्या रूपेण विस्मिताभिर्गत्वा कथितं चन्द्रयशायै(१)। तयापि आत्मसमीपे आनाय्य कथिता दवदन्ती, भद्रे कासि त्वम्? दवदन्त्योक्तं, वणिक्पुत्री अहं अरण्ये त्यक्ता। चन्द्र-

---

१ चन्द्रयशायै—इति स्त्रीप्रयोगवशेन सकारस्त्रीपात् आकारान्तशब्दस्य रूपम् "निरङ्कुशाः कवयः"।

Digitized by Google

यशया उक्तं, चन्द्रवती पुत्रीव (१) मम वर्त्तसे, अतः सुखेन मम गृहे तिष्ठ। दवदन्ती राज्ञीनियोगेन नगरपरिसरे प्रतिदिवसं दीनानाथानां दानं ददाति।

अन्यदा भीमरथेन राज्ञा इति श्रुतं, यत् नलेन द्यूतासक्तेन राज्यं हारितं, दवदन्तीं गृहीत्वा महाटवी प्रविष्टा। न ज्ञायते कुत्रापि, किं जीवति अथवा मृतः। तत् श्रुत्वा स्थूलाश्रुसलिलसिच्यमानहृदया प्ररुदिता पुष्पदन्ती। ततो भीमरथेन राज्ञा तयोर्विलोकनार्थं प्रभुकार्य्यकरणपटुः प्रेषितो हरिमित्रनामा वटुः। क्रमेण परिभ्रमन् अचलपुरे समागत्य, ऋतुपर्णस्य राज्ञः पार्श्वे गतः। चन्द्रयशया पृष्टं, मम भगिन्याः पुष्पदन्त्याः कुशलं, वटुकेनोक्तं, नित्यमपि कुशलं पुष्पदन्त्याः। किन्तु नलदवदन्त्योः राज्यभ्रंशश्रवणात् पुष्पदन्त्याः महान् चित्तसन्तापो वर्त्तते। चन्द्रयशया उक्तं, वटुक एवं किं भणति? ततो हरिमित्रवटुकेन मूलादपि (२) नलदवदन्त्यो-

---

१ त्वं मम पुत्री चन्द्रवती इव वर्त्तसे भवसि। पुत्रीसादृश्यात् त्वयि मे मनः स्निह्यतीत्यर्थः।

२ अत आरभ्यार्थकपदप्रयोगाभावेऽपि तदर्थे पञ्चमी।

Digitized by Google

दृष्टान्तः कथितः। एवं श्रुत्वा चन्द्रयशा अत्यर्थं रोदनं करोति। तां रुदन्तीं दृष्ट्वा सकलोऽपि राजलोको (१) रोदिति। सर्व्वं शोकनिर्भरं(२) दृष्ट्वा क्षुधापीड़ितो वटुको दानशालायां गतः। तत्र भोजनार्थं प्रविष्टः। तत्र दानाधिकारिणीं दवदन्तीम् उपलक्ष्य सहर्षो बभूव। उत्थाय दवदन्तीं प्रणमति, एवमाह च, देवि! तव का एषा दुःस्था अवस्था जाता? माङ्गल्यं(३)वर्त्तते यदद्यापि जीवन्ती दृष्टासि। ततो विस्मृतक्षुधादुःखोगतश्चन्द्रयशासमीपे। एवं भणति, देवि! वर्द्धसे (४)। तव दानशालायां दवदन्ती वर्त्तते। तत् श्रुत्वा तत्र आगता चन्द्रयशा देवी, दवदन्तीं दृष्ट्वा गाढ़म् आलिङ्गति। चन्द्रयशया उक्तं, धिक् धिक् मां यया ईदृगवस्था त्वं न उपलक्षिता। वत्से! आत्मानं गोपयित्वा त्वया अहं कथं वञ्चिता? हा! किं त्वया नलो मुक्तः किंवा

---

१ राजलोकः राज्ञः लोकः राजपरिजन इत्यर्थः।

२ शोकनिर्भरं शोकेन निर्भरं दुःसहं कातरमित्यर्थः।

३ माङ्गल्यं मङ्गलमेव माङ्गल्यं स्वार्थे ष्यञ्। इदमेव अस्माकं शुभं यत् त्वम् ईदृशक्लेशपरम्परां सहित्वा अद्यापि जीवसि।

४ वर्द्धसे—अभ्युदययुक्ता भवसि।

Digitized by Google

नलेन त्वं मुक्ता ? निश्चितं नलः त्वया मुक्तः । यदि त्वमपि व्यसनपतितं पतिं परित्यजसि, ततो निश्चितं रविः पश्चिमदिशायामुदेति (१)। हा नल ! न लज्जसे त्वं गुणसञ्चयामेनां (२) परिहरन् ? किं नल एतत्ते कुलोचितम् ? वत्से ! तव दुःखानि गच्छामि(३)। क्षमस्व ममापराधं यत्र उपलक्षितासि त्वम् ।

अथ चन्द्रयशया निजकराभ्यां स्नानं कारयित्वा दिव्यवस्त्राणि परिधाप्य राज्ञः समीपे नीता दवदन्ती । चन्द्रयशादवदन्ती हेऽपि राज्ञा सह उपविष्टे । राज्ञा दवदन्ती राज्यभ्रंशादिवृत्तान्तं पृष्टा। ततोऽवनतमुख्या रुदन्त्या दवदन्त्या सकलोऽपि राज्यभ्रंशादिवृत्तान्तः कथितः। राज्ञा निजोत्तरीयवस्त्रेण तस्या नयनयुगलं परामृशता(४) उक्तं, वत्से ! मा रोदनं कुरु, सुरासुरेष्वपि प्रभवति विधिः ।

इतश्च कियद्दिनानन्तरं वटुकेन ऋतुपर्णो राजा एवं विज्ञप्तः । देव ! विसर्ज्जय दवदन्तीं पितुर्गृहे ।

---

१ दिशायां—दिशि । दिशाशब्दः अपभ्रंशः ।

२ गुणसञ्चयां—गुणानां शीलशालीन्यादीनां सञ्चयः समष्टिः यस्यां तथोक्ताम् ।

३ समदुःखा भवामि । Sympathize with thy misfortunes.

४ परामृशता—स्पृशता ।

Digitized by Google

चन्द्रयशया इष्टम्, एवं भवतु। ततो ऋतुपर्णेन राज्ञा विसर्जिता चतुरङ्गसेनाकलिता चलिता दवदन्ती। आगच्छन्तीं दवदन्तीं श्रुत्वा स्नेहतन्तुसन्दामितो(१) निर्गतः पुष्पदन्तीसहितो भीमरथभूपालः। ततो दूरादपि निजपितरौ दृष्ट्वा वाहनं त्यक्त्वा पित्रोः पदेषु पपात दवदन्ती। तेषां चिरात् मिलितानां नेत्रजलेन निपतता समन्तात् महीतले कर्दमं जातम्। यमुनेव गङ्गां, जननीम् आलिङ्ग्य दवदन्ती जननीकण्ठे लगित्वा विमुक्तकण्ठं चिरं रोदिति। ततो मुखकमलं प्रक्षाल्य अखिलमपि सुखदुःखं परस्परं कथयन्ति। अथ पुष्पदन्ती दवदन्तीम् उत्सङ्गे आरोप्य भणति, वत्से! यत् त्वं जीवन्ती दृष्टा, तत् अस्माकं पुण्यं जागर्त्ति। अस्मद्गृहे तिष्ठन्ती सुखेन निजपतिं विलोकयिष्यसि। भीमरथराजेन च परितुष्टेन हरिमित्राय ग्राम-पञ्चशतानि दत्तानि। ततो नगरमध्ये प्रवेशमहोत्सवो(२) बभूव। सप्त-दिनानि यावत् विशेषतो देवगुरुपूजा कृता।

---

१ स्नेह एव तन्तुः रज्जुः तेन सन्दामितः संयतः। सम्यक् दाम यस्य जातं सन्दामितः। (सम्+दामन्+इत)

२ प्रवेशमहोत्सवः—दवदन्त्याः पुरप्रवेशात् प्रवर्त्तितः महोत्सवः।

Digitized by Google

अष्टमदिने भीमरथेन राज्ञा दवदन्ती प्रत्युक्ता, वत्से ! तथा करिष्ये यथा तव नलसङ्गमो भविष्यति ।

इतश्च तस्मिन् क्षणे नलेन दवदन्ती मुक्ता अरण्ये परिभ्रमता वननिकुञ्जात् सञ्जातो धूमो दृष्टः । क्षणान्तरेण ज्वालाकरालो जातः । ततश्च दह्यमानवंशचटचटारवेण पूरितदिङ्मुखः विविधश्वापदाक्रन्दभैरवः कृतद्रुमोपद्रवः प्रदीप्तो वनदवः । तत्र "इक्ष्वाकुकुलकमलमार्त्तण्ड नल ! मां रक्ष" इति शब्दः नलेन श्रुतः । ततश्च निष्कारणकरुणापरवशेन शब्दानुसारतो गच्छता नलेन "रक्ष रक्ष" इति भणन् महाभुजङ्गमो दृष्टः । अयं मम नाम कुलं वा कथं जानाति ? अथवा सर्पस्य ईदृशी मानुषी भाषा कथं भवति ? इति विस्मितचित्तेन तस्य आकर्षणार्थं निजम् उत्तरीयवस्त्रं क्षिप्तं नलेन । तत् निजभोगेन (१) वेष्टितं सर्पेण । निस्तीर्णेन तेन मोक्तुकामो नलो दृष्टः करे । तं सर्पं भूमितले प्रक्षिप्य नलेन भणितं, त्वया कृतघ्नेन साधु कृतं, यत् मम

---

१ भोगेन—सर्पशरीरेण फणेन वा । "भोगः सुखे शुभे चाहेः शरीरफणयोरपि ।"

Digitized by Google

उपकारिणः(१)एवम् उपकृतम्। निश्चितम् एतत् सत्यं, यः क्षीरं पाययति सोऽपि तव जात्या दश्यते। एवम् उक्तवतो नलस्य विसर्पता सर्पविषेण क्षणेन कुब्जं वपुर्बभूव। पिशाच इव कपिलकेशः, करभ इव सूक्ष्मपाणिपदः, गणपतिरिव लम्बोदरः नलो बभूव। ततश्च वीभत्स(२)सर्व्वगात्रम् आत्मानं विलोक्य नलेन चिन्तितम्, अहो अनेन रूपेण मुधा मम जीवितम्। अतः परलोकोपकारिणीं दीक्षां गच्छामि। इति चिन्ताप्रपन्नस्य नलस्य सर्परूपं त्यक्त्वा देवः प्रकटीबभूव। उवाच च, राजन्! विषादं मुञ्च, अहं निषधनामा तव पिता। तदा तव राज्यं दत्त्वा दीक्षां प्रतिपद्य मृत्वा ब्रह्मलोके देवत्वेन उत्पन्नः। अवधिज्ञानेन (३) मया तव एषा अवस्था ज्ञाता। ततो मया मायया सर्परूपं कृत्वा दुर्दशापतितस्य तव शरीरं विरूपं विहितम्। तत् त्वया कटुकौ-

---

१ वाक्यमिदं लक्षणया विपरीतार्थकम्। The whole sentence is is ironical.

२ बीभत्सं—बधनिन्दायां, तस्मात् स्वार्थे सन्, ततः कर्म्मणि अल्। निन्दितं कुत्सितम्।

३ अवधिज्ञानेन—कस्मिन्काले का घटना भविष्यति, कस्मिंश्च काले सा अन्तर्मायास्यति इति कालिकसीमा अवधिः तस्य ज्ञानं तेन।

Digitized by Google

षधपानमिव चिन्तयितव्यम्। यतः त्वया सर्व्वेऽपि राजानः किङ्करीकृताः अतो विरूपत्वेन अनुपलक्षणीयं त्वां न उपद्रविष्यन्ति। साम्प्रतं दीक्षामनोरथमपि मा कुरु। अद्यापि भोक्तव्या त्वया सकलापि मही। अहमेव तव चरित्रसमयं (१) कथयिष्यामि। तथाच एतत् विल्वम् एनां रत्नकरण्डिकां च गृहाण। एतत् इयं यत्नेन धार्य्यम्। यदा पुनः स्वरूपं वाञ्छयिष्यसि तदा एतत् विल्वं स्फोटनीयम्। अस्य मध्ये देवपुष्पाणि प्राप्स्यसि। रत्नकरण्डिका उद्घाटनीया। तत्र हारप्रमुखाभरणानि द्रक्ष्यसि। तैर्देवपुष्पैराभरणैश्च परिहितैर्निजरूपं प्राप्स्यसि।

इतश्च नलेन देवसमीपे दवदन्तीवृत्तान्तः पृष्टः। तेन देवेन सतीत्वप्रधानः (१) सर्व्वोऽपि वृत्तान्तः कथितः। भणितो देवेन नलः, किम् एवम् अरण्ये परिभ्राम्यसि? यत्र त्वं गन्तुम् इच्छसि तत्र नयामि त्वाम्। नलेनोक्तं, सुंसमारपुरे नय माम्। ततश्च क्षणमात्रेण सुंसमारपुरे

---

१ चरित्रसमयं—दीक्षाग्रहणेन चारित्रयुक्तिप्राप्तिकालम्।

१ सतीत्वं प्रधानं यस्मिन्, यत्र वृत्तान्ते पतिव्रताधर्म्मः प्राधान्येन प्रकटित आसीत्।

Digitized by Google

नलं विमुच्य गतो देवः स्वस्थानम्। नलोऽपि तस्य नगरस्य उद्याने जिनभवने नमिनाथं नमित्वा सुंसमारपुरद्वारे गतः। इतश्च उन्मूलितालानस्तम्भः पवनसम्भ्रमेन (१) कम्पितासनः उपरि सञ्चरतो विहङ्गमानपि करेणाकर्षन् तरुवनं भञ्जयन् भ्रान्तो मत्तहस्ती। तत्र दधिपर्णेन राज्ञा प्राकारम् आरुह्य भणितं, यः एनं कुञ्जरं वशीकरोति, तस्य यत् वाञ्छितं तत् ददामि। नलकुब्जेन उक्तं, कुतः स मत्तगजो यं वशीकरोमि। एवं कथयतो नलस्य पुरतः मेघ इव गर्जन् तत्र प्रदेशे समागतो गजः। तं प्रति धावितः गजः शुण्डपातवञ्चनाकुशलेन(२) अग्रतः पृष्ठतः पार्श्वतः सञ्चरता नलेन परिश्रमं गमितो गजः। गरुड़ इव उत्प्लुत्य तस्य स्कन्धमारुह्य कुब्जः पूर्वार्पितासने (३) उपविश्य पृष्ठप्रदेशे चरणौ प्रक्षिप्य कुम्भस्थले चपेटया आहतवान् गजम्।

---

१ पवनसम्भ्रमेन—गतिवेगवशात् उत्थापितपवनाचपेण कम्पितम् आसनं (पृष्ठस्थं) यस्य तथोक्तः।

२ शुण्डायाः पाताः विचेपाः तेषां वञ्चना परिहारस्तस्मिन् कुशलेन दचेण।

३ पूर्वार्पितासने—पूर्वम् अर्पितं यत् आसनं हाओदा इतिभाषा तत्र।

Digitized by Google

ततो लोकेन जयारवः उत्सृष्टः, राज्ञा सुवर्णशृङ्खलं दत्तम्। वशीकृत्वा नलेन आलानस्तम्भे नीतो गजः। ततो गजादुत्तीर्य दधिपर्णस्य प्रणामम् अकृत्वा आसने उपविष्टो नलः। राज्ञा दधिपर्णेनोक्तं, भोः कुब्ज! हस्तिशिक्षाविचक्षण! अन्यदपि किञ्चित् विज्ञानम् अस्ति? कुब्जेनोक्तं, यदि सूर्यपाकां रसवतीं(१) द्रष्टुम् इच्छसि, ततः करोमि। ततो राज्ञा समर्पिता रसवतीसामग्री(२) कुब्जस्य। सूर्यातपे स्थालीं मुक्त्वा सूर्यविद्यां(३) स्मरता कुब्जेन कृता दिव्या रसवती(४)। कल्पवृक्षदत्तामिव मनोज्ञां तां रसवतीं सपरिवारो भुक्तवान् राजा। ततो दधिपर्णराजेनोक्तम्, अहो रसवत्याः पाकप्रकर्षः,

---

१ सूर्यपाकां—सूर्येण सूर्यकिरणेन पाको यत्र तादृशीं रसवतीं महानसम्। The idea, though at first seeming to be Utopian, has found favour with scientific men in recent times.

२ रसवतीसामग्री—कटुतिक्तमधुरादिरसयुक्तं वस्तुजातम्।

३ सूर्यविद्यां स्मरता—सूर्यज्ञानं मनसि ध्यायता सूर्यतत्त्वादिस्थापकं मन्त्रं जपता इत्यर्थः।

४ रसवती—खाद्यानि व्यञ्जनानि, Dishes. रसवतीशब्दो महानसे रूढः; तथापि लक्षणावलेन तत्र विहितं नानारसवत् वस्तुजातमपि बोधयति।

Digitized by Google

अहो रसमाधुर्य्यम्, अहो विशेषपेशलता(१), अहो सर्व्वेन्द्रियोपकारकत्वम् (२)! ईदृशीं रसवतीं नल एव जानाति। नलं सेवमानस्य मम चिरपरिचिता एषा (३)। ततः किमयं कुब्जः नलः? अथवा ईदृशो विरूपो नलो न सम्भाव्यते। अथवा द्वियोजनशतान्तरे तस्य आगमनं कुतः? अथवा तस्य भरतार्द्धस्वामिनः एकाकित्वं कुतः? ततस्तुष्टेन राज्ञा कुब्जस्य वस्त्रालङ्करणानि दत्तानि, टङ्कलक्षं, ग्रामाणां च पञ्चशतं दत्तम्। शेषं सर्व्वमपि गृहीतं, ग्रामाणां पञ्चशतानि न गृहीतानि। राज्ञा कुब्जं प्रत्युक्तं, तव अन्यदपि किञ्चित् प्रदीयताम्। कुब्जेनोक्तं, यदि एवं, ततो निजराज्ये आखेटकञ्च मद्यञ्च निवारय। राज्ञापि तस्य वचनबहुमानतस्तथैव कृतम्।

अन्यदा दधिपर्णेन राज्ञा कुब्जः पृष्टः, कस्त्वं कुतो वागतः? कुब्जेनोक्तं, कोशलायां नगर्य्यां

---

१ विशेषपेशलता—विशेषेण पेशलता कोमलत्वं; इदं पदं "रसवत्याः" इत्यनेन सम्बध्यते।

२ सर्व्वेन्द्रियोपकारकत्वं—सर्वेषां दर्शनघ्राणरसनेन्द्रियाणाम् उपकारकत्वं तृप्तिदायकत्वम्।

३ यदा अहं भारतार्द्धस्वामिनं नलं पूजयितुं अगाम, तदा ईदृक् रसवती मम परिचिता आसीत्।

Digitized by Google

राज्ञो नलस्य हुण्डिकनामा अहं सूपकारः। तस्य नलस्य समीपे मया कलाः शिक्षिताः। नलः कूवरेण द्यूते राज्यं हारितः दवदन्तीं गृहीत्वा प्राप्तोऽरण्यं तत्रैव विपन्नः। ततः कारणात् अहं तव समीपे आगतः। पुनरगुणज्ञस्य कपटकूटस्य(१) कूवरस्य समीपे न स्थितोऽहम्। ततो दधिपर्ण-नरेन्द्रो नलस्य मरणवृत्तान्तं श्रुत्वा तं शोचन् कथयितुमपि न शक्यते (२)। अन्यदा दवदन्त्याः पितुः समीपे केनापि कारणेन दधिपर्णेन राज्ञा दूतः प्रेषितः, भीमेन राज्ञा सत्कारितः। कदाचित् प्रस्तावे(३) भीमस्य राज्ञोऽग्रे दूतेनोक्तं, मम स्वामिनः समीपे नलसूपकारोऽस्ति। नलोपदेशात् स सूर्य्य-पाकां रसवतीं जानाति। तत् श्रुत्वा दवदन्त्या पिता उक्तवान्! चरं प्रेष्य जानीहि कोऽप्यस्ति सूपकारः; नलं विना न जानाति कोऽप्यन्यः सूर्य्य-पाकां रसवतीम्; यदि पुनर्गोपितात्मा नलो

---

१ कपटकूटस्य—कपटरूपस्य, कपटबहुलस्य।

२ शक्यते—शक्नोति। दैवादिकात् आत्मनेपदिनः शकधातोः रूपम्।

३ प्रस्तावे—प्रसङ्गसङ्गत्या।

Digitized by Google

भवेत्। ततः स्वामिकार्य्यकुशलः कुशलो नाम विप्रो दधिपर्णसूपकारस्य रूपज्ञानस्य कृते राज्ञा भीमेन प्रहितः। कुशलविप्रः सुंसुमारपुरे गतः, शुभशकुनैर्हिगुणितोत्साहो जातः। परं कुब्जं दृष्ट्वा निखिन्नो (१) विषण्णश्चिन्तयति, कुत्र नलो दिव्यरूपी कुत्र अयं कुब्जः, यत् मेरुसर्षपयोरन्तरम् एतयोर्नलकूबरयोस्तदेवान्तरम्। ततः कुशलश्चित्ते किमपि सम्प्रधार्य्य नलपरीक्षार्थम् इदं गीतं गायति——

निर्घृणनिष्ठुरकापुरुषेण केनचित् सुप्ता निशि सुप्ता दवदन्ती!

ततः गीतं पुनः पुनर्गीयमानं श्रुत्वा दवदन्ती स्मरन् सूपकारो गलदश्रुजलो रोदिति। कुशलेनोक्तं भोः कुब्ज! कथं रोदिषि? कुब्जेनोक्तं, करुणारससम्पूर्णं तव गीतं श्रुत्वा रोदिमि। कुब्जेन पृष्टः कुशलो गीतार्थम्। ततो नलद्यूतादारभ्य कुण्डिनपुरे दवदन्तीगमनपर्य्यन्तं कुशलेन कथा कथिता। पुनरपि उक्तं कुशलेन, भोः कुब्ज! दधिपर्णराजस्य दूतेन भीमराजस्याग्रे त्वं सूर्य्यपाकरसवतीकारः कथितः। सूर्य्यपाकरसवतीसमर्थो नल एव चिन्तयन्त्या दवदन्त्या जनकम् अभ्यर्थ्य तव विलोक-

---

१ निखिन्नः—नितरां खिन्नः खेदमापन्नः।

Digitized by Google

नार्थम् अहं प्रेषितः। त्वां दृष्ट्वा मया चिन्तितं, कुत्र अत्यर्थं कुरूपः कुब्जः, कुत्र सर्वाङ्गोपाङ्गपेशलो(१) नलः। कुत्र मत्स्यकुटुम्बको(२) यक्षः, कुत्र वा क्षत-जनानन्दसन्दः। तव स्थानं प्रति आगच्छतो मम शुभशकुनसङ्घातः(३) सञ्जातः, सोऽपि निष्फलो बभूव यत् त्वं न भवसि नलः। ततो दवदन्तीप्रेमपर-वशेन कुब्जेन निजगृहे नीतो विप्रः। कुब्जेनोक्तं, भो विप्र! महापुरुषस्य नलस्य गीतश्रावणेन तव किमपि स्वागतं क्रियताम्। इत्युक्ता भोजनादि-सामग्री दत्ता। कुब्जेन दधिपर्णदत्तम् आभरणं सर्वं विप्राय दत्तम्। ततश्च कुशलेन(४) कुशलः सम्प्राप्तः कुण्डिनपुरम्। भीमराजस्याग्रे मत्तगजवशीकरण-मूलः (५) सर्वोऽपि कुब्जवृत्तान्तः कथितः। दवदन्त्या

---

१ सर्वेषु अङ्गेषु हस्तपादादिषु उपाङ्गेषु प्रत्यङ्गेषु अङ्गुलीदन्तादिषु पेशलः कोमलः।

२ मत्स्येन सह वक्रस्य जात्यजातकसम्बन्धः यतः वक्रो मत्स्य-कुटुम्बकः मत्स्यसम्बन्धी।

३ शुभशकुनसङ्घातः—भाविशुभसूचकनिमित्तसमूहः।

४ कुशलेन—निर्विघ्नमित्यर्थः।

५ मत्तगजवशीकरणमूलः—मत्तस्य गजस्य वशीकरणं मूलं प्रथमं यस्य तथोक्तः।

Digitized by Google

उक्तं, तात ! निश्चितं स नल एव केनापि आहार-दोषेण कर्म्मदोषेण वा विरूपो जातः । यतः—

करिशिक्षाकुशलत्वं सूर्य्यपाकस्य च करणसामर्थ्यम्,
अत्यद्भुतश्च दानं नलं विनान्यस्य नास्त्येव ।

ततः केनापि उपायेन तं कुब्जम् इह आनय यथा तस्य स्वयमेव परीक्षां करोमि । भीमराजेन उक्तं, वत्से ! अलीकं स्वयंवरं श्रुत्वा त्वरितं आगमिष्यति । यदि स कुब्जो नलो भवेत् ततस्त्वाम् अन्यस्मै दीयमानां श्रुत्वा न सहिष्यते ; अवश्यमेव दधिपर्णेन सह समेष्यति । तथाच तुरङ्गमहृदयज्ञोऽस्ति(१)नलः । यदि स कुब्जो नलो भवति, ततो रथतुरङ्गमप्रेरणेन ज्ञातव्यः । आसन्नं दिवसं कथयिष्यामि,(२)यदि तत्र कुब्जो वेगेन समेष्यति, ततो निश्चितं नल एव सः । अन्योऽपि स्त्रीपराभवं न सहते किं पुनर्नलनरेन्द्रः ? ततो भीमेन दधिपर्णस्य दूतः प्रेषितः, तेन चैत्रस्य सितपञ्चम्यां दवदन्तीस्वयंवरः कथितः । दधिपर्णेन चिन्तितं, मम अभिलषणीया दवदन्ती, परं सा दूरदेशे वर्त्तते, प्रभाते पञ्चमी, तत्र गन्तुं न शक्यते ।

---

१ तुरङ्गहृदयज्ञः—तुरङ्गाणां हृदयं स्वरूपादिकं जानाति यः सः ।

२ An early day shall I appoint.

Digitized by Google

तावत् किं करोमि? चिन्तापरवशो मत्स्य इव स्तोकजले अरतिं प्राप्तो दधिपर्णः। कुब्जेन चिन्तितं, दवदन्ती महासती, अन्यं वरं न वाञ्छति, कदाऽपि यदि इच्छति तथापि मयि विद्यमाने तां को गृह्णाति। अतो दधिपर्णं षड्भिः प्रहरैर्नयामि तत्र, यथा अनेन सह ममापि प्रसङ्गेन गमनं भवति। ततः कुब्जेन उक्तो दधिपर्णः एवं किं त्वं ताम्यसि? कारणं कथय। अकथितरोगस्य रोगिणश्चिकित्सा न क्रियते। राज्ञोक्तं, भोः कुब्ज! कृतसुरपुरप्रवेशमङ्गलो नलो बभूव। दवदन्ती पुनरपि प्रभाते स्वयंवरं करिष्यति। मम दवदन्तीलाभाभिलाषोऽस्ति। विदर्भास्तु दूरे, षड़ेव प्रहरा अन्तरे(१), बहुभिर्दिवसैर्दूतः समागतः। अहं पुनरियता कालेन कथं गमिष्यामि इति चिन्तया निर्वृतिं न प्राप्नोमि। कुब्जेन उक्तं, राजन्! मा कुरु चिन्ताम्। जात्यतुरङ्गमसहितं(२) मम अर्पय रथं यथा प्रभाते त्वां कुण्डिनपुरं नयामि।

---

१ अन्तरे वर्त्तमानत्वस्य स्वयंवरत्वस्य च मध्ये षड़ेव प्रहराः केवलम् अष्टादशघटिका व्यवहिताः सन्ति।

२ जात्यः—जातौ भवः कुलीनः; महीत्कर्षयुक्त इत्यर्थः।

Digitized by Google

अयं न सामान्यपुरुषः, किन्तु विद्याधरः सुरो वा इति विचिन्त्य जात्यतुरङ्गयुक्तः अर्पितो रथो राज्ञा। तं रथं प्रगुणीकृत्य(१) नलेन दधिपर्णो भणितः, रथमारोहतु देवः। ततो राजा स्वगिकारः(२) छत्रधरौ द्वौ चामरधरौ तस्मिन् रथे एते पञ्च आरूढाः, षष्ठः कुब्जश्च तत् विश्वञ्च करण्डिकाश्च कटितटे वस्त्रेण बद्ध्वा कृतदेवगुरुस्मरणस्तुरङ्गमान् खेटयति(३)। ततो हयहृदयज्ञेन नलेन प्रेर्यमाणचतुस्तुरङ्गमो रथो गन्तुं प्रवृत्तः।

इतश्च रथवेगपवनोद्भूतो दधिपर्णस्य पटः पतितः। दधिपर्णेनोक्तश्च कुब्जस्याग्रे। कुब्ज नोक्तं विहस्य,राजन्! क्व तव पटः? परपवनात्(४)योजनानां पञ्चविंशतिं रथः समागतः। ततः विस्मितेन दधिपर्णेन अग्रे विभीतकवृक्षं दृष्ट्वा कुब्जं प्रत्युक्तं, भोः कुब्ज! अत्र विभीतके यावन्ति फलानि तिष्ठन्ति, तानि अगण-

---

१ प्रकृष्टा गुणा रज्जवो यत्र स प्रगुणः, तमप्रगुणं प्रगुणं कृत्वा; रज्जुबन्धनेन सज्जीकृत्य इत्यर्थः।

२ स्वगिकारः—ताम्बूलकरङ्कवाही सेवकः स्वगिताम्बूलाधारः।

३ खेटयति—प्रेरयति।

४ परपवनात्—रथवेगजनितात् प्रबलवातात्।

Digitized by Google

यन् अहं तेषां संख्यां जानामि। कुब्जेनोक्तं, तर्हि दर्शय कौतुकम्। राज्ञोक्तं, साम्प्रतम् कालविलम्बो भवति, प्रत्यावर्त्तमानस्तव कौतुकं दर्शयिष्यामि। कुब्जेनोक्तं, राजन्! मा बिभीहि, मयि सारथौ कालविलम्बो न भविष्यति। एकमुष्टिप्रहारेण(१) सर्व्वाणि फलानि तव अग्रे पातयामि। राजोवाच, पातय त्वं फलानि। आश्चर्य्यं विलोकय, फलानाम् अष्टादशसहस्राणि तिष्ठन्ति। ततो मुष्टिप्रहारेण पातितानि कुब्जेन। दधिपर्णेन यावन्ति कथितानि तावन्त्येव कुब्जेन गणितानि। ततः प्रार्थितेन कुब्जेन दधिपर्णस्य अश्वहृदयविद्या(२) दत्ता। स्वयं दधिपर्णात् संख्याविद्या(३) गृहीता। प्रभाते कुण्डिनपुरासन्ने (४) गतो रथः। दधिपर्णो विकसितमुखकमलो जातः।

---

१ एकमुष्टिप्रहारेण—एकेन मुष्ट्याघातेन।

२ अश्वहृदयविद्या—अश्वानां हृदयं स्वरूपादिकं तस्य निरूपकसाधिका विद्या।

३ सङ्ख्याविद्या—यया विद्यया पृथक् पृथक् गणनामकृत्वा, समष्टिं कथयितुं शक्यते।

४ आसन्ने—समीपे, भावे क्तः।

Digitized by Google

अत्रान्तरे दवदन्त्या रात्रिविरामे (१) स्वप्नं दृष्ट्वा पितुरग्रे कथितं, यत् मया श्रीनिर्ऋतिदेवी दृष्टा। तया गगनमार्गे कोशलोद्यानम् आनीतम्। ततो देवीवचनेन पुष्पफलं कलयितुम् अहं सहकार-वृक्षे आरूढा। मम हस्ते देव्या प्रधानफलं समर्पितम्! तस्मिन् क्षणे पूर्व्वारूढो विहङ्गमः पतितः। भीमेनोक्तं, पुत्रि! त्वया उत्तमः स्वप्नो दृष्टः। या निर्ऋति-देवी, स तवपुण्यराशिर्जागरितः (२)। यत् कोशलो-द्यानं तत् कोशलाराज्यं, यत् सहकारारोहणं तत् नलसङ्गमकारणं, यत् पूर्व्वारूढविहङ्गमपतनं तत् कूबरस्य राज्यभ्रंशः, यत् प्रभाते दृष्टः स्वप्नः तत् तव अद्यैव नलो मिलिष्यति। तदानीमेव दधिपर्णः पुरद्वारे समागतः। मङ्गलाभिधानपुरुषेण आगत्य भीमस्याग्रे निवेदितो दधिपर्णः। भीमेन मित्र-मिव आलिङ्गितो राजा, समर्पितः प्रवरावासः। भोजनादिकं कारयित्वा भीमेन पृष्टो दधिपर्णः,

---

१ रात्रिविरामे—निशावसाने प्रभाते दृष्टेहि स्वप्नः सत्यः फलति।

२ जागरितः प्रबुद्धः फलदानोन्मुख इत्यर्थः। तव पुण्यराशिस्तु पूर्वं सुप्त इव आसीत्; अतस्ते कोशलाप्राप्ते विलम्बः संवृत्तः।

Digitized by Google

तव सूर्यपाकसूपकारोऽस्ति, तं दर्शय मम। ततो दधिपर्णेन रसवती-करणार्थं कुब्जः समादिष्टः। कुब्जेनापि तत्क्षणादेव रसवती कृता। दधिपर्णः सपरिवारः तां रसवतीं भुक्तवान्। ततो दवदन्त्या तस्य आस्वादपरीक्षार्थं भक्ष्यपूरितं स्थालम् आनाय्य भुक्तम्। रसास्वादनात् निश्चितम् अयं कुब्जो नल एव इति भणितं दवदन्त्या। पूर्वं ज्ञानिना गुरुणा मम कथितं, भरतक्षेत्रे नलं विना अन्यो न जानाति सूर्यपाकां रसवतीम्। ततो निश्चितम् अयं नल एव। यत् पुनरयं कुब्जस्तत् केनापि कारणेन भवितव्यम्। नलस्य एका (१) परीक्षा रसवती।

ततः दवदन्ती कुब्जसमीपं गत्वा आह, तदा त्वया अहं सुप्ता मुक्ता, साम्प्रतं प्राणनाथ! दृष्टोऽसि त्वं, कुत्र गमिष्यसि? इति भणन्त्या तया नीतो गृहाभ्यन्तरं नलः, अभ्यर्थितः स्वरूपं प्रकाशयति। ततो विस्वात् करण्डकात् वस्त्राभरणानि परिधाय स्वरूपं प्राप्तो नलः। तं दृष्ट्वा हृष्टचित्ता

---

१ एका—मुख्या।

Digitized by Google

दवदन्ती वल्लीपादपमिव गाढम् आलिङ्गति। भीमेनापि ज्ञात्वा नलो निवेशितो निजसिंहासने, उक्तं च, त्वं स्वामी, समादिश किं करोमि। इति भणन् कृताञ्जलिरग्रे उपविष्टो भीमः। दधिपर्णेन विज्ञप्तो नलः, त्वयि नाथेऽपि अज्ञानात् यदनुचितं मया विहितं तत् क्षमस्व। दवदन्त्या आकारितः समागतः ऋतुपर्णो राजा चन्द्रयशासमेतः। तथाच तापसपुरस्कारो वसन्तः श्रीशेखरः(१)आकारितः। भीमेन तेषां प्रतिपत्तिः(२)कृता। ऋतुपर्णवसन्तभीमप्रमुखैर्महीनाथैर्मिलित्वा नलो राज्ये अभिषिक्तः।

ततो नलादेशेन तैः सर्व्वैर्निजबलान्वितैः परिवृतो गर्ज्जन्मत्तमातङ्गदलस्तुरगच्छत्तचौणिरेणुरुद्धनभस्तलो रथचक्रनिर्घोषोत्कम्पितारिचक्रकर्णयुगलो नलः प्राप्तः अयोध्यापरिसरे। नलं समागतं श्रुत्वा महासन्तापकवलितकलेवरः कूवरो बभूव। दूतमुखेन नलेन कूवरस्य एष

---

१ श्रीशेखरः—श्रीः लक्ष्मीः शेखरः शिरोभूषणं यस्य तथोक्तः। श्रीशेखरपदवीयुक्तः।

२ प्रतिपत्तिः—गौरवं, पूजा इत्यर्थः।

Digitized by Google

सन्देशः कृतः, मया सह युध्यस्व, तव लक्ष्मीर्मम भवतु अथवा मम लक्ष्मीस्तव भवतु। अथ कूबरेण पुनर्द्यूतं प्रारब्धं युद्धभीतेन। पुष्पपरिभूतेन(१) नलेन सर्व्वं हारितः कूबरः। ततो नलेन क्रूरोऽपि कूबरो मम लघुबन्धुः इति कारणात् पूर्वमिव युवराजपदे कृतः। इत्थं निजराज्यं लब्ध्वा दवदन्तीसहितो नलो राजा अयोध्याचैत्यानि(२) नमस्करोति। कृतविविधप्राभृतै(३)र्नरेन्द्रैः नलो नमितपदकमलो भरतार्द्धराज्यं बहूनि वर्षसहस्राणि करोति।

---

१ पुष्पपरिभूतेन पुष्पपरिपुष्टेन।

२ चैत्यानि—पूजास्थानानि, मठाः।

३ प्राभृतैः—उपहारैः।

Digitized by Google

बुद्धदेवचरितम् ।

अथ खलु शिशिरकाले निर्गते वैशाखे मासि विशाखानक्षत्रानुगतायां पञ्चदश्यां (१) पूर्णिमायां तरुवरपत्राकीर्णे प्रवरपुष्पसंकुसुमिते सुसंस्थिते(२) च सर्व्वतो धरणीतले त्रिभुवनज्येष्ठः (३) लोकमहितः बोधिसत्त्वः (४) तुषितवरभवनात्(५) च्युत्वा, जनन्याः दक्षिणायां कुक्षौ अवाक्रामत्। मायादेवी स्वप्ने चैतदपश्यत्। अथ सा प्रह्लादितकायचित्ता(६)शयनवरतलादुत्थाय नारीगणपरिवृता प्रासादवरशिखरादवतीर्य्य अशोकवनिकामुपाजगाम। तत्र सा सुखोप-

---

१ पञ्चदशी—पञ्चदशानां तिथीनां मध्ये अन्तिमा तिथिः। सा तु पूर्णिमामावस्ययोरन्यतरा, अत्र तु विशेषबलात् पूर्णिमा गम्यते।

२ सुसंस्थिते—सर्व्वथा उत्पातरहिते सम्यक् निर्वृतिसम्पन्ने।

३ त्रिभुवनज्येष्ठः—त्रिभुवने सर्व्वेषु वृद्धतमः।

४ बोधिसत्त्वः—बुध्यते इति बोधि तादृशं सत्त्वं मनो यस्य। नित्यबुद्धज्ञानवत्त्वात् बुद्ध एव बोधिसत्त्वनाम्नाभिधीयते।

५ तुषितवरभवनात्—तुषितनामकं पुरं दिवि स्थितं बुद्धस्य नगरं तत्रस्थात् भवनात्।

६ प्रह्लादितकायचित्ता—प्रह्लादचित्ते एव वर्त्तते। स च पुलक-सुखरागादिभिः बाह्यकार्य्यजातैः कायेऽपि परम्परया भवत्येव।

Digitized by Google

विष्टा राज्ञः शुद्धोदनस्य दूतम् प्रेषयामास सन्दिदेश च आगच्छतु देवः देवी त्वां द्रष्टुकामेति ।

अथ स राजा शुद्धोदनः तद्वचनं श्रुत्वा प्रहर्षितमनाः भद्रासनादुत्थाय (१) अमात्यबन्धुजनपरिवृतः द्रुतमशोकवनिकामाजगाम । यावत् स तस्याः द्वारमासाद्य मुहूर्त्तं चिन्तयामास तावदियमशरीरिणी वाणी प्रादुरभूत् व्रततपोगुणयुक्तः त्रिसहस्रलोकेषु पूज्यः मैत्रीकरुणानुपेतः पुण्यज्ञानाभिषिक्तः महात्मा बोधिसत्त्वः तुषितपुरात् च्यवित्वा मायाकुक्षिमुपपन्न इति । ततः विस्मयमापन्नः स्वं शिरः कम्पयन् नृपतिरनुप्रविश्याह, करोमि किं ते प्रिये शोभनानीति । देवी आह, हिमरजतनिकाशः चन्द्रसूर्य्यातिरेकी सुचरणः सुविभक्तगात्रः(२) षड्विषाणः गजवरदृढसन्धिः (३)वज्रकल्पः सुरूपो महात्मा ममोदरे प्रविष्ट इति । अयि साधो नृपते वेदोप-

---

१ भद्रासनात्—भद्रं उत्तमम् आसनं तस्मात् ।

२ सुविभक्तगात्रः—सर्व्वावयवानवद्यः । Of a well-proportioned person, of well-defined features.

३ गजवरदृढसन्धिः—गजराजस्येव तस्य शरीरसन्धिस्थानानि गुल्फजानुकटिप्रभृतीनि दृढानि आसन् ।

Digitized by Google

निषदिदो ब्राह्मणान् शीघ्रमाहूय ये हि ममेमं स्वप्नं व्याकुर्य्युः निश्चिनुयुश्च किमस्मात् श्रेयः पापं वा कुलस्य भवेदिति। वचनमिदमाकर्ण्य पार्थिवः तत्क्षणमेव वेदज्ञानाजुहाव। ब्राह्मणा देव्याः पुरत आगत्य स्वप्नवृत्तान्तमाकर्ण्य आहुः, विपुलां प्रीतिं विन्दस्व कुलस्य किञ्चिदपि पापं नाशङ्कनीयम्। पुत्रं जनयिष्यति भवती लक्षणैः भूषिताङ्गं राजकुलपुङ्गवं चक्रवर्त्तिनं महात्मानं, स च पुनः विहाय कामराज्यं(१) च गेहञ्च प्रव्रजिता निरपेक्षः(२) सर्व्वलोकानुकम्पी। भविष्यति बुद्ध एषः दर्शनीयस्त्रिलोके यो हि अमृतरसवरेण(३) तर्पयिष्यति सर्व्वलोकम्।

व्याहृतेति गिरं सौम्यां श्रुत्वा पार्थिवभोजनम्।
आच्छादनानि चोद्गृह्य प्रययुर्ब्राह्मणास्तदा॥

ततः प्रमुदितमनाः नृपतिः तस्यामेव वेलायां

---

१ कामराज्यं—कामानां भोगलक्षणानां राज्यम् आधिपत्यम्। विहाय त्यक्त्वा, वैराग्यमवलम्ब्य।

२ निरपेक्षः—नास्ति अपेक्षा यस्य तथोक्तः, निःसङ्गः, उदासीन इति यावत्।

३ अमृतवरसवरेण—अमृतं निर्वाणं तदेव रसवरः आस्वाद्यश्रेष्ठः तेन।

Digitized by Google

कपिलवस्तुनि महानगरे चतुर्षु पुरद्वारेषु सर्व्वनगरचत्वरशृङ्गाटकेषु (१) च दानं दापयति स्म। अन्नमन्नार्थिभ्यः पानं पानार्थिभ्यः वस्त्राणि वस्त्रार्थिभ्यः यानानि यानार्थिभ्यः गन्धमाल्यविलेपनचूर्णशय्यास्थिकमुपजीविभ्यश्च प्रददौ।

अथ खलु परिपूर्णे दशमे मासि बोधिसत्त्वो मातुर्दक्षिणपार्श्वात् निष्क्रामतिस्म। अत्रान्तरे शक्रब्रह्मप्रमुखलोकपालादयः बहवोदेवा बोधिसत्त्वं जातमात्रं नानागन्धोदकैः स्नापयन्तः कुसुमैरवकिरन्तिस्म। अन्तरीक्षे द्वे चामरे रत्नच्छत्रं च प्रादुरभूत्। तस्मिन् खलु पुनः समये बोधिसत्त्वस्य दिव्यचक्षुरजायत। येन खलु स सनगरग्रामजनपदराष्ट्रराजधानीकं सदेवमानुषं लोकत्रयं पश्यतिस्म, सर्व्वसत्त्वानाञ्च (२) चित्तचरितं प्रजानाति स्म। तस्मिन् खलु समये पुलकिताः सर्व्वेऽपि सत्त्वा अभूवन्। दिव्यमानुषकानि तूर्य्याणि सम्प्रवादितानि।

---

१ सर्व्वनगरचत्वरशृङ्गाटकेषु—सर्व्वाणि नभरान्तःपातीनि चत्वराणि शृङ्गाटकानि चतुष्पथानि च तेषु। चत्वरम् अनावृतं प्रकाश्यं स्थानं यत्र समवेता जना परस्परमालपन्ति।

२ सत्त्वानां—प्राणिनाम्। चित्तचरितं मनोगतभावम्।

Digitized by Google

सर्व्वर्त्तुकालिकाश्च वृक्षाः सङ्कुसुमिताः फलिताश्च। विशुद्धाच्च गगनतलात् मेघशब्दाः श्रूयन्ते स्म।

नानादिव्यकुसुमचूर्णगन्धविमिश्राः परमसुखसंस्पर्शाश्च वाताः प्रवान्ति स्म। व्यपगततमोरजोधूमनीहाराश्च सर्व्वा दिशः सुप्रसन्ना विराजन्ते स्म। उपरिष्टाच्चान्तरीक्षात् अदृश्या गम्भीरा महाब्रह्मघोषाः(१)संश्रूयन्ते स्म। सर्व्वे अकुशलक्रियाः प्रविरताः। व्याधितानां सत्त्वानां व्याधयः उपशान्ताः, क्षुत्पिपासितानां सत्त्वानां क्षुधा पिपासा च प्रस्रस्ताभूत्। मद्यमत्तानाञ्च सत्त्वानां मदापगमः संवृत्तः। उन्मत्तैश्च स्मृतिः प्रतिलब्धा। चक्षुर्विकलैश्च सत्त्वैश्चक्षुः प्रतिलब्धम्। दरिद्रैश्च धनानि प्रतिलब्धानि। संयताश्च बन्धनेभ्यो विमुक्ताः। संक्षेपादचिन्तनीयः स खलु समयः यदा बोधिसत्त्वो लोके प्रादुरभूत्।

ततो राजा शुद्धोदनः बोधिसत्वं महता संस्कारेण (२) सत्कृत्य अस्य हि जातमात्रेण मे सर्व्वे अर्थाः ससिद्धा इत्ययं कुमारः नाम्ना सर्व्वार्थसिद्धो भवतु इति नामास्याकार्षीत्। सप्तरात्रं यावत् तन्नगर-

---

१ महाब्रह्मघोषाः—महान्तः ब्रह्मणः वेदस्य घोषा ध्वनयः।

२ संस्कारेण—शास्त्रीयेन जातकर्म्मादिना।

Digitized by Google

मुत्सवपूर्णमभवत्। सर्व्वे शाक्यगणाः सन्निपत्य आनन्दशब्दमुदीरयन्ति स्म। विविधखाद्यानि विश्राण्यन्ते(१)स्म, दानानि च दीयन्तेस्म, पुण्यानि चानुष्ठीयन्ते स्म। ब्राह्मणशतैसहस्राणि च अहन्यहनि सन्तर्प्यन्ते स्म। किं बहुना येषां येन प्रयोजनं तेभ्यस्तत् दीयते स्म। अस्मिंस्तु महामहोत्सवावसरे सप्तरात्रजातस्य (२) बोधिसत्त्वस्य माता मायादेवी कालमकरोत्(३)। सा कालगता देवेषु उपपन्नाभवत्। ततः महाप्रजावती(४) गोतमी कुमारस्य मातृष्वसा तं सम्यक् संवर्द्धयितुं राजानमभिधारयितुञ्च निरताभूत्। तेन खलु समयेन हिमवतः पर्व्वतराजस्य पार्श्वे असितो नाम महर्षिः प्रतिवसति स्म। स बोधिसत्त्वस्य जातमात्रस्य बहूनि परमाद्भुतानि

---

१ विश्राण्यन्ते—दीयन्ते। श्रण धातुः दाने वर्त्तते।

२ सप्तरात्रजातस्य—सप्तानां रात्रीणां समाहारः सप्तरात्रं। सप्तरात्रं जातस्य सप्तरात्रजातस्य। मासजातादिवत् "कालाः परिमाणिना" इति सूत्रेण समासः।

३ कालमकरोत्—ममार। Passed into eternity.

४ महाप्रजावती—महती प्रजावती अपत्यवती। तस्या अपत्यवत्त्वात् अपत्यपालने अभिज्ञतासौदिति गम्यते।

Digitized by Google

निमित्तानि अद्राक्षीत् दिव्येन च चक्षुषा सर्व्वं जम्बु-द्वीपमनुवीक्ष्य इदमचीकलत् कपिलाह्वये(१) महापुरे राज्ञः शुद्धोदनस्य गृहे कुमारो जातः शतपुण्यतेजो-भिरुद्भासितः सर्व्वलोकमहितः द्वात्रिंशन्महापुरुष-लक्षणैः समलङ्कृत इति।

अथ खलु असितो महर्षिः कपिलवस्तुमहा-नगरमासाद्य राज्ञः शुद्धोदनस्य गृहद्वारे अतिष्ठत्, दौवारिकमुपसंक्रम्य एवमुवाच च, गच्छ त्वं भोः पुरुष! राज्ञः शुद्धोदनस्य निवेदय द्वारे ऋषिर्व्यवस्थित-इति। ततोऽसौ मुनिवरः नृपतेरनुमतिं लब्ध्वा तमुपससर्प पुरतश्च स्थित्वा एवमुवाच। जय जय महाराज! चिरायुर्लोकं पालय धर्म्मेण राज्यं कार-येति। अथ स राजा महर्षिमासनमनुग्रहीतुमा-मन्त्र्य पाद्यार्घ्यादिभिः पूजयामास। सुखोपविष्ट-श्चैनं ज्ञात्वा सगौरवः सप्रीतिरेवमाह। न स्मरा-म्यहं ऋषेर्दर्शनं तत् केनार्थेन इहाभ्यागतोऽसि। महर्षिः प्रत्युवाच पुत्रस्ते महाराज! जातस्तमहं द्रष्टु-कामः इहागत इति। राजा आह, स्वपिति कुमारः,

---

१ कपिलाह्वये—कपिलं कपिलवस्तु इति आह्वयः आख्या यस्य तथोक्ते।

Digitized by Google

महर्षे मुहूर्त्तमपेक्षस्व यावदुत्तिष्ठतीति। ऋषिरवोचत् न महाराज! तादृशाः महापुरुषाश्चिरं स्वपन्ति। ननु जागरणशीलास्तादृशाः सत्पुरुषा भवन्ति।

अथ खलु राजा शुद्धोदनः सर्व्वार्थसिद्धं कुमारम् उभाभ्यां पाणिभ्यां सुष्ठु परिगृह्य असितस्यान्तिकमुपानयति स्म। महर्षिस्तु तमवलोक्य अहोवतायं महापुरुषपुङ्गवो(१) लोके प्रादुर्भूत इत्युत्थायासनात् कृताञ्जलिपुटो बोधिसत्त्वस्य चरणयोः प्रणिपत्य प्रदक्षिणीकृत्य च तं परिगृह्य ध्यानस्तिमितलोचनो बभूव। स कुमारं दृष्ट्वा प्रारोदीत्, गभीरञ्च निश्वसिति स्म। ततः राजा तं पृच्छति स्म किमिदमृषे रोदिषि। मा खलु काचित् कुमारस्य विप्रतिपत्तिः(२)? एवमुक्ते असितो महर्षीराजानमाह, नाहं महाराज! कुमारस्यार्थे रोदिमि, नाप्यस्य काचित् विप्रतिपत्तिः, किन्त्वात्मानमहमनुशोचामि। महापुरुषोऽयं सर्व्वार्थसिद्धः कुमारः सदेवस्य लोकस्य

---

१ महापुरुषपुङ्गवः—महापुरुषेषु पुङ्गवः श्रेष्ठः। "श्वुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः।"

२ विप्रतिपत्तिः—विरुद्धा प्रतिपत्तिः मौरवं सिद्धिर्वा। अमङ्गलम् इति यावत्।

Digitized by Google

हिताय सुखाय च धर्मं देशयिष्यति (१) तस्य च आदौ कल्याणं मध्ये कल्याणं पर्य्यवसाने कल्याणम्। अयंखलु स्वर्थं(२) सुव्यञ्जनं केवलं परिपूर्णं पर्य्यवदातं धर्मं सम्प्रकाशयिष्यति। जराव्याधिमरणपरिदेवनदौर्मनस्यं परिहरिष्यति, रागद्वेषमोहाग्निसन्तप्तानां सद्धर्मजलवर्षणेन प्रह्लादनं करिष्यति, संसारपञ्जररुद्धानां बन्धननिर्मोक्षं करिष्यति, अज्ञानतमतिमिरपटलपर्य्यवनद्धनयनानां प्रज्ञाचक्षुरुत्पादयिष्यति, सत्त्वकोटिनियुतशतसहस्राणि संसारसागरात् पारमुत्तारयिष्यति अमृते च प्रतिष्ठापयिष्यति। अहञ्च महाराज! जीर्णो वृद्धस्ताद्यं बुद्धरत्नं (३) न द्रक्ष्यामि न वाराधयिष्यामि इत्यहं रोदिमि परिदीनमना दीर्घञ्च निश्श्वसिमि। यदयं कुमारः द्वात्रिं-

---

१ देशयिष्यति—प्रवर्त्तयिष्यति।

२ स्वर्थं—श्रीभूना अर्थाः अहिंसामैत्रीनिर्वाणादयः यस्मिन्। सुव्यञ्जनं—सुखेन व्यज्यते बोध्यते व्याख्यायते वा यत् तत्। केवलं—सुष्ठम्; यद्वा परस्परविरुद्धमतप्रकटनाभावात् एकम् अविसंवादीत्यर्थः। परिपूर्णं—सर्व्वाङ्गसम्पन्नं कस्मिंश्चिदपि विषये न्यूनताशून्यम्। पर्य्यवदातं—निर्म्मलं हिंसादिदोषैरसंस्पृष्टम्।

३ बुद्धरत्नं—बुद्धानां मध्ये श्रेष्ठं, बहवः पूर्व्वपूर्व्वबुद्धा आसन् तेषां मध्ये सर्व्वोत्तमम्। "जातौ जातौ यदुत्कृष्टं तद्रत्नमितिकथ्यते"।

Digitized by Google

यन्महापुरुषलक्षणैः समन्वागतः, तन्नार्हति महाराज ! अगारमधिवस्तुम् अवश्यं निष्क्रमिष्यति प्रव्रज्यायै ।

अथ खलु राजा शुद्धोदनो महर्षेः सकाशात् कुमारस्येदं व्याकरणं(१)श्रुत्वा प्रीतिप्रमुदितः उत्थायासनात् बोधिसत्त्वस्य चरणयोः प्रणिपत्य इमां गाथामभाषत——

वन्दितस्त्वं सुरैः सेन्द्रैः ऋषिभिश्चापि पूजितः ।
वैद्यः(२)सर्व्वस्य लोकस्य वन्देऽहमपि त्वां विभो ॥

एवमुक्त्वा नृपतिरसितं महर्षिं सन्तर्प्य विससर्ज्ज । अथ राजा स्वगृहं प्रविश्य महाप्रजावतीं गोतमीम् आमन्त्र्य एवमाह अलङ्क्रियतां कुमारः देवकुल(३)मुपनेष्यते । ततः कुमारः मण्डामानः प्रहसितवदनः परमया मधुरया वाचा मातृष्वसारमेवमाह अम्ब ! कुत्राहमुपनेष्ये । सा आह देवकुलं पुत्र ! ततः कुमारः स्मितं कुर्व्वन् मातृष्वसारमाह ।

---

१ व्याकरणं—व्याख्याम् ।

२ वैद्यः—भवव्याधिखण्डनात् वैद्यः ।

३ देवकुलं—देवालयम् । "सजातीयगणे गोत्रे ऽष्टेऽपि कथितं कुलम् ।"

Digitized by Google

"देवो न मेऽस्ति सदृशः किमूत्तरीयम् अस्याहमस्य प्रणमेयमिहातिदेवः"(१)

तथापि लोकानुवर्त्तनप्रीणनार्थं(२) मभियास्यामि ।

ततो राजा महता राजव्यूहेन(३)महत्या राजर्द्धया ब्राह्मणनैगमामात्यपारिषदमित्रज्ञातिपरिवृतः हय-गजरथपंक्तिकलितेन उच्छ्रितच्छत्रवैजयन्तीसमाच्छादितदिवाकरेण नानातूर्य्यनिनादितेन मार्गेण कुमारं गृहीत्वा देवकुलं प्रविशति स्म । समनन्तरं प्रतिष्ठापितस्य बोधिसत्त्वेन दक्षिणचरणः तस्मिन् देवकुले, निपतितस्य तस्य चरणतले स्वेभ्यः स्वेभ्यः स्थानेभ्यः प्रोत्थाय शिवस्कन्दनारायणकुवेरचन्द्रसूर्य्यशक्रब्रह्मलोकपालप्रभृतिभिरचैतन्याभिः देवप्रतिमाभिः । तत्र सर्व्वे एव साश्चर्य्यं हीहीकारकिलकिलादिकं प्रामुञ्चन् ; चेलाञ्चलैश्च मुखानि प्राहृत्य

---

१ देवानां मध्ये मम तुल्यः कोऽपि नास्ति ; किन्तु उत्तरः श्रेष्ठः । तुल्याभावात् श्रेष्ठस्य देवस्य सर्व्वथैवासद्भावः यं अतिदेवः देवानतिक्रान्तः सर्व्वदेवाधिकोऽहं प्रणमेयम् ।

२ लोकानुवर्त्तनप्रीणनार्थं—लोकानाम् अनुवर्त्तनम् अनुरोधरक्षणं प्रीणनं हर्षोत्पादनञ्च तदर्थम् । न देवाराधनार्थं किन्तु लोकानुरोधादेव गमिष्यामि इत्यर्थः ।

३ राजव्यूहेन—राजसङ्घेन । राजर्द्धया—राजोचितसमारोहेण । नैगमाः निगमे शास्त्रे निपुणाः ।

Digitized by Google

स्थिताः। सर्व्वञ्च कपिलवस्तु महानगरं प्रकम्पितम्। दिव्यानि च पुष्पाणि प्रावर्षितानि, तूर्य्याणि च शतसहस्राणि तुमुलं प्रणेदुः।

अथ संवृद्धः सन् कुमारः लिपिशालामुपनीयते स्म। विश्वामित्रो नाम दारकाचार्य्यः बोधिसत्त्वस्य श्रियं तेजश्चावलोक्य विस्मयस्तिमितोऽधोमुखस्तिष्ठति स्म। अथ बोधिसत्त्वः मलयसारचन्दनमयं(१)लिपिफलकमादाय तमेवमाह, भो उपाध्याय! अङ्गवङ्गमगधद्राविड़चीणहूण(२)लिपीनां देवनागयक्षगन्धर्व्वकिन्नरासुरलिपीनां वा मध्ये कतमां मां शिक्षयिष्यसीति। तत् श्रुत्वा स दारकाचार्य्यो विस्मितः प्रहसितवदनः हतमददर्प इमां गाथामभाषत।

आश्चर्य्यं सत्त्वसत्त्वस्य लोके लोकातिवर्त्तनम्(३)।
शिक्षितः सर्व्वशास्त्रेषु लिपिशालामुपागतः॥
यासां नाहं नामधेयं लिपीनां श्रुवानपि।
तत्रैव शिक्षितः सम्यक् प्रज्ञया परयान्वितः।

---

५ मलयसारचन्दनमयं—मलयपर्व्वतस्य सारभूतेन चन्दनदारुणा रचितम्।

२ हूण—They were most probably the white Huns, the Indo-Scythians who settled down in the Punjab, and along the Indus at the commencement of the Christian era.

३ लोके पृथिव्यां लोकातिवर्त्तनं जनातिक्रमणम्। "लोकस्तु भुवनै जने"। यदयं भूमण्डलवर्त्तिनः सर्व्वान् लोकान् अतिचक्राम तदद्भुतम्।

Digitized by Google

अथ वास्यानुभावेन इममेव बुधोत्तमम्।
शिक्षितं शिक्षयिष्यामि यथाज्ञानविचारणम् (१)॥

इत्थं लिपिशालामधितिष्ठता बोधिसत्त्वेन सार्द्धं दशदारकसहस्राणि लिपिं शिक्षन्ते स्म। मातृकां(२) वाचयतामेव तेषां बोधिसत्त्वानुभावेन सर्व्वधर्म्मेषु सर्व्वशास्त्रतत्त्वेषु च प्रज्ञाचक्षुःस्फुरति स्म।

अथ कदाचित् विदूरः कुमारः अमात्यपुत्रैः सार्द्धं क्षेत्रियग्राम(३)मवलोकयितुम् गच्छति स्म। पश्यंश्च क्षेत्रिकर्म्म अन्यतममारामं प्रविवेश। तत्र एकाकी अद्वितीयः परिचङ्क्रम्यमानः जम्बुवृक्षमेकमपश्यत् विशेषेण दर्शनीयम्। तस्य छायायां निषण्णश्चित्तैकाग्रतामाससाद। तेन च समयेन पञ्च ऋषयः विहायसा उत्तरां दिशमभिगच्छन्ति स्म। ते तस्य वनषण्ड(४)स्योपरि गच्छन्तः प्रत्याहता इव न शक्नुवन्ति स्म गन्तुम्। ते चाधस्तात् अवलोकयन्तः

---

१ यथाज्ञानविचारणं—निजज्ञानविवेकानुसारेण।

२ मातृका—पञ्चाशत्वर्णात्मिका लिपिः।

३ क्षेत्रियग्रामं—क्षेत्रिप्रधानं ग्रामम्। "ग्रामपार्थिवादित्वात्" मध्यपदलोपिसमासः।

४ वनषण्डस्य—वनवर्त्तिनः कस्यचित् प्रधानपादपस्य।

Digitized by Google

अद्राक्षुः कुमारं श्रिया तेजसा च जाज्वल्यमानम् ।
ततस्तेषामेतदभूत् कौन्वयं(१) निषण्णः ।

रूपं वैश्रवणातिरेकि विकचं व्यक्तं गिरीशोन्मयम्
आहो वज्रधरस्य वैष प्रतिमा चन्द्रोऽथ सूर्योन्मयम् ।
कामोऽङ्गाधिपतिश्च वा प्रतिकृतीरुद्रस्य कृष्णस्य वा
श्रीमान् लक्षणचर्चितोऽयमनघो बुद्धोऽथवास्यादृशी (२) ॥

ततः वनदेवता तानृषीन् गाथया प्रत्यभाषत ।

या श्रीर्वैश्रवणे च वै निवसते (३) या वा सहस्रेक्षणे
लोकानां परिपालकेषु दशधा या वा विशालामला ।
रुद्रे या च सहाम्पतौ (४) निवसते या वा ग्रहेषूज्ज्वला
सा श्रीः प्राप्य सुजातशाक्यतनयं नापैति कान्तं किल (५) ॥

---

१ कौन्वयं—कौ नु अयम् । नु प्रश्ने ।

२ वैश्रवणातिरेकि—विश्रवसः पुलस्त्यपुत्रस्य अपत्यं पुमान् वैश्रवणः कुबेरः । तस्य अतिरेकि अतिशायि । विकचं—विकसितम् । एष प्रतिमा—एषः सर्व्वार्थसिद्धः वज्रधरस्य प्रतिमा । यद्यपि—विधेयप्राधान्यात् एष इत्यत्र स्त्रीलिङ्गमेव भवितुमर्हति, तथापि क्वचित् उद्देश्यलिङ्गताऽपि दृश्यते । लक्षणचर्चितः—द्वात्रिंशन्महापुरुषलक्षणैः चर्चितः अलङ्कृतः । अनघः—नास्ति अघं पापं यस्मिन् तथोक्तः ।

३ निवसते—अत्र आत्मनेपदं प्रामादिकं तदानीन्तनप्रयोगानुमोदितं वा ।

४ विशालामला—विशाला महती अमला निर्म्मला या श्रीः लोकपालेषु दशधा निवसते । तेषां दशसङ्ख्यकत्वात् दशधेति वर्णितम् ।

४ सहाम्पतौ—सहां तेजसां पतौ । सह्यते एभिः सहांसि बलानि तेजांसि । सह + असु । सा श्रीः कान्तं कमनीयं सुजातशाक्यतनयं शोभनजन्मानं शाक्यकुलकुमारं प्राप्य नापैति अपगता न भविष्यतीत्यर्थः ।

Digitized by Google

अथ ते ऋषयः देवताया वचनमुपश्रुत्य धरण्यीतले प्रतिष्ठन्तः ध्यायन्तं बोधिसत्त्वमभितुष्टुवुः। तत्रैक आह——

लोके क्लेशाग्निसन्तप्ते प्रादुर्भूतोऽयं ऋद्धः।
अयं तत् खस्राते धर्मं यज्जगन्मोचयिष्यति॥

अपरोऽप्याह——

अज्ञानतिमिरे लोके प्रादुर्भूतः प्रदीपकः।
अयं तत् खस्राते धर्मं यज्जगद्धीतयिष्यति॥

अपरोऽप्याह——

शोकसागरकान्तारे पीतश्रेष्ठमुपस्थितम्।
अयं तत् खस्राते धर्मं यज्जगत्तारयिष्यति॥

अपरोऽप्याह——

जराव्याधिकिलिष्टानां (१) प्रादुर्भूतो भिषग्वरः।
अयं तत् खस्राते धर्मं जातिमृत्युप्रमोचकम्॥

अथ खलु ऋषयः बोधिसत्त्वं त्रिः प्रदक्षिणीकृत्य विहायसापाक्रामन्।

अथैकदा राजा शुद्धोदनः शाक्यगणेन सार्द्धं संस्थागारे निषण्णोऽभूत्। तत्र ते नृपमेवमाहुः, जानाति खलु देवः नैमित्तिकै(२)र्ब्राह्मणैः निर्दिष्टं

---

१ किलिष्टानां—क्लिष्टानामित्यस्य अपभ्रंशः। जातिमृत्युप्रमोचकं—जन्ममृत्युनिवारकम् अपवर्गानुकूलत्वात्।

२ नैमित्तिकैः—भाविशुभाशुभगणनाभिज्ञैः। अर्हन्—पूज्यः। बुद्धस्य नामान्तरम्।

Digitized by Google

यदयं सर्व्वार्थसिद्धः यदि अभिनिष्क्रमिष्यति तदा न प्रत्यागतो भविष्यति। अयं हि अर्हन् सम्यक् सम्बुद्धः इदं पृथिवीमण्डलम् अदण्डेन(१)अशस्त्रेणाभिनिर्जित्य अधिष्ठास्यति सह धर्म्मेणेति। तदयं कृतदारपरिग्रहः क्रियतां येन गृहधर्म्माभिरतो नाभिनिष्क्रमिष्यति। एवमस्माकं चक्रवर्त्तिवंशस्य चानुपच्छेदो भविष्यति। मानिताश्च भविष्यामः सर्व्वकोट्टराजैः(२) ततो राजा शुद्धोदन एवमाह यद्येवं तेन हि व्यवलोकयत कतमा कन्या कुमारस्यानुरूपा स्यात्। तत्र पञ्चमात्राणि(३)शाक्यशतानि एकैकमाहुः,मम दुहिता अनुरूपा स्यात् कुमारस्य, सुरूपा मम दुहितेति। राजा आह दुरासदो(४)हि कुमारः तत् प्रतिवेदयि-

---

१ अदण्डेन—दण्डं शासनं विना, धर्म्मोपदेशेनेत्यर्थः।

२ सर्व्वकोट्टराजैः—सर्व्वेषां कोट्टानां दुर्गाणां राजानः तैः। कोट्टस्य अपभ्रंशः कोट, कोटा इति वा। Sealcote, Amercote, Devicotta, Tellicottax have their terminations from this word.

३ पञ्चमात्राणि—पञ्च इति मात्रा परिमाणं येषां तानि। शाक्यानां पञ्चशतानीत्यर्थः।

४ दुरासदः—दुःखेन आसाद्यते प्राप्यते, आक्रम्यते इति दुरासदः। Not easily to be gained over, persuaded. दुर्-आ-सद-खिच्-घञ् (कर्म्मणि)।

Digitized by Google

ग्रामः तावत् कुमारस्य,कतमा ते कन्या रोचते इति। ततश्च ते सर्वे सन्निपत्य कुमारस्यैनां प्रवृत्तिमारोचयन्ति स्म(१)। कुमार उवाच, सप्तमे दिवसे प्रतिवचनं श्रोष्यते इति।

ततो बोधिसत्त्वस्य एतदभूत्—विदितं मे विषया अनन्तदोषाः विषपत्रसन्निकाशाः(२) शोकदुःखमूलाः ज्वलननिभा असिधारातुल्यरूपाश्च। विषयनिषेवने नास्ति मे छन्दो(३) रागश्च। नचाहं शोभे स्त्रागारमध्ये योऽहमुपवने वसेयं तूष्णीं समाधिसुखेन शान्तचित्त इति। अथवा पङ्कसम्पर्कादेव पद्मानि विवर्द्धिमायान्ति, जलविलसनादेव कुमुदानि राजन्ते। तत् यदि बोधिसत्त्वः परिवारबलं(४) लभेत तदा सत्त्वशतसहस्राणि अमृते निवेशयेत्। येऽपि पूर्वतना बोधिसत्त्वा आसन् सर्वेऽपि ते भार्य्या

---

१ एनां प्रवृत्तिं—परिणयव्यापारम् आरोचयन्ति, तस्य रुचिं ज्ञापयन्ति।

२ विषपत्रसन्निकाशाः—विषवृक्षपत्रवत् परिहर्त्तव्याः।

३ छन्दः—अभिप्रायः।—रागः—अनुरागः।

४ परिवारबलं—परिवारसाहाय्यम्। सत्त्वशतसहस्राणि—शतसङ्ख्यकान् सहस्रसङ्ख्यकान् च प्राणिनः। अमृते—मोक्षे, निवेशयेत्—स्थापयेत्, निर्वाणभागिनः कुर्य्यात्।

Digitized by Google

सुतयुता बभूवुः, न च ते रागयुक्ताः न वा समाधिसुखेभ्यो भ्रष्टाः। न नूनं प्राक्तना ममानुरूपा वधूः स्यात्। या खलु ईर्ष्यादिदोषविवर्जिता सदा सत्यवचना, आभिजात्यसम्पन्ना, गाथालेखने निपुणा, मम वित्ताभिराधने अप्रमत्ता भवेत् तामहं वरिष्ये। दूत्यं विचिन्त्य लिपिं लिलेख।

या रूपयौवनवरा न च रूपमत्ता माता स्वसेव ममतां कुरुतेऽनुरक्ता।
त्यागे रता श्रमणब्राह्मणमानशौण्डा(१) तां तादृशीं ममवधूं वरयस्व तात॥
स्वप्नान्तरेऽपि पुरुषे च परे न रक्ता तुष्टा स्वकेन पतिना चिरमप्रमत्ता।
गर्व्वाभिमानरहिताऽचपला सलज्जा भिक्षाप्रलीभविगता(२)स्वधनेन तुष्टा॥
कायेन वाक्यमनसा चिरशुद्धभावा(३)शास्त्रे विधानकुशला नच मानमूढा(४)
अभ्यूजने च विनताऽनुजीविरक्ता एतादृशीं नरपते स्वबधूं वृणीष्व॥

---

१ श्रमणाः—सन्यासिनः। श्रमणशब्दस्य अन्त्यः अकारः संयोगात् पूर्व्वं गुरुर्भवितुमर्हति। तथात्वे छन्दोभङ्ग आपद्येत। वस्तुतस्तु "प्रकृवा" इति सूत्रेऽपलक्षणात् त्रादीनामपि संयुक्तवर्णानां ग्रहणमित्यनुसन्धेयम्।

२ भिक्षाप्रलीभविगता—भिक्षा याञ्चा प्रलीभः प्रलीभनञ्च विगतं यस्याः।

३ कायेन वाक्यमनसा—वाक्यञ्च मनश्च वयोः समाहारः वाक्यमनः तेन। चिरशुद्धभावा चिरं शुद्धभावः विशुद्धत्वं यस्याः। कायमनोवाक्यैः सततं निजविमलचरित्रं प्रकटयन्ती।

४ शास्त्रे विधानकुशला—शास्त्रविधिज्ञाने निपुणा। मानमूढा—मानः माननं गौरवप्रदर्शनं तेन मूढा आत्मज्ञानवर्जिता न भवति।

Digitized by Google

अथ खलु राजा शुद्धोदन इमां लिपिं वाचयित्वा पुरोहितमामन्त्रयते स्म। गच्छ त्वं महाब्राह्मण(१) कपिलवस्तुनि महानगरे सर्व्वगृहाणि अनुप्रविश्य कन्यां व्यवलोकय। यस्या एते गुणाः विद्यन्ते क्षत्रियकन्यायाः वा ब्राह्मणकन्यायाः वा वैश्यकन्यायाः वा शूद्रकन्यायाः वा, तां कन्यामस्माकं प्रतिवेदय। नहि कुमारः कुलार्थी किन्तु गुणार्थी एव। ततः पुरोहितस्तां लिपिं गृहीत्वा कपिलवस्तुनि महानगरे गृहाद् गृहमवलोकयन् कन्यामन्विष्यति स्म। एवंगुणयुक्तामपश्यन् आनुपूर्व्वेण(२) विचरन् दण्डपाणेः शाक्यस्य निवेशने प्रविवेश, ददर्श च कन्यां दर्शनीयां नातिदीर्घां नातिह्रस्वां नातिस्थूलां नातिकृशां नातिगौरीं नातिकृष्णां प्रथमयौवनावस्थितां स्त्रीरत्नमिव विराजमानां निरुपमाम्।

अथ सा दारिका पुरोहितस्य चरणौ गृहीत्वा

---

१ महाब्राह्मण—"श्रद्धे तैले तथा मांसे वैद्ये ज्यौतिषिके द्विजे यात्रायां पथि निद्रायां महत्शब्दो न दीयते" इति नियमः प्रायिकः। अत्रतु "पुष्पीमहाब्राह्मणसमूहजुष्टः" इत्यादिवत् महच्छब्दः नापकर्षं बोधयति, प्रत्युत गौरवं गमयति।

२ आनुपूर्व्वेण—गृहात् गृहान्तरं, मार्गात् मार्गान्तरं, विभागात् विभागान्तरम् इत्येवंरूपेण क्रमेण।

Digitized by Google

एवमाह, केन ते महाब्राह्मण ! कार्य्यम् ? तत् श्रुत्वा स तस्याः तं लेखमुपनिनाय। सा च लेखं वाचयित्वा स्मितं कृत्वा तं पुरोहितं गाथया प्रत्यभाषत।

स्त्री(१) मे पतिर्भवतु सौम्य ! सुचारुरूपः
मा हीनप्राक्तनजनेन(२) भवेन्निवासः।

ततः स पुरोहितः राजानमुपसंक्रम्य आह, दृष्टा मया देव ! कन्या या कुमारस्यानुरूपा स्यात्। तच्छ्रुत्वा शुद्धोदनस्यैतदभूत्—दुरासदः खलु कुमारः। तदहमशोकभाण्डानि (३) कारयेयं यानि कुमारः सर्व्वदारिकाभ्यः स्वयमनुप्रयच्छेत्। तत्र यस्यां दारिकायां कुमारस्य चक्षुरभिनिवेक्ष्यति (४) तामहं तस्य वरयिष्यामीति।

---

१ स्त्री मे—स मे। गाथायां स्त्रीजनकथितवाक्ये सन्धिदोषः कथञ्चित् सोढ्व्यः।

२ मा हीनप्राक्तनजनेन—हीनेन अपकृष्टेन, प्राक्तनेन गुणविशेषशून्येन जनेन सह निवासः संसर्गः माभूत्।

३ अशोकभाण्डानि—शोकापहारणार्थं कृतानि भाण्डानि। यानि भाण्डानि महामूल्यद्रव्ययुक्तानि प्राप्य स्त्रीका वीतशोका भवन्ति।

४ अभिनिवेक्ष्यति—अभिनिविष्टं भविष्यति, सानुरागं पतितं सत् स्थास्यति।

Digitized by Google

अथ खलु राजा अशोकभाण्डानि कारयति स्म सुवर्णमयानि रौप्यमयानि वैदूर्यमयानि नानारत्नमयानि। ततश्च कपिलवस्तुनि महानगरे घण्टाघोषणां कारयामास—सप्तमे दिवसे कुमारो दर्शनं दास्यति, अशोकभाण्डानि च दारिकाभ्यो विश्राणयिष्यति। तत्र सर्व्वदारिकाभिः संस्थागारे(१) सन्निपतितव्यमिति (२)।

अथ सप्तमे दिवसे सम्प्राप्ते बोधिसत्त्वः संस्थागारमुपसंक्रम्य भद्रासने न्यषीदत्। राजाऽपि तत्र पुरुषानदृश्यान् स्थापयति स्म। समनन्तरञ्च यावत्यः कपिलवस्तुनि दारिकास्ताः सर्व्वाः तत् संस्थागारम् उपसंक्रामन्ति स्म बोधिसत्त्वं द्रष्टुम् अशोकभाण्डानि ग्रहीतुञ्च। बोधिसत्त्वश्च यथागताभ्यस्ताभ्यः दारिकाभ्यः अशोकभाण्डानि प्रयच्छति स्म। ताश्च अशक्नुवत्यः बोधिसत्त्वस्य श्रियं तेजश्च सोढुं अशोकभाण्डानि गृहीत्वा लघु लघु निष्क्रामन्ति स्म। अथ दण्डपाणेः शाक्यस्य दुहिता गोपा नाम दासीगणपरिवृता संस्थागारं प्रविश्य एकान्ते स्थिता बोधिसत्त्वमनिमेषाभ्यां नयनाभ्यां प्रेक्षमाणा। यदा

---

१ संस्थागारे—सभाग्रहे। २ सन्निपतितव्यं—सङ्घूय आगन्तव्यम्।

Digitized by Google

खलु बोधिसत्त्वेन सर्व्वाण्येवाशोकभाण्डानि दत्तानि, तदा सा तमुपसङ्क्रम्य प्रहसितवदना एवमभाषत, कुमार! किम्ते मयापकृतं यत् त्वं मां विमानयसि। स आह, नाहं त्वां विमानयामि, त्वं पुनः पश्चादागतासि। इत्युक्ता तस्यै तदनेकशतमूल्यमङ्गुरीयकं निर्म्मोच्य प्रादात्। सा चाह, कुमारेदमहं तवसकाशादर्हामि (१)। स आह इमानि मदीयाभरणान्यपि गृह्यन्ताम्। सा आह, न वयं कुमारं व्यलङ्करिष्यामः(२)। इत्युक्ता सा कन्या निरगात्।

ततस्ते गुह्यपुरुषाः राजानमुपसङ्क्रम्य इमं वृत्तान्तं निवेदयामासुः। तच्छ्रुत्वा स दण्डपाणेः सकाशं पुरोहितं दौत्येन प्रेषयामास सन्दिदेश च, दुहिता ते मम कुमाराय प्रदीयतामिति। दण्डपाणिरिदमुत्तरं प्रेषयामास, आर्य्य! कुमारो गृहे सुखं

---

१ तव सकाशात् अर्हामि—अहमशोकभाण्डं न प्राप्ता तेन मे या विमानना जाता, तत्प्रतिमूल्यस्वरूपम् एतदङ्गुरीयमहं त्वत्सकाशात् प्राप्तुमर्हामि इति स्त्रीसुलभोक्तिः।

२ व्यलङ्करिष्यामः—विगताभरणं करिष्यामः।

Digitized by Google

संवृद्धः(१) । अस्माकञ्चायं कुलधर्म्मः शिल्पज्ञस्य(२)कन्या दातव्या नाशिल्पज्ञस्येति । तत् श्रुत्वा बोधिसत्त्वः राजानमुपसङ्क्रम्य उवाच देव! मम शिल्पनैपुण्यं परीक्ष्यतामिति । अथ राजा शुद्धोदनः प्रहसितवदनः तमेवमभाषत, पुत्रक ! शक्ष्यसि किं शिल्पमुपदर्शयितुम् ? कुमार आह,बाढ़ं शक्ष्यामि देव ! तेन हि सन्निपात्यन्तां सर्व्वशिल्पज्ञाः, येषां पुरतः स्वकं शिल्पकौशलम् उपदर्शयिष्यामि । ततो राजा कपिलवस्तुनि महानगरे घण्टाघोषणां कारयति स्म,सप्तमे दिवसे कुमारः स्वं शिल्पमुपदर्शयिष्यति, तत् सर्व्वशिल्पज्ञैः सन्निपतितव्यमिति ।

तत्र सप्तमे दिवसे पञ्चमात्राणि शाक्यकुमारशतानि रङ्गभूमौ समेतानि बभूवुः । दण्डपाणेश्च शाक्यस्य दुहिता तत्रागत्य जयपताकां स्थापितवती, पद्मञ्च क्षतवती, योवाच असिधनुर्युद्धादिशिल्पकला-

---

१ सुखं संवृद्धः—अस्य कुमारस्य कस्मिंश्चिदपि कार्य्ये कस्मिंश्चिदपि क्रीडे यथा न भवेत् तथा पोषितः । कस्मिंश्चिदपि आयासकरे व्यापारे अनियुक्तःसन् वर्द्धित इत्यर्थः ।

२ शिल्पज्ञस्य—अत्र शिल्पपदं विद्यामात्रवाचि सकलकलाः, विज्ञानानि, श्रुतानि च बोधयति ।

Digitized by Google

षेषु जेष्यति तस्यैषा पताकेति। अत्रान्तरे सर्व्वेषां पुरतो देवदत्तोनाम कुमारः सदर्पमाजग्राम, ददर्श्वच खेतं हस्तिनमेकं महाप्रमाणं बोधिसत्त्वस्यार्थं प्रवेश्यमानम्। ततः स देवदत्तः ईर्ष्यया च प्राक्यबलमदेन च मत्तः तं हस्तिनं वामेन पाणिना शुण्डायां गृहीत्वा दक्षिणेन पाणिना चपेटया एकप्रहारेणैव जघान। तदनन्तरं सुन्दरनन्दः कुमारोऽभिनिष्क्रामति स्म। स तं हस्तिनं लाङ्गूलेन गृहीत्वापसारयामास। ततः बोधिसत्त्वः रथाधिरूढोऽभिनिष्क्रामः। महाकायोऽयं सत्त्वः क्लिन्नः(१)सर्व्वनगरं दौर्गन्धेन उद्वेजयिष्यतीति उक्त्वा, रथस्थ एव एकपादं भूमौ प्रसार्य्य पादाङ्गुष्ठेन तं हस्तिनं लाङ्गूले गृहीत्वा सप्तप्राकारान् सप्त च परिखा अतिक्रम्य वहिर्नगरात् क्रोशमात्रे चिक्षेप च। यत्र च प्रदेशे स हस्ती पतितः तत्र महत् विलं संवृत्तं; यत् साम्प्रतं हस्तिगर्त्त इत्यभिधीयते। ततः सर्व्वे जयध्वनिमग्रनैस्चक्रुः चेलञ्च विचिक्षिपुः(२)।

---

१ क्लिन्नः—क्लेदमापन्नः; Decomposed.

२ चेलञ्च विचिक्षिपुः—चेलविक्षेपसदानीलनः आचारविशेषः अभिनन्दनसूचक इति सञ्चाख्यते।

Digitized by Google

ततः लिपिपरीक्षा प्रारब्धा। विश्वामित्रश्च दारकाचार्य्यः साक्षी स्थापितः एवमादिष्टोऽभूत्। स त्वं व्यवलोकय कतमोऽत्र पञ्चमात्रेषु शाक्यकुमारशतेषु लिपिस्थाने विशिष्यते इति। अथ बोधिसत्त्वः गणनादिषु यं यं प्रश्नं करोति स्म न कोऽपि शाक्यकुमारेषु तदुत्तरं प्रदातुमशक्नोत्। ततः बोधिसत्त्वः आह उद्दिश्यत (१) यूयमहं पूरयामि। तत् श्रुत्वा द्वावपि त्रयोऽपि पञ्चापि दशापि शाक्यकुमारा युगपदुद्दिश्यन्ति स्म, बोधिसत्त्वश्चासम्मूढो (२) मीमांसते। ततो मध्यस्थः आश्चर्य्यं प्राप्त आह——

नेदृशं बुद्धिचातुर्य्यं दृष्टपूर्वं मया क्वचित्।

ततः प्रदर्शिते सालम्भे(३) धनुर्विद्या लक्ष्यवेधनं अक्षक्रीड़ा सूचीकर्म्म वीणावादनं वाद्यनृत्यं गीतं नाट्यं चित्रं ऐन्द्रजालिकं खप्नाध्ययनं (४) शकुनिमृगनिरुतं स्त्रीलक्षणं पुरुषलक्षणं अश्वलक्षणं गज-

---

१ उद्दिश्यत—पूर्व्वपक्षं कुरुत ; प्रश्नं पृच्छत।

२ असम्मूढः—अनाकुलितचित्तः ; बहुभिः युगपत् पूर्व्वपक्षकरणादपि मतिविभ्रममनापद्यमानः।

३ सालम्भे—व्यायामे, Athletic exercises.

४ खप्नाध्ययनं—खप्नावसानानन्तरं तज्जन्यभाविशुभाशुभनिर्व्वाचनम्।

Digitized by Google

न्नक्षणं गोलक्षणं पुराणम् इतिहासः वेदः व्याकरणं काव्यं ग्रन्थरचनं निरुक्तं(१) शिक्षा(२) छन्दः यज्ञकल्पः(३) ज्योतिषं साङ्ख्यं योगः (४) वैशेषिकम् अर्थविद्या इत्येवमाद्यासु सर्व्वकलासु बोधिसत्त्व एव सम्यक् विशिष्यते स्म।

अथ पुनस्तेन समयेन दण्डपाणिः शाक्यः स्वां दुहितरं गोपां बोधिसत्त्वाय प्रादात्। राजा शुद्धोदनः सुमनोज्ञतः श्लोकमिमं पपाठ।

यथा च पुत्री मम भूषितीगुणैस्तथा च कन्या स्वगुणैः सुशोभते।
विशुद्धसत्त्वौ तदुभौ समागतौ समेति सर्पिश्चरुणा यथा मधु॥

ततोऽन्तःपुरमध्यगतेन बोधिसत्त्वेन गोपया सह कियच्चिरम् सुखमुषितम्। अथ गच्छति काले एकदा रात्रौ प्रशान्तायां बोधिसत्त्वः स्वप्ने ददर्श, क्रीदेवः(५) नाम कश्चिद्देवपुत्रः तं सम्बोध्य गाथाभिरिदमभाषत।

---

१ निरुक्तं—पदव्युत्पत्तिज्ञानशास्त्रम्, Science of derivation.

२ शिक्षा—पदोच्चारणशास्त्रम्—Orthoepy.

३ यज्ञकल्पः—यज्ञविधानज्ञानशास्त्रम्।

४ योगः—पातञ्जलदर्शनम्।

५ क्रीदेवः—लज्जाया अधिष्ठाता कश्चिद्देवः। This god is a creation of Buddhistic imagination; he having no place in the Hindu panthion.

Digitized by Google

अतिपतति यौवनमिदं गिरिनदीवसुचञ्चलप्रवलवेगा।
गतयौवनस्य भवती निष्क्रान्तिमतिर्न(१) जातु शोभते हि॥
ये जनाः कामदासा गृहधनपुत्रदारपरिवृताः।
ते त्वया शिक्षमाणा निष्क्रान्तिमतिं सुखं कुर्युः (२)॥
तस्माद्बुध्य प्रथममेव वरयौवनेऽभिनिष्क्रम्य।
उत्तारय प्रतिज्ञां कुरुष्व कार्यं सुरगणानाञ्च (३)॥

तस्मिन्नेव समये राजा शुद्धोदनः स्वप्नान्तरगतोऽद्राक्षीत् बोधिसत्त्वं रात्रौ प्रशान्तायां देवगणपरिवृतमभिनिष्क्रम्य प्रव्रजितं कषायवस्त्रावृतम्। स प्रतिबुद्धस्त्वरितं कञ्चुकिनं परिपृच्छति स्म अस्ति मे कुमारः अन्तःपुरे? स आह, अस्ति देव! तदा प्रभृति शुद्धोदनस्यान्तःपुरे शोकशल्यः सर्वेषां हृदयमनुप्रविष्टः शङ्का चैषा सञ्जाता, अभिनिष्क्रमिष्यति अवश्यमेव कुमारोऽयम् इमानि च तस्य पूर्वनिमित्तानि (४) दृश्यन्ते इति।

---

१ निष्क्रान्तिमतिः—प्रव्रज्यायामनुरागः। २ कुर्युरित्यत्र सम्भावनायां लिङ्।

३ उत्तारय प्रतिज्ञां—अभिनवं मोक्षपथमुद्भावयन् त्वमवतारात् पूर्वं कृतां प्रतिज्ञां पूरय; तेन देवगणानामभीष्टं सेत्स्यति।

४ पूर्वनिमित्तानि—ईदृशस्वप्नादीनि तस्य प्रव्रज्यायाः पूर्वलक्षणानि।

Digitized by Google

एकदा तु रथवरमारुह्य पूर्वेण नगरद्वारेण उद्यानभूमिमभिनिष्क्रामता बोधिसत्त्वेन मार्गे पश्यः जराजीर्णः धमनीसन्ततगात्रः (१) गलित-दन्तः वलीनिचितकायः पलितकेशः कुब्ज आतुरः खुरखुरावसक्तकण्ठः (२) दण्डमवलम्बमानः पुरतो दृष्ट्वा उचे च ।

धिक् सारथे अबुधबालजनस्य बुद्धिं या यौवनेरितमदेन जरां न पश्येत्।
आवर्त्तयस्व च रथं न खलु प्रतिष्ठे (३) धिं मे विलासरतिभिर्जरयाश्रितस्य (४)

इत्युक्त्वा स प्रतिनिवर्त्त्य यथागतं गृहं प्रतिययौ ।

अथ खल्वपरेण समयेन बोधिसत्त्वः उद्यानभूमिं द्रष्टुकामः दक्षिणेन नगरद्वारेण निर्गच्छन् ददर्श

---

१ धमनीसन्ततगात्रः—बहिर्लक्ष्यमाणाभिः धमनिभिः शिराभिः सन्ततं निचितं गात्रं यस्य ।

२ खुरखुरावसक्तकण्ठः—दुर्निवारकासवशात् खुरखुर इति ध्वनि-युक्तकण्ठः ।

३ अबुधबालजनस्य बुद्धिं—इयम् अज्ञस्य बालकस्य बुद्धिः या यौवन-जनिताहङ्कारवशाद् जरां न अनुचिन्तयेत् । रथम् आवर्त्तयस्व—प्रत्या-वर्त्तय । न खलु प्रतिष्ठे नातःपरं स्थितं न आरामदर्शनाय गमि-ष्यामि । भविष्यत्सामीप्ये लट् वा ।

४ जरयाश्रितस्य—यौवनेऽपि जरया लङ्घितोऽहं यतः अचिरमेव मां जरा आक्रमिष्यति । विलासरतिभिः—विलासाः आपातरम्याः विषयाः तेषु रतिभिः अनुरागैः ।

Digitized by Google

मार्गे पुरुषं व्याधिस्पृष्टं दुर्बलकायं स्वके मूत्रपुरीषे निमग्नमशरणं कृच्छ्रेणोच्छ्वसन्तं, दृष्ट्वा च सारथिमवोचत् ।

आरोग्यमत्र भवति स्वपनं श्लोकं व्याधेर्भयञ्च सततं तपति प्रभूतम् ।
कोनाम विज्ञपुरुषः प्रविलोक्य दुःखं कुर्य्यादृतिं सुचिरसुस्थमना मनाक्च(१)

ततः बोधिसत्वः पुनरपि प्रतिनिवृत्तः ।

अथान्यदा पश्चिमेन नगरद्वारेणाभिनिष्क्रामन् सोऽद्राक्षीत् पुरुषं मृतं मार्गे समारोपितं चेलवितानोक्तं (२) परिवृतं स्वजनैः परिदेवमानैरुत्क्रोशद्भिरुरांसि ताड़यद्भिः । दृष्ट्वा च इदमुवाच ।

धिग्यौवनेन जरया विरसीकृतेन स्वास्थ्येन धिक् विविधरोगपराहतेन ।
धिग्जीवितेन चपलाद्युतिचञ्चलेन(३)धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः(४)

---

१ कुर्य्यादृतिं—विषयेषु मनाक् स्वल्पामपि रतिम् अनुरागं कुर्य्यात्।

२ समारोपितं—स्थापितं, शायितम्। चेलवितानोक्तं—चैलैः वासोभिः वितानम् उपरि विस्तीर्णम् आच्छादनं यस्य स चेलवितानः पूर्वमचेलवितानः अधुनातु तथा कृतः चेलवितानोक्तः तम्। अभूततद्भावे च्विः।

३ चपलाद्युतिचञ्चलेन—चपलायाः विद्युतः द्युतिः स्फुरणं तद्वत् चञ्चलेन अस्थिरेण।

४ रतिप्रसङ्गैः—विषयभोगैः। रमन्ते आभिः रतम् विषयाः। करणेक्तिः। अत्र धिक् शब्दः वारणार्थकः, अतः "ऊनवारणार्थैरिति" तृतीया।

Digitized by Google

इत्युक्त्वा स प्रतिनिवृत्त्य पुनरपि पुरं प्राविशत्। अथ खल्वपरेण समयेन बोधिसत्त्वः उत्तरेण नगरद्वारेण निश्चक्राम, ददर्श च मार्गे भिक्षुमेकं शान्तं संयतं ब्रह्मचारिणम्। दृष्ट्वा च स इदमवोचत्।

साधु सुभाषितमिदं मम रोचते च (१)
प्रव्रजनं बुधगणैः सततं प्रशस्तम्।
हितमात्मनश्च परसत्त्वहितञ्च यत्र।
सुखजीवितं सुमधुरं ह्यमृतं फलञ्च (२)॥

एवमनुचिन्त्य रथवरं प्रतिनिवर्त्त्य पुनरपि पुरं प्राविशत्, इदानीं स सर्व्वविषयनिषेवनमुज्झित्वा समाधिनिष्ठो बभूव। शुद्धोदनश्च कुमारस्य ईदृशं दशान्तरमवलोक्य तस्य परिरक्षणार्थं प्राकारान् निर्म्मापयतिस्म, परिखाः खानयति स्म, द्वाराणि सुदृढ़ानि कारयति स्म सर्व्वत्र रक्षकान् स्थापयति स्म, अन्तःपुरे च आज्ञां ददौ मास्मभूत् कदाचित्

---

१ साधुसुभाषितं—इदं साधूनां सुभाषितं समीचीनप्रवादः—तत् खलु सुभाषितं किमित्याशङ्क्याह प्रव्रजनमिति—प्रव्रजनं प्रव्रज्या सन्न्यासः। प्रशस्तं श्लाघ्यम्। मम रोचते इत्यत्र सम्बन्धविवक्षया षष्ठी, ईदृशस्थले चतुर्थी साधीयसी भवेत्।

२ सुखजीवितं—सुखेन जीवितं—क्लेशैरनुपहतेन केवलेन सुखेन जीवितं, सुमधुरम् ह्यमृतं निर्वाणञ्च तस्य प्रव्रजनस्य फलम्।

Digitized by Google

सङ्गीतविच्छेदः क्रीड़ाविलासस्य(१) निरन्तरं प्रवर्त्ततां कुमारस्य तथा निबध्यतां (२) यथानुरक्तचित्तो न निर्गच्छेत् प्रव्रज्यायै। तदानीं कपिलवस्तुनि महानगरे सर्व्वं विषादमग्नमिवालक्ष्यत।

तथाहि——

हंसक्रौञ्चमयूरहारितशुका नृत्यन्ति दीनं रुतम्
लीलापुष्करिणीषु पद्मकुमुदान्युद्यन्ति गुप्यन्ति च(३)।
हृषाः शुष्कपलाशपुष्परहिताः पुष्पन्ति भूयो न च
वीक्ष्यःवल्लकिवंशतन्त्रिनिचयाश्छिन्दन्त्यकस्मात्तदा॥
नी नृत्यं नच गायनेन(४)रमिते भूयो मनः कस्यचित्।
सर्वे शाक्यगणा विषण्णमनसो रक्षन्ति(५) रात्रिन्दिवम्॥
राजापि प्रणतः(६) सुदीननयनः शून्यान्तरो ध्यायति।
हा धिक् शाक्यकुलस्य कर्त्तिरमिता यातीयमद्यं ध्रुवम्॥

अथ खलु निशीथसमये गोपा स्वप्ने इदमपश्यत्

---

१ क्रीड़ाविलासः—क्रीड़ानां विलासः विन्यसनं विजृम्भनं प्रकटनमित्यर्थः।

२ निबध्यतां—आकृष्यतां, नृत्यगीतक्रीड़ादिभिरित्यर्थः।

३ उद्यन्ति गुप्यन्तिच—विकाशानन्तरमेव म्लायन्ति। उद्यन्ति—उत्+इण्+श्यन्ति।

४ गायनेन—गाने—गै+(कर्त्तरि) ल्युट्, गायन'; तस्य भावः गायनं भावे ष्यञ्। रमिते—क्रीड़ायां भावेक्तः।

५ रक्षन्ति—रक्षां कुर्व्वन्ति; Keep watch and word.

६ प्रणतः—अवनतमुखः, With his head downcast.

Digitized by Google

यत् सर्व्वेयं पृथिवी सशैलसागरा प्रकम्पिताभूत्, द्रुमाः समूलमुन्मूलिताः प्रचण्डेन मारुतेन समन्तात् विक्षिप्ता आसन्, चन्द्रसूर्य्यौ भूमिनिपतितौ हीनप्रभया पुष्करतुः, उत्पातिका उल्का अशनेः पेतुः, समग्रं नगरं घोरतमसाभिभूतञ्च संवृत्तम्।

इहैतत् प्रतिबुध्य घूर्णनयना (१) खं स्वामिनं साब्रवीत्।
भ्रान्ता नाथ मतिर्ममाशुभभिया शीकाहितं मे मनः।
श्रुत्वासौ कलविङ्कदुन्दुभिरुतः(२) प्रेमार्द्रवाचा चिरम्॥
गोपामालपते(३) भव प्रमुदिता पापं न ते विद्यते।
विन्दानन्दं मा च खेदं भजस्व श्रद्धां त्यक्त्वा साधयास्मत्प्रतीतिम् (४)
पुण्येनैव खलु ईदृक् चकास्ति गोपे सत्यं शर्म्मेदं ते निमित्तम् (५)॥

---

१ घूर्णनयना—घूर्णति इति घूर्ण पचाद्यच् घूर्ण घूर्णमाणे नयने यस्याः।

२ कलविङ्कदुन्दुभिरुतः—प्रयोजनवशात् कदाचित् कलविङ्कपक्षिवत् मृदुकलध्वनिकारी, कदाचिच्च दुन्दुभिवत् गम्भीरमधुरनादी।

३ आलपते—अत्र आत्मनेपदं प्रामादाकं तदानीन्तनस्य देशविशेषप्रचलितस्य प्रयोगानुमोदितम्।

४ पापं—अत्याहितं अनिष्टम्।

५ साधयास्मत्प्रतीतिं—श्रद्धां त्यक्त्वा मां प्रीणय। यदि त्वं श्रद्धां त्यजेस्तदाहं त्वयि प्रीता भवेयम्। अस्मत्प्रतीतिमित्यत्र गौरवात् बहुत्वं, एकवचने तु मत्प्रतीतिमित्येवं स्यात्।

६ निमित्तं—जातावेकवचनं, निमित्तानि इत्यर्थः।

Digitized by Google

अथ खलु बोधिसत्त्वस्य एतदभूत्—अयुक्तमेतत् मम स्यादकृतज्ञता च यद्यहमननुज्ञातः पित्रा निष्क्रामेयम्। इति विचिन्त्य स रात्रौ प्रशान्तायां स्वभवनादवतीर्य्य राज्ञः प्रासादतलं प्राविशत्। गत्वा पुरतस्तस्य सप्रश्रयमिदमवोचत्। मा कुरु विघ्नं देव! परिहर खेदं, अयं मे निष्क्रमणक्षमः समयः। हन्त नृपते क्षमस्व माम्। श्रुत्वेदं नृपतिरश्रुपूर्णनयनो बभाषे निष्क्रमणेनालं मा मां जहीहि किं पुनर्वरं याचसे वद सर्व्वं दास्ये। अनुगृहाण राजकुलं माञ्च इदञ्च राष्ट्रम् अथ प्रियंवदो बोधिसत्त्व आह इच्छामि चतुरो वरान् तान्मे देहि, यदि दातुं शक्नोषि, तदा मां गृहे सदा द्रक्ष्यसि, नाहं निष्क्रमिष्यामि। इच्छामि देव! जरा मां नाक्रामेत्, यौवनञ्च चिराय तिष्ठेत्; इच्छामि तात! आरोग्यमविच्छिन्नं लभेय व्याधिबाधां विहाय; इच्छामि सुखसन्ततमायुः मृत्युभयेन शून्यं; इच्छामि विपुलां सम्पदं यत्र नभवेद्विपत्तिः। तदाकर्ण्य परमदुःखार्त्तः राजा उवाच अयुक्तं याचसे कुमार! नाहं शक्नोऽस्मि परित्रातुं जराव्याधिमृत्युतः विपत्तितश्च। अथ कुमार आह, यदीदानीं चतुरो वरान् दातु-

Digitized by Google

मशक्तोऽसि, हन्त नृपते अपरमेकं वरं मह्यं देहि येन गृहान्निष्क्रामतो मे परिपन्थी न भवेरन्वेषणञ्च न कारयेः। श्रुत्वैवं वचनं नरपुङ्गवस्य राजा शुद्धोदनः तृष्णां तनूकृत्य कृच्छ्रेण पुत्रस्नेहं छेत्तुं यतते स्म; उवाच च तव प्रमोक्षो जगतो हितकरः मया अनुमोदनीयश्च; पूर्य्यतां यस्तवाभिप्रायः, क्रियताञ्च यत् तवाभिमतमिति।

अथ खलु शाक्याः वृत्तान्तमिमं निशम्य राज्ञा सह मन्त्रयन्ते स्म। पूर्व्वदक्षिणपश्चिमोत्तरद्वारेषु शतसहस्रशाक्यकुमारा धृतास्त्राः प्रभूतबलोपेताः स्थापिताश्चरन्ति स्म। राजा शुद्धोदनश्च कुमारशतानि सर्व्वेषु गृहद्वारेषु हयेषु गजेषु च समारोप्य जागर्त्ति स्म। महाप्रजावती च गौतमी चेटीवर्गमामन्त्रयते स्म। द्वारेद्वारे प्रदीपान् विमलानुपनयत ध्वजाग्रेषु मणिरत्नानि विमलानि स्थापयत आलम्बयत च हारान् मणिमयान् येनास्मिन् अन्तःपुरे सर्व्वाण्यपि स्थानानि आलोकमयानि भवेयुरिति।

अथ खलु बोधिसत्त्वः सर्व्वं नगरजनं प्रसुप्तं विदित्वा अर्द्धरात्रसमयं चोपस्थितं ज्ञात्वा पुण्यञ्च

Digitized by Google

नक्षत्राधिपतिना युक्तमवलोक्य साम्प्रतं निष्क्रमणकाल इति निश्चित्य छन्दकं सारथिमामन्त्रयते स्म। छन्दक! मा मामिदानीं खेदय, प्रयच्छ मे हयवरं कण्ठकं, माच विलम्बिष्ठाः। ततः स शशियूर्णमण्डलनिभं तमश्वराजमारुह्य शाक्यान् अतिक्रम्य, अतिक्रम्य च मल्लान् रक्षकान् महानगरात् निरगात्। वैनतेयनिर्गमे षट्सु योजनेषु (१) तस्य रात्रिः प्रभाताभूत्। अथ स छन्दमामन्त्र्याएतदवोचत्, गच्छ त्वं छन्दक! इमानि आभरणानि कण्ठकञ्च गृहीत्वा निवर्त्तस्व। यत्र प्रदेशे बोधिसत्त्वः छन्दकं विससर्ज्ज तत्र चैत्यं (२) स्थापितमभूत्। अद्यापि तच्चैत्यं छन्दकनिवर्त्तनमिति ज्ञायते (३)।

ततः अन्तःपुरिकाभिः कुमारमपश्यन्तीभिः ग्रैष्मिकवार्षिकहैमन्तिकेषु प्रासादेषु (४) प्रतिगृहं

---

१ वैनतेयनिर्गमे—वैनतेयः विनतापुत्रो गरुड़ः तस्य निर्गमः निर्गमस्थानं, वैनतेयनिर्गमः नाम कपिलवस्तुनगरात् षट्योजनानन्तरस्थितः स्थानविशेषः।

२ चैत्यः—A monument or a place of worship.

३ छन्दकनिवर्त्तनमिति—छन्दकनिवर्त्तनमिति नाम्ना।

४ ग्रैष्मिकवार्षिकहैमन्तिकेषु—ग्रीष्मे वर्षासु हेमन्ते च वासयोग्येषु विभिन्नप्रकारेषु।

Digitized by Google

प्रत्यासनस्थ(१) मृगयमाणाभिः यदासौ न दृष्टश्चे, तदैकीभूताभिः कुररीभिरिव उत्क्रश्यते स्म तच्च शब्दं श्रुत्वा, राजा शाक्यानामन्वयते स्म। अत्रान्तरे महाप्रजावती गोतमी परिदेवमाना महीतले विलुठन्ती शुद्धोदनमेवमाह, क्षिप्रं मां महाराज! पुत्रेण सङ्गिनीं कुरुष्वेति।

ततोराजा चतुर्दिक्षु अश्वारोहदूतान् प्रेषयामास, आदिदेश च, गच्छत यावत् कुमारः न दृश्यते, तावत् मा निवर्त्तध्वम्। ते खलु बहुदूरमन्विष्यन्तः कुत्रापि कस्मिंदपि कुमारोदन्तमप्राप्य नैराश्यात् सुदीनमनसः निवृत्ता बभूवुः। छन्दकस्तु भयशोकविकलः कण्ठक्रमाभरणानि च आदाय शनैः शनैरन्तःपुरं प्रविवेश।

यदा तु गोपा विबुद्धा शयनं बोधिसत्त्वशून्यं ददर्श, तदा उत्कटमुत्क्रोशमुच्च, च उन्मत्तेव स्खलितकबरी नरपतेरगारमभ्यधावत् सगद्गदमुवाच च, वञ्चिताः स्म देव! पलायितः बोधिसत्त्व इति।

---

१ प्रत्यासनम्—आस्ते उपविशति एषु इति आसनानि अधिकरणे ल्युट्। वायुसेवनार्थम् उपवेशनस्थानानि "हाओयाखाना" इति भाषा।

Digitized by Google

गोपा सुदीना धरणीतले निपत्य
केशान् लुलुञ्चाभरणचयं बभञ्ज।
अङ्गानि सन्ताड्य सकरुणं रुरोद
हा नाथ! कुवासि निजगृहं विहाय॥
यातेऽधुना भवति मम मन्दभाग्या: सर्वप्रियेण भवति चिरं वियोग:।
हा धन्य पुरुष भुवन-मनोज्ञरूप क्व त्वं गतोऽसि मम हृदयं गृहीत्वा॥
न पानं (१) पिबामि न वसामि गेहे
चरिष्यामि क्रकृचं(२) मनिशं यतात्मा।
धरिष्यामि चीवरजटा: व्रताय
न पश्यामि यावदिह बोधिसत्त्वम्॥
अथान्तरे सारथिरशुभं विचिन्त्यन् (३) अन्त:पुरे धीरनिभृतमाजगाम।
दृष्ट्वा तु गोपा कुलिशहता लतेव भूमौ पपात लुठितशरीरयष्टि:(४)॥

---

१ पानं—पीयते यत् तत् पानं पानीयम्। कर्मणि अनट्। भोजनन्तु दूरे आस्तां जलपानमपि न करिष्यामि। पिबामि वसामि इत्यत्र भविष्यत्सामीप्ये विकल्पे लट्।

२ क्रकृचं—उपवासादि कष्टसाध्यं पराकचान्द्रायणादिव्रतं।

३ अशुभं विचिन्त्यन्—बोधिसत्त्वस्य सन्न्यासग्रहणरूपम् अनिष्टं तच्चिन्तां तस्य वनितादीनां दुर्दशाञ्च चिन्तयन्।

४ लुठितशरीरयष्टि:—शरीरं यष्टिरिव, यष्ट्या तुल्यत्वात् शरीरस्य कृशत्वं तेन च सुन्दरत्वं गम्यते। आलुठिता शरीरयष्टिर्यस्या: सा।

Digitized by Google

महाभारतम् ।

बकरूपी धर्म्मोपाख्यानम् ।

ततोयुधिष्ठिरो राजा नकुलं वाक्यमब्रवीत् ।
आरुह्य वृक्षं माद्रेय ! निरीक्षस्व दिशो दश ॥
पाणीयमन्तिके पश्य वृक्षांश्चाप्युदकाश्रितान् । (१)
एते हि भ्रातरः श्रान्तास्तव तात! (२) पिपासिताः ॥
नकुलस्तु तथेत्युक्त्वा शीघ्रमारुह्य पादपम् ।
अब्रवीद्भ्रातरं ज्येष्ठमभिवीक्ष्य समन्ततः ॥
पश्यामि बहुलान्राजन् ! वृक्षानुदकसंश्रयान् ।
सारसानाञ्च निर्ह्रादमतोदकमसंशयम् ॥
ततोऽब्रवीत् सत्यधृतिः (३) कुन्तीपुत्रो युधिष्ठिरः ।
गच्छ सौम्य ! ततः शीघ्रं तूर्णैः पानीयमानय ॥
नकुलस्तु तथेत्युक्त्वा भ्रातुर्ज्येष्ठस्य शासनात् ।
प्राद्रवद् यत्र पानीयं शीघ्रञ्चैवान्वपद्यत (४) ॥

---

१ उदकाश्रितान्—उदकम् आश्रितान् । Aquatic plants.

२ "ज्येष्ठीभ्राता समः पितुः" इति स्मरणात् "तात" इति सम्बोधनं युज्यते । तथाहि "पुंसि पितरि पूज्ये च तातशब्दं प्रचक्षते" ।

३ सत्ये धृतिः निश्चयो यस्य तथोक्तः सत्यनिष्ठ इत्यर्थः ।

४ अन्वपद्यत—प्राप्तः ।

Digitized by Google

स दृष्ट्वा विमलं तोयं सारसैः परिवारितम् ।
पातुकामस्ततो वाच-मन्तरीक्षात् प्रशुश्रुवे(१) ॥
मा तात ! साहसं कार्षीर्मम पूर्वपरिग्रहः (२) ।
प्रश्नानुज्ञा तु माद्रेय ! ततः पिब हरस्व च ॥
अनादृत्य तु तद्वाक्यं नकुलः सुपिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ॥
सहदेवस्ततो जिष्णुः भीमसेनः क्रमेण च ।
सरसीमेत्य वाचं तां हित्वा पीत्वा पपात ह ॥
चिरायमाणाननुजान् दृष्ट्वा राजा समाकुलः ।
समुत्थाय महाबाहुर्दह्यमानेन चेतसा ॥
व्यपेत जननिर्घोषं प्रविवेश महावनम् ।
स गच्छन् कानने तस्मिन् हिमजालपरिष्कृतम्(३) ॥
ददर्श तत्सरः श्रीमान् विश्वकर्म्मकृतं यथा ॥
स ददर्श हतान् भ्रातॄन् लोकपालानिव च्युतान् ।
युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवान् ॥
विनिकीर्णं धनुर्व्वाणं दृष्ट्वा निहतमर्জ্জুনम् ।
भीमसेनं यमौ चैव निर्व्विचेष्टान् मतायुषः ॥

---

१ आत्मनेपदमार्षम् ।

२ परिगृह्यते—असौ इति कर्म्मणि अच् । मया पूर्व्वाधिकृतत्वात् मम स्वत्वास्पदीभूतमिदं सरः ।

३ हिमज्ञानपरिष्कृतं—तुषारनिकर इव विशदम् ।

Digitized by Google

दीर्घमुष्णं विनिश्वस्य शोकवाष्पपरिप्लुतः ।
तान् दृष्ट्वा पतितान् भ्रातॄन् सर्व्वांश्चिन्तासमन्वितः ।
धर्म्मपुत्रो महाबाहुर्विललाप सुविस्तरम् ॥
ननु त्वया महाबाहो ! प्रतिज्ञातं वृकोदर ।
दुर्य्योधनस्य भेत्स्यामि गदया सक्थिनी रणे ॥
व्यर्थं तदद्य मे सर्व्वं त्वयि भीम ! निपातिते ।
महात्मनि महाबाहौ कुरूणां कीर्त्तिवर्द्धने ।
मनुष्यसम्भवा वाचो विधर्म्मिण्यः(१) प्रतिश्रुताः ।
भवतां दिव्यवाचस्तु ता(२) भवन्ति कथं मृषा ॥
देवाश्चापि यदाऽवोचन् सूतके त्वां धनञ्जय ।
सहस्राच्चादनवरः कुन्ति ! पुत्रस्तवेति वै ॥
उत्तरे पारिपात्रे च (३) जगुर्भूतानि सर्व्वशः ।

---

१ विधर्म्मिण्यः—विरुद्धधर्म्मवत्यः विपरीता अलीका इत्यर्थः ।

२ ताः—पूर्व्वानुभूताः दुर्य्योधनसभायां द्रौपदीपरिभवकाले उक्ता इत्यर्थः । प्रक्रान्तप्रसिद्धपूर्व्वानुभूतार्थकं तत्पदं यत्पदनमपचते इति भाखङ्कारिकाः ।

३ उत्तरे—उत्तरकुरुवर्षे । उत्तरकुरुवर्षमर्জ্জुनोजितवान् । तच्च जम्बुद्वीपात् सप्तमं वर्षं पृथिव्याश्च चरमोत्तरसीमास्वरूपम् । पारिपात्रस्तु विन्ध्यस्य उत्तरीभागः तस्मिन् पर्व्वते वासुदेवो वासवेन सह अयुध्यत ; तत्पदभरेण च तस्य शृङ्गं न्युब्जीवभूव ।

Digitized by Google

विप्रनष्टां श्रियञ्चैषामाहर्त्ता पुनरञ्जसा(१) ॥
नाऽस्य जेता रणे कश्चिदजेता नैष कस्यचित् ।
सोऽयं मृत्युवशं यातः कथं जिष्णुर्म्महाबलः ॥
अयं ममाग्रां संहत्य शेते भूमौ धनञ्जयः ।
आश्रित्य यं वयं नाथं दुःखान्येतानि सेहिम ॥
रणे प्रमत्तौ वीरौ च सदा शत्रुनिवर्हणौ ।
कथं रिपुवशं यातौ कुन्तीपुत्रौ महाबलौ ॥
अश्मसारमयं नूनं हृदयं मम दुर्हृदः ।
यमौ यदेतौ दृष्ट्वाऽद्य पतितौ नाऽवदीर्य्यते ॥
शास्त्रज्ञा देशकालज्ञास्तपोयुक्ताः क्रियान्विताः ।
अकृत्वा सदृशं कर्म्म किं शेध्वं पुरुषर्षभाः ॥
अविक्षतशरीराश्चाप्यप्रसृष्टशरासनाः (२) ।
असंज्ञा भुवि सङ्गम्य (३) किं शेध्वमपराजिताः ॥
इत्यं शोचत्यमानस्तु धर्म्मात्मा स नरेश्वरः ।
शोकसागरमध्यस्थो दध्यौ कारणमाकुलः ॥
इतिकर्त्तव्यताञ्चेति देशकालविभागवित् ।
नाभिपेदे महाबाहुश्चिन्तमानो महामतिः ॥

---

१ एषां पाण्डवानां विप्रनष्टां श्रियं राज्यलक्ष्मीं पुनः आहर्त्ता आहरिष्यति इति जगुः ऊचुः । आहर्त्ता—आ हृ-ता (तृच्) ।

२ अप्रसृष्टशरासनाः—बाणत्यागात् पूर्व्वं मौर्व्वीमार्জ্জनं क्रियते, अत्र च युद्धाभावात् तदपि नासीत् ।

१ सङ्गम्य—मिलित्वा ।

Digitized by Google

बुद्ध्या विचिन्तयामास वीराः केन निपातिताः ।
नैषां शस्त्रप्रहारोऽस्ति पदं(१)नेहास्ति कस्यचित् ।
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ॥
एकाग्रं चिन्तयिष्यामि पीत्वा वेत्स्यामि वा जलम् ।
स्यात्तु (२) दुर्य्योधनेनेदमुपांशु विहितं कृतम् ॥
गान्धारराजचरितं (३) सततं जिह्मबुद्धिना ।
यस्य कार्य्यमकार्य्यं वा सममेव भवत्युत ।
कस्तस्य विश्वमेद्वीरो दुष्कृतेरकृतात्मनः ॥
अथवा पुरुषैर्गूढैः प्रयोगोऽयं(४) दुरात्मनः ।
भवेदिति महाबुद्धिर्बहुधा तदचिन्तयत् ॥
तस्यासीन्न विषेणेदमुदकं दूषितं यतः ।
मृतानामपि चैतेषां विकृतं नैव जायते(५) ।
मुखवर्णाः प्रसन्ना मे भ्रातृणामित्यचिन्तयत् ॥
एकैकशश्चौघबलानिमान्(६) पुरुषसत्तमान् ।

---

१ पदं नेहास्ति कस्यचित्, इह एषु कस्यचित् अन्यस्य पदं प्रहार-चिह्नं नास्तीत्यर्थः ।

२ अत्र सम्भावनायां विधिलिङ् ।

३ गान्धारराजचरितं—शकुनिकल्पितम् इदं महामारणरूपम् ।

४ प्रयोगः—अनिष्टसंयोजनम् ।

५ उदके विषदूषिते तु मनागनुज्ञानां शरीरविकृतिरभविष्यत् ।

६ औघबलान्—योधसमूहतुल्यबलान् । "Himself a legion."

Digitized by Google

कोऽन्यः प्रतिसमाक्रामेत् कालान्तकयमादृते ॥
एतेन व्यवसायेन तत्तोयं व्यवगाढ़वान् ।
गाहमानश्च तत्तोयमन्तरीक्षात् स शुश्रुवे ॥
अहं वकः शैवलमत्स्यभक्षी
नीता मया प्रेतवशं तवाऽनुजाः ।
त्वं पञ्चमो भविता राजपुत्र !
नचेत् प्रश्नान् पृच्छतो व्याकरोषि ॥
युधिष्ठिर उवाच ।
रुद्राणां वा वसूनां वा मरुतां वा प्रधानभाक्(१) ।
पृच्छामि को भवान् देवो नैतच्छकुनिना कृतम् ॥
हिमवान् पारियात्रश्च विन्ध्योमलय एव च ।
चत्वारः पर्व्वताः केन पातिता भूरितेजसः ॥
यान्न देवा न गन्धर्व्वा नासुराश्च न राक्षसाः ।
विषहेरन् महायुद्धे न्यवधीत् तान् कथं भवान् ॥
न ते जानामि यत्कार्य्यं नाभिजानामि काङ्क्षितम् ।
कौतूहलं महज्जातं साध्वसञ्चागतं मम ॥
येनाऽस्म्युद्विग्नहृदयः सम्भ्रमत्पक्षशिरोज्वरः ।
पृच्छामि भगवंस्तस्मात् को भवानिह तिष्ठति ॥

---

१ प्रधानभाक्—प्रधानपदाभिषिक्तः ।

Digitized by Google

यक्ष उवाच ।

यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः ।
मयैते निहताः सर्वे भ्रातरस्ते महौजसः ॥
ततस्तामग्निवां श्रुत्वा वाचं स परुषाक्षराम् ।
यक्षस्य ब्रुवतो राजन्नुपक्रम्य (१) तदा स्थितः ॥
विरूपाक्षं महाकायं यक्षं तालसमुच्छ्रयम् (२) ।
ज्वलनार्कप्रतीकाशमधृष्यं पर्व्वतोपमम् ॥
वृक्षमाश्रित्य तिष्ठन्तं ददर्श भरतर्षभः ।
मेघगम्भीरनादेन तर्ज्जयन्तं महास्वनम् ॥
इमे ते भ्रातरो राजन् वार्य्यमाणा मयाऽसकृत् ।
बलात्तोयं जिहीर्षन्तस्ततो वै मृदिता मया ॥
न पेयमुदकं राजन् ! प्राणानिह परीप्सता ।
पार्थ ! मा साहसं कार्षीर्म्मया पूर्व्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ! ततः पिब हरस्व च ॥

युधिष्ठिर उवाच ।

न चाहं कामये यक्ष ! तव पूर्व्वपरिग्रहम् ।
कामं नैतत् (३) प्रशंसन्ति सन्तो हि पुरुषाः सदा ॥

---

१ उपक्रम्य—समीपं गत्वा ।

२ तालसमुच्छ्रयं—तालप्रांशुम् । समुच्छ्रयः—औन्नत्यम् ।

३ एतत्—परपूर्व्वपरिग्रहस्य प्रार्थनम् ।

Digitized by Google

यक्ष उवाच ।

का च वार्त्ता किमाश्चर्य्यं कः पन्थाः कश्च मोदते ।
इति मे चतुरः प्रश्नान् कथयित्वा जलं पिब ॥

युधिष्ठिर उवाच ।

मासर्त्तुदर्व्वीपरिवर्त्तनेन(१)
सूर्य्याग्निना रात्रिदिनेन्धनेन ।
अस्मिन्महामोहमये कटाहे
भूतानि कालः पचतीति वार्त्ता ॥
अहन्यहनि भूतानि गच्छन्ति यममन्दिरम् ।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपरम् ॥
वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां (२)
महाजनो येन गतः स पन्थाः ॥

---

१ मासर्त्तुदर्व्वीपरिवर्त्तनं—मासाश्च ऋतवश्च दर्व्वीरूपाः । मासानाम् ऋतूनाञ्च यत् परिवर्त्तनं वसन्तनिदाघादिक्रमेण यत् परिवसनं तदेव दर्व्वीणां परिवर्त्तनं घटनं तेन । अस्मिन्—ब्रह्माण्डरूपे कटाहे । पचति—सुखदुःखभोगाय प्रवर्त्तयतीत्यर्थः ।

२ गुहायां—मनीषायां कृतधियां अन्तरात्मनि । गुहाशब्दस्य तु मनीषार्थकत्वं भगवता भाष्यकारेणैव कठोपनिषद्भाष्ये प्रतिपादितम् ।

Digitized by Google

दिवसस्याष्टमे भागे शाकं पचति यो नरः ।
अनृणी(१) चाप्रवासी च स वारिचर ! मोदते ॥

यक्ष उवाच ।

प्रीतोऽस्मि त्वयि राजेन्द्र ! प्रश्नानां पूरणेन वै ।
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु ॥

युधिष्ठिर उवाच ।

श्यामो य एष रक्ताक्षोद्वृहत्साल इवोत्थितः ।
व्यूढोरस्कोमहाबाहुर्नकुलो यक्ष ! जीवतु ॥

यक्ष उवाच ।

प्रियस्ते भीमसेनोऽयमर्जुनो वः परायणम् (२) ।
तत्कस्मान्नकुलं राजन् ! सापत्नं जीवमिच्छसि ॥
यस्य नागसहस्रेण दशसंख्येन वै बलम् ।
तुल्यं तं भीममुत्सृज्य नकुलं जीवमिच्छसि ॥
तथैनं मनुजाः प्राहुर्भीमसेनं प्रियं तव ।
अथ केनाऽनुभावेन(३) सापत्नं(४) जीवमिच्छसि ॥

---

१ अनृणी—न सन्ति ऋणानि ऋषिदेवपितृणाम् ऋणानि यस्य तथोक्तः । स्वाध्याययागपुत्रोत्पादनैः तेषु यथाक्रममनृणः यः पुमान् स इत्यर्थः ।

२ परायणं—परं अयनं स्थानं आश्रय इत्यर्थः ।

३ अनुभावेन—मतिनिश्चयेन अभिप्रायेणेत्यर्थः । "अनुभावः प्रभावे च सतां च मतिनिश्चये" ।

४ सापत्नं—अनु विमातृपुत्रत्वात् । जीवं—जीवन्तं जीवति इति जीवः पचाद्यच् ।

Digitized by Google

यस्य बाहुबलं सर्व्वे पाण्डवाः समुपासते ।
अर्ज्जुनं तमपाहाय नकुलं जीवमिच्छसि ॥

युधिष्ठिर उवाच ।

धर्म्म एव हतो हन्ति धर्म्मोरक्षति रक्षितः ।
तस्माद्धर्म्मं न त्यजामि मा नो(१)धर्मो हतोवधीत्(२)॥
धर्म्मशीलः सदा राजा इति मां मानवा विदुः ।
स(२) धर्म्मात्र चलिष्यामि नकुलोयत्र ! जीवतु ॥
कुन्ती चैव तु माद्री च द्वे भार्य्ये तु पितुर्मम ।
उभे सपुत्रे स्यातां वै इति मे ध्रियते(३) मतिः ॥
यथा कुन्ती तथा माद्री विशेषो नास्ति मे तयोः ।
माद्यां(४) समभिच्छामि नकुलो यत्र ! जीवतु ॥

यत्र उवाच ।

यस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम् ।
तस्मात्ते भ्रातरः सर्व्वे जीवन्तु भरतर्षभ ॥

---

१ धर्म्मोहतः सन् नोऽस्मान् मावधीत् । मायोगात् अमागम-निषेधः ।

२ स—सोऽहम् ।

३ ध्रियते—अस्ति अवतिष्ठते । धृधातुस्तौदादिकः ।

४ माद्यां समं—मावीः समं तुल्यं सुखदुःखादिकम् इच्छसि । अत्र समसौख्याने तृतीयाकरणमार्षम् ।

Digitized by Google

ततस्ते यक्षवचनादुदतिष्ठन्त पाण्डवाः ।
क्षुत्पिपासे च सर्व्वेषां क्षणेन व्यपगच्छताम् ॥

युधिष्ठिर उवाच ।

सरस्येकेन पादेन तिष्ठन्तमपराजितम् ।
पृच्छामि को भवान् देवो न मे यक्षोमतो भवान् ॥
वसूनां वा भवानेको रुद्राणामथवा भवान् ।
अथवा मरुतां श्रेष्ठो वज्री वा त्रिदिवेश्वरः ॥

यक्ष उवाच ।

अहन्ते जनकस्तात ! धर्म्मोऽस्मृदुपराक्रमः ।
त्वां दिदृक्षुरनुप्राप्तो विद्धि मां भरतर्षभ ॥
यज्ञः सत्यं दमः शौचमार्ज्जवं क्षीरचापलम् ।
दानं तपो ब्रह्मचर्य्यमित्येतास्तनवो मम ॥
अहिंसा समता शान्तिस्तपः शौचममत्सरः ।
द्वाराण्येतानि मे विद्धि प्रियोह्यसि सदा मम ॥
धर्म्मोऽहमस्मि भद्रन्ते जिज्ञासुस्त्वामिहागतः ।
आनृशंस्येन तुष्टोऽस्मि वरं दास्यामि तेऽनघ ॥

युधिष्ठिर उवाच ।

देवदेवो मया दृष्टो भवान् साक्षात्सनातनः !
यं ददासि वरं तुष्टस्तं ग्रहीष्याम्यहं पितः ॥

Digitized by Google

जयेयं लोभमोहौ च क्रोधञ्चाहं सदा विभो ! ।
दाने तपसि सत्ये च मनो मे सततं भवेत् ॥

धर्म्म उवाच ।

उपपन्नो गुणैरेतैः स्वभावेनाऽसि पाण्डव ।
भवान् धर्म्मः पुनश्चैव (१) यथोक्तं ते भविष्यति ।
इत्युक्त्वाऽन्तर्दधे धर्म्मो भगवाल्लोकभावनः (२) ॥

---

१ यद्यपि त्वयि धर्म्मः स्वभावतो वर्त्तते, तथापि मद्वरदानात् स पुनरपि तव प्रार्थनानुरूपो नितरां भवतु ।

२ भूतभावनः—भूतानि भावयति जनयति यः सः । कर्त्तरि ल्युः ।

Digitized by Google

रामायणम् ।

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता ।
गलदश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥
ये त्वया कीर्त्तिता दोषा वने वास्तव्यतां प्रति ।
गुणानित्येव तान्विद्धि तव स्नेहपुरस्कृतान् ॥
त्वया सह च गन्तव्यं मया गुरुजनाज्ञया ।
त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ॥
न हि मां त्वत्समीपस्थामपि शक्रोऽपि राघव !
सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ॥
शुद्धात्मन् प्रेमभावाद्धि भविष्यामि विकल्मषा ।
भर्त्तारमनुगच्छन्ती भर्त्ता हि परदैवतम् ॥
प्रेत्यभावे हि कल्याणः(१) सङ्गमो मे सह त्वया ।
इत्यतोऽनुगमिष्यामि त्वाहं कृतविनिश्चया ॥
श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनां ।
भर्त्तारं किल या नारी च्छायेवानुगता सदा ॥
अनुगच्छति गच्छन्तं तिष्ठन्तं यानुतिष्ठति ।

---

१ प्रेत्यभावे—परलोके । प्र + इण + यप् + भू + घञ् । कल्याण-मस्मिन् भवतीति कल्याणः अर्श आदित्वात् अच् ।

Digitized by Google

तद्भावभावनिरता(१) तत्संयोगपरायणा ।
तमेव भूयो भर्त्तारं सा प्रेत्याप्यनुगच्छति ॥
अनुरक्तां प्रियां भार्य्यां सुव्रतां पतिदेवतां ।
न त्वं रोचयसे नेतुं मामितः केन हेतुना ॥
भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः (२) ।
नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम्(२) ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥
एवं बहुविधं तं सा याचते गमनं प्रति ।
नानुमेने महाबाहुस्तां नेतुं विजनं वनं ।
सा तमुत्तमसंविग्ना सीता विपुलवक्षसं ।
प्रणयाच्चाभिमानाच्च परिचिक्षेप (३) राघवं ॥
किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ।
यत्परित्यक्तुकामस्त्वं माममन्यपरायणां ॥
द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् (४) ।

---

१ तद्भावभावनिरता—तस्य भर्तुः भावः अभिप्रायः तस्य भावः साधनं तस्मिन् निरता । भाव = भू-घिक् घञ् ।

२ समां सुखदुःखयोः—अभ्युदये व्यसने च समां तुल्यां विकाररहिताम् । समानसुखदुःखिनीं तव सुखे सुखिनीं तव दुःखे च दुःखिनीम् ।

३ परिचिक्षेप—भृशं भर्त्सयमास ।

४ अनुव्रतां—अनु सह व्रतं यस्या सतीम् । सत्यवता सह गृहीत-

Digitized by Google

सावित्रीमिव मां विद्धि त्वमात्मवशवर्त्तिनीम् ॥
न मातुर्न पितुस्तत्र(१) स्मरिष्यामि न वेश्मनः ।
आर्त्तवान्युपभुञ्जाना(२) पुष्पाणि च फलानि च ॥
न च तत्र ततः(३) किञ्चिद्द्रष्टुमर्हसि विप्रियम् ।
मत्कृते न च ते शोका न भविष्यामि दुर्भरा ॥
यस्त्वया सह सर्गो मे निरयो यस्त्वया विना ।
इति जानन् परां प्रीतिं गच्छ राम मया सह ॥
इति सा शोकसन्तप्ता विलप्य करुणम्बहु ।
चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सत्वरम् ॥
तां परिपूज्य(४) बाहुभ्यां विसंज्ञामिव दुःखिताम् ।
उवाच वचनं रामः परिविश्वासयं(५) स्तदा ॥
न देवि तव दुःखेन स्वर्गमप्यभिरोचये ।
न हि मेऽस्ति भयं किञ्चित् स्वयम्भोरिव सर्व्वतः ॥
मम सन्ना मतिः सीते नेतुं त्वां दण्डकावनम् ।

वनवासव्रतामित्यर्थः । क्षमासान्तर्गतस्यापि अनुपदस्य योगात् द्वितीया । "अनुर्लक्षे तु सादृश्ये च" इति दीपदेवः ।

१ कर्म्मणि—षष्ठी ।

२ आर्त्तवानि—ऋतुविशेषजातानि ।

३ ततः—तस्मात् ।

४ बाहुभ्यां परिपूज्य—प्रत्यालिङ्ग्य ।

५ प्रवीधयन् ।

Digitized by Google

तथाध्यस्य नयाभि त्वामनुयातुं सुनिश्चिताम् ॥
आरभस्व चारुशीले वनवासक्षमाः क्रियाः ।
इदानीं त्वष्टते सीते स्वर्गोऽपि मम रोचते ॥

ततः प्रहृष्टा प्रतिपूर्णमानसा
यशस्विनी भर्तुरवेक्ष्य भाषितम् ।
धनानि रत्नानि च दातुमङ्गना
प्रचक्रमे धर्मभृतां(१) मनस्विनी ॥

ततोऽब्रवीन्महातेजा रामो लक्ष्मणमग्रतः ।
स्थितं प्राग्गामिनं धीरं याचमानं कृताञ्जलिम् ॥
मयाद्य सह सौमित्रे त्वयि गच्छति काननं ।
को भजिष्यति कौशल्यां सुमित्रां वा यशस्विनीम् ॥
अभिवर्षति कामैर्यः पर्जन्यः पृथिवीमिव ।
स विनाशवशं यातो महातेजा महीपतिः ॥
सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः(२) सुता ।
दुःखितानां सपत्नीनां न करिष्यति शोभनम् ॥
न स्मरिष्यति कौशल्यां सुमित्रां च सुदुःखिताम् ।
भरतो राज्यमासाद्य कैकेय्यां पर्य्यवस्थितः(३) ॥

---

१ धर्मभृतां—धार्मिकेभ्यः । समन्वविवक्षया षष्ठी ।

२ अश्वपतेः—कैकयराजस्य ।

३ पर्य्यवस्थितः—अनुरक्तः ।

Digitized by Google

एवमुक्तस्तु रामेण लक्ष्मणः श्लक्ष्णया गिरा ।
प्रत्युवाच तदा रामं वाक्यज्ञो वाक्यकोविदम् ॥
तवैव तेजसा वीर भरतः पूजयिष्यति ।
कौशल्यां च सुमित्रां च प्रयतो नास्ति संशयः ॥
कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ।
कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्प्यते ॥
धनुरादाय सगुणं तूणवुम्मं सायकम् ।
पुरतस्ते गमिष्यामि पन्थानमनुदर्शयन् ॥
आहरिष्यामि ते नित्यं मूलानि च फलानि च ।
वन्यानि च तथान्यानि स्वाहार्हाणि तपस्विनाम् ॥
भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥
रामस्त्वनेन वाक्येन सम्प्रीतः प्रत्युवाच तम् ।
व्रजापृच्छस्व सौमित्रे सर्वमेव सुहृज्जनम् ॥
ततः सीतां समालिङ्ग्य स्वश्रूर्वचनसब्रवीत् ।
परिदेवमानां कृपणां मूर्ध्न्युपाघ्राय मैथिलीम् ॥
असत्यः सर्वलोकेऽस्मित् सततं सत्कृताः प्रियैः(१) ।
भर्त्तारं नानुमन्यन्ते विनिपातमतं(२) स्त्रियः ॥

---

१ प्रियैः—इष्टवस्तुभिः, पतिभिर्वा ।

२ विनिपातगतं—व्यसनमापन्नम् ।

Digitized by Google

एष स्वभावो नारीणामनुभूय पुरा सुखम् ।
अस्यामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥
साध्वीनान्तु स्थितानान्तु शीले सत्ये श्रुते स्थितौ(१) ।
दैवतं परमं स्त्रीणां पतिरेको विशिष्यते ॥
स त्वया नावमन्तव्यः पतिः प्रव्राजितो वनम् ।
तव देवसमस्त्वेष निर्धनः सधनोऽपि वा ॥
विज्ञाय वचनं सीता तस्या धर्म्मार्थसंहितम्(२) ।
कृताञ्जलिरुवाचेदं श्वश्रूमभिमुखे स्थिताम् ॥
करिष्ये सर्व्वमेवाहमार्य्या यदनुशास्ति माम् ।
अभिज्ञास्मि यथा भर्त्तुर्व्वर्त्तितव्यं श्रुतञ्च मे(३) ॥
न मामसज्जनेनार्य्या समानयितुमर्हति(४) ।
धर्म्माद्धिचलितुं नाहमलं चन्द्रादिव प्रभा ॥
नातन्द्री वाह्यते वीणा नाचक्रो वर्त्तते(५) रथः ।
नापतिः सुखमेधेत या स्यादपि शतात्मजा(६)॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।

---

१ स्थितौ—लोकमर्य्यादायाम् ।

२ संहितं—सङ्गतं युक्तम् । सम्—धा—क्त ।

३ मे इति कर्त्तरि षष्ठी ।

४ समानयितुं समानां कर्तुं उपमातुम् । Compare.

५ वर्त्तते—आवर्त्तते चलति । Revolves.

६ शतं आत्मजाः पुत्रा यस्याः सा ।

Digitized by Google

अमितस्य तु दातारं भर्त्तारं का न पूजयेत् ॥
सीताया वचनं श्रुत्वा कौशल्याहृदयङ्गमम् ।
शुद्धसत्वा समोचाशु सहसा दुःखहर्षजम् ॥
तां प्राञ्जलिरभिप्रेक्ष्य मातृमध्येऽतिसत्कृताम् ।
रामः परमधर्मात्मा मातरं वाक्यमब्रवीत् ॥
अम्ब मा दुःखिता भूत्वा पश्येस्त्वं पितरं मम ।
सुप्तायास्ते गमिष्यन्ति नववर्षाणि पञ्च च ।
समग्रमिह (१) सम्प्राप्तं मां द्रक्ष्यसि सुहृद्वृतम् ॥
अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ।
उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥
तेनापि समनुज्ञातो धर्म्मज्ञः सह सीतया ।
राघवः शोकसंमूढो जननीमभ्यवादयत् ॥
अन्वक्षं(२) लक्ष्मणो भ्रातुः कौशल्यामभ्यवादयत् ।
अपि मातुः सुमित्राया जग्राह चरणं पुनः ॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ।
हितकामा महाबाहुं मूर्द्ध्न्युपाघ्राय लक्ष्मणम् ॥
सुष्टस्वं वनवासाय स्वनुरक्तः सुहृज्जने ।

---

१ समग्रं सम्पूर्णं, सर्वथा अपायविहीनम् ।

२ अन्वक्षं—अनुपदम् । अनु—अक्ष—घञ् ।

Digitized by Google

रामे प्रमादं मा कार्षीः पुत्र भ्रातरि मच्छति ॥
व्यसनी वा समृद्धो वा गतिरेष तवानघ ।
एष लोके सतां धर्म्यो यज्ज्येष्ठवशगो भवेत् ॥
इदं हि हस्तमुचितं कुलस्यास्य सनातनम् ।
दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु हि ॥
ज्येष्ठस्याप्यनुवृत्तिश्च राजवंशस्य लक्ष्मण ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥
लक्ष्मणस्त्वेवमुक्त्वा सा तत्परं प्रियराघवम् ।
सुमित्रा गच्छ गच्छेति पुनः पुनरुवाच तम् ॥
गम्यतामर्थलाभाय क्षेमाय विजयाय च ।
शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ॥
निर्गच्छति महाबाहौ रामे पौरजनास्त्रुभिः ।
पतितैरभितः सिक्तं प्रणनाश महीरजः ॥
दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं परम् ।
निपपातैव दुःखेन कृत्तमूल इव द्रुमः ॥
ततस्तु तमसातीरं रम्यमाश्रित्य राघवः ।
सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत् ॥
इयमद्य निशा पूर्वा सौमित्रे नो वनेष्विताम् ।
गृहवासस्य सौख्यानां नचोत्कण्ठितुमर्हसि ॥

Digitized by Google

ततः समास्थाय रथं महारथः
ससारथिर्दीसरथिर्वनं ययौ ।
उदङ्मुखं(१) तन्तु रथस्कार स
च्छलेन पौरानपहातुमुद्यतः ॥
प्रभातायान्तु शर्वर्य्यां पौरास्ते राघवं विना ।
अगत्वा शोकसन्तप्ता अयोध्यां प्रति चक्रमुः ॥
विशालान् कोशलान् रम्यान् प्राप्य लक्ष्मणपूर्व्वजः ।
अयोध्याभिमुखो धीमान् प्राञ्जलिर्व्वाक्यमब्रवीत् ॥
आपृच्छे त्वां पुरीश्रेष्ठे काकुत्स्थपरिपालिते ।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च (२)॥
निवृत्तवनवासस्त्वामनृणो जगतीपतेः ।
पुनर्द्रक्ष्यामि माता च पित्रा च सह सङ्गतः ॥

समाप्तः ।

---

१ उदङ्मुखं—उत्तरदिगभिमुखम् अयोध्याभिमुखमित्यर्थः । अयोध्या हि तमसाया उत्तरा ।

२ तानि दैवतानि अपि आपृच्छे इति शेषः ।

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google


Digitized by Google